शास्त्रसंदेशमाला

वैराग्य कल्पलता - २

२०

શાસ્ત્રસંદેશમાલા-૨૦

વૈરાગ્યકલ્પલતા-૨, સ્તબક ૬ થી ૯

ભાગ-૨૦

॥ સંકલન ॥

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

॥ પ્રકાશક ॥

શાસ્ત્રસંદેશમાલા

૩, મણિભદ્ર એપાર્ટમેન્ટ, સુભાષચોક,

આરાધના ભવન માર્ગ - ગોપીપુરા, સુરત-૧

❖ શાસ્ત્રસંદેશમાલા - ૨૦
❖ વૈરાગ્યકલ્પલતા-૨, સ્તબક ૬ થી ૯
❖ પ્રથમ આવૃત્તિ
❖ આસો વદ-૫, વિ.સ.૨૦૬૧
❖ કિંમત રૂ.૪૦/- (પડતર કિંમત)

॥ પ્રમાર્જના - શુદ્ધિ ॥

પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.

પંડિતવર્ય શ્રી રતીભાઈ ચીમનલાલ દોશી

❖ **ટાઇપ સેટીંગ:** પાયલ પ્રિન્ટર્સ - રાધનપુર
શ્રીજી ગ્રાફીક્સ, પાલડી, અમદાવાદ.

❖ **મુદ્રક :** શિવકૃપા ઓફસેટ પ્રીન્ટર્સ, દૂધેશ્વર, અમદાવાદ-૪

વિશેષ નોંધ : શાસ્ત્રસંદેશમાલાના ૧ થી ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવેલ છે. તેની નોંધ લેવા વિનંતી.

આભાર...!

અનુમોદનીય...!

અનુકરણીય...!

શાસ્ત્રસંદેશમાલાના
વીસમા ભાગના
પ્રકાશનનો સંપૂર્ણ લાભ

પૂ.આ.ભ.શ્રી વિજય જિનપ્રભસૂરીશ્વરજી
મ.સા.ના શિષ્યરત્નં
પૂ.મુ.શ્રી હ્રીંકારપ્રભવિજયજી મ.સા.ની
પ્રેરણાથી

શ્રી લક્ષ્મીવર્ધક જૈન સંઘ

શાંતિવન, પાલડી, અમદાવાદ-૭

તરફથી શ્રી સંઘના જ્ઞાનદ્રવ્યની નિધિમાંથી
લેવામાં આવેલ છે. તેની અમો ભૂરી...ભૂરી...
અનુમોદના કરીએ છીએ...!
શ્રી સંઘ તથા ટ્રસ્ટીગણના
અમો આભારી છીએ ..!

- શાસ્ત્રસંદેશમાલા

શાસ્ત્રસંદેશમાલાનાં ૧ થી ૨૦ ભાગમાં લેવાયેલ ૪૦૦ થી વધારે ગ્રંથોના મૂળ પુસ્તકો-પ્રતો મેળવવા માટે અમોએ નીચે લખેલ સંસ્થાઓ હસ્તકના જ્ઞાનભંડારનો વિશેષ ઉપયોગ કરેલ છે. આ સંસ્થાઓ અને તેના ટ્રસ્ટીઓ તથા કાર્યકરોના અમો આભારી છીએ.

૧.	શ્રી વિજયગચ્છ જૈન ઉપાશ્રય	- રાધનપુર
૨.	શ્રી નગીનભાઈ જૈન પૌષધશાળા	- પાટણ
૩.	વિજય રામચન્દ્રસૂરીશ્વરજી આરાધના ભવન	- સુરત
૪.	શ્રી જૈનાનન્દ પુસ્તકાલય	- સુરત
૫.	શ્રી મોહનલાલજી જૈન ઉપાશ્રય	- સુરત
૬.	શ્રી દાનસૂરિ જ્ઞાનમંદિર	- અમદાવાદ
૭.	જૈન આરાધના ભવન ટ્રસ્ટ	- અમદાવાદ
૮.	શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર	- કોબા
૯.	શ્રી નેમિનંદન શતાબ્દિ ટ્રસ્ટ	- અમદાવાદ

- શાસ્ત્રસંદેશમાલા

પ્રકાશકીય .... !

પૂર્વના પૂર્વાચાર્ય - પુણ્યાત્માઓએ પદ્યમાં પ્રરૂપેલા ૪૦૦ થી વધારે પ્રકરણોના ૭૦,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય આજે એક નવા સ્વરૂપે આવી રહ્યું છે.

ઉપલબ્ધ ગ્રંથોનું ઉપકારક-ઉપયોગી બનનાર આ એક-અપૂર્વ-અનોખું-અનેરું-અદ્ભૂત પ્રકાશનમાં અમો નિમિત્ત બનેલ છીએ તેનો અમોને હર્ષ છે.

છેલ્લા ત્રણ વર્ષથી પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્ય રત્ન પૂ.પંન્યાસશ્રી તપોરત્નવિજયજી મ.સા.ના સંપૂર્ણ માર્ગદર્શન મુજબ પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સાહેબે આ સંકલના તૈયાર કરી આપેલ છે.

શાસ્ત્રસંદેશમાલા દ્વારા પ્રકાશિત થયેલ આ ૨૦ પુસ્તકોમાં પૂ.આ.શ્રી હરિભદ્રસૂરીશ્વરજી મ.સા. તથા પૂ.ઉપા.શ્રી યશોવિજયજી મ.સા. દ્વારા રચાયેલ પદ્ય સાહિત્યના સાત પુસ્તકો છે બાકીના તેર પુસ્તકોમાં અલગ-અલગ કર્તાઓની કૃત્તિઓનો વિષયવાર સમાવેશ કરવામાં આવેલ છે.

શાસ્ત્રસંદેશમાલાના આ પ્રકાશનમાં શુદ્ધિનો વિશેષ ખ્યાલ રાખવામાં આવેલ છે. દરેક પુસ્તકમાં આગળ જણાવેલ પૂજ્યશ્રીઓએ તે પુસ્તકનું પ્રમાર્જન કરી આપેલ છે. તેમાં પૂ.પં.શ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા., પૂ.આ.શ્રી યોગતિલકસૂરીશ્વરજી

મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા. (સંસ્કૃત ગ્રન્થો) તથા પૂ.સા.શ્રી દક્ષાશ્રીજી મ.ના. શિષ્યા પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ. આદિએ વિશેષ કાળજી રાખી શુદ્ધિ કરી આપેલ છે.

જૈન પંડિતોમાં જેમનું આગવું સ્થાન-નામ છે એવા પંડિતવર્યશ્રી રતીભાઇ ચીમનલાલ દોશીએ શાસ્ત્રસંદેશમાલાના આ ૨૦ ભાગનું સમગ્ર મેટર ચેક કરી આપેલ છે. દરરોજ પાંચ-છ કલાક અધ્યયનનું કાર્ય ચાલુ રાખી, અથાગ મહેનત કરી સમયનો જે ભોગ તેઓશ્રીએ આપેલ છે તે પ્રશંસનીય છે.

શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘે તથા બીજા અલગ અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યની નિધિમાંથી ઉદારતાપૂર્વક લાભ લઇ આ કાર્યને વેગવંતુ બનાવેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

ટાઇપ સેટીંગ માટે પાયલ પ્રિન્ટર્સ - રાધનપુરના માલિક શ્રી ઇકબાલભાઇ તથા શ્રીજી ગ્રાફીક્સ - અમદાવાદના શ્રી નિકુંજભાઇ પટેલે ઘણી જ ધીરજ અને ખંતથી શ્રી રીઝવાન શેખના સહકારથી આ કાર્યને પૂર્ણતાએ પહોંચાડ્યું છે.

પ્રીન્ટીંગ, ટાઇટલ પ્રીન્ટીંગ તથા બાઇન્ડીંગનું કામ શિવકૃપા ઓફસેટ પ્રીન્ટર્સ-અમદાવાદના ભાવિનભાઇએ વિશેષ કાળજીપૂર્વક કરી આપેલ છે.

શાસ્ત્રસંદેશમાલા

મોક્ષનો સાચો ઉપાય... !

મોક્ષને સાધવાનો જે સાચો ઉપાય, તેને આપણે વિશ્વધર્મ કહીએ છીએ. રાગથી સર્વથા રહિત બનીને અનન્તજ્ઞાની બનેલા પુણ્યપુરુષોએ મોક્ષનો સાચો ઉપાય દર્શાવ્યો છે. એ તારકોની આજ્ઞાના રહસ્યને પામેલા મહર્ષિઓએ એ ઉપાયને વિસ્તારથી સમજાવ્યો છે. એ ઉપાયને સેવવાને માટે, એ ઉપાયમાં સાચી શ્રદ્ધા કેળવવી જોઈએ. જીવનું સ્વરૂપ શું, અજીવનું સ્વરૂપ શું, જીવ સાથે કર્મનો યોગ હોય છે ક્યારથી, જીવ સાથે કર્મનો યોગ થાય છે કેવા પ્રકારે, કર્મો હોય છે કેવા પ્રકારના, કર્મોનો યોગ થતો અટકે કેમ, કર્મોનો યોગ સર્વથા દૂર કેમ થાય અને મોક્ષ કોને કહેવાય,-એ વગેરે બાબતોના મોક્ષના અર્થી જીવોએ અભ્યાસ કરવો જોઈએઃ દેવ, ગુરૂ અને ધર્મના વિષયમાં સમ્યક્ કોણને મિથ્યા કોણ !-એનો વિવેકપૂર્વક નિર્ણય કરીને, તેમાં સુનિશ્ચિત મતિવાળા બની જવું જોઈએ.

-પૂ.આ.દેવ.શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા

॥ अनुक्रमणिका ॥

१. वैराग्यकल्पलता

स्तबक – ६ तः ९

स्तबक–६	७६१	१–६४
स्तबक–७	५६२	६४–१११
स्तबक–८	८८५	११२–१८५
स्तबक–९	११३३	१८६–२७९
प्रशस्ति	७	२८०

२. परिशिष्ट–१ १–८

संपूर्ण श्लोक संख्या – ३३४८

संपूर्ण पृष्ठ संख्या – ८ + २८० + ८

॥ वैराग्यकल्पलता: - २ ॥

॥ षष्ठः स्तबकः ॥

अथास्ति स्वस्तिककलितं, बहिरङ्गमनोहरम् ।
वर्धमानपुरं प्रौढैर्वर्धमानं महोत्सवैः ॥ १ ॥

चारुलीलागतिर्यत्र, सदानो विलसत्करः ।
जनवर्गो महाध्वानो, धत्ते स्तम्बेरमश्रियम् ॥ २ ॥

तत्र प्रत्यर्थिकान्ताश्रुधारासिक्तयशोद्रुमः ।
भूपोऽभूद् धवलो नाम, भीमकान्तगुणाश्रयः ॥ ३ ॥

तस्यासीत् कमलाजैत्री, देवी कमलसुन्दरी ।
तस्याः कुक्षिसमुद्भूतः, सुतोऽस्ति विमलाभिधः ॥ ४ ॥

बालकालेऽपि यः स्पृष्टो, न धन्यो बालचेष्टितैः ।
महाहर्म्यस्थित इव, प्रावृट्कालेऽपि कर्दमैः ॥ ५ ॥

तत्रैवाभूत् पुरे श्रेष्ठी, सोमदेवो महाधनः ।
लावण्यनिलयस्तस्य, भार्या कनकसुन्दरी ॥ ६ ॥

कुक्षौ प्रवेशितस्तस्या, अहं पुण्योदयान्वितः ।
भवितव्यतया काले, सा मां प्रासूत हर्षिणी ॥ ७ ॥

जातः पुत्रो मयेत्येषांऽभिमानं हृदये दधौ ।
तदा दृष्टोऽन्तरङ्गत्वाज्जातः पुण्योदयस्तु नः ॥ ८ ॥

विहितः सोमदेवेन, सुतजन्ममहोत्सवः ।
स वामदेव इत्याख्यां, द्वादशेऽह्नि चकार मे ॥ ९ ॥

अद्राक्षं व्यक्तचैतन्यं, प्राप्तोऽहं मानुषत्रयम् ।
द्वौ नरौ ललनां चैकां, वक्रां शक्रायुधाकृतिम् ॥ १० ॥

तेष्वेको मां समालिङ्ग्य, स्नेहादित्थमभाषत ।
मित्र ! प्रत्यभिजानीषे, नवा नेति मयोदितम् ॥ ११ ॥

ततः शोकातुरः सोऽभून्मयोक्तं किं नु शोचसि ।
स प्राह चिरदृष्टोऽपि, त्वयाऽहं विस्मृतोऽस्मि यत् ॥ १२ ॥

मयोक्तं कुत्र दृष्टोऽसि, सोऽब्रवीद् बहवोऽभवन् ।
पुरेऽसंव्यवहाराख्ये, मादृशास्ते वयस्यकाः ॥ १३ ॥

न व्यक्तस्ते सखाऽभूवं, तदैकाक्षादिषु भ्रमन् ।
पञ्चाक्षपशुसंस्थाने, यदाऽभूः संज्ञिगर्भजः ॥ १४ ॥

जातस्तदा सखा तेऽहं, नाव्यक्तत्वात्तु लक्षितः ।
अनन्तशः परिभ्रम्य, ततोऽनन्तेषु धामसु ॥ १५ ॥

नरवाहनराजस्य, नन्दनो रिपुदारणः ।
त्वं सिद्धार्थपुरे जातस्तदाऽहं लक्षितस्त्वया ॥ १६ ॥

सखाऽहं ते मृषावादो, ललितोऽसि मया सह ।
अत्यन्तकुशलोऽभूस्त्वं, मम प्रेमानुभावतः ॥ १७ ॥

पृष्टश्चाहं त्वया मेऽभूत्, कुतः कौशलमीदृशम् ।
मयोक्तं भगिनी मेऽस्ति, मायाख्या तत्प्रसादतः ॥ १८ ॥

त्वयोक्तं दर्शनीया मे, साऽऽत्मीया भगिनी त्वया ।
प्रतिपन्नं वचस्तच्च, तावकीनं मया तदा ॥ १९ ॥

तदेषोऽत्र पुरस्कृत्य, भगिनीमहमागतः ।
स्मरंस्तद्वचनं शोके, हेतुर्मे त्वदुपेक्षणम् ॥ २० ॥

मयोक्तं भद्र ! वृत्तान्तं, व्यक्तं नैनं स्मराम्यहम् ।
तथाऽपि स्मरतो नेत्रे, त्वद्दर्शनविकस्वरे ॥ २१ ॥

तन्न शोकस्त्वया कार्यो, ज्ञेयोऽहं प्राणसन्निभः ।
तेनोक्तमियता सिद्धं, मम सर्वं प्रयोजनम् ॥ २२ ॥

दर्शिताऽऽत्मीयभगिनी, मायेति भुवि विश्रुता ।
प्रियनाम्ना बहुलिका, कार्याऽऽज्ञाऽस्याः सदा त्वया ॥ २३ ॥

अहं तिरोभविष्यामि, नास्ति मेऽवसरोऽधुना ।
अस्यां स्थितायां ज्ञेयस्तु, स्थितोऽहं परमार्थतः ॥ २४ ॥

कनिष्ठोऽयं मम भ्राता, युक्तस्तव सखाऽधुना ।
स्तेयाख्योऽभूत् पुरा छन्नः, प्रादुर्भूयाधुनाऽऽगतः ॥ २५ ॥

द्रष्टव्योहमिव स्नेहात्, तदयं प्रियबान्धवः ।
मयोक्तं मे स्वसा या ते, त्वद्भ्राता मम बान्धवः ॥ २६ ॥

तदाकर्ण्य मृषावादस्तिरोऽभूतः प्रमोदभाग् ।
भगिनीभ्रातरौ प्राप्य, तौ ममोल्लसितं मनः ॥ २७ ॥

विप्रतार्य जगत् सर्वं, मुष्णन् परधनं ततः ।
जातोऽहं निर्घृणः शङ्कारहितः क्रूरचेष्टितः ॥ २८ ॥

लोकेषु लघुतां प्राप्तस्ततोऽहं तृणतूलवत् ।
इतश्च या क्षितिभुजो, भार्या कमलसुन्दरी ॥ २९ ॥

साऽभूत् कनकसुन्दर्याः, सखी प्रियतमा ततः ।
सखा मे मातृसंबन्धाद् विमलोऽभून्नृपात्मजः ॥ ३० ॥

स्नेहभृत् साध्यहीनोऽपि, निर्व्याजोऽभूत् सखा स मे ।
चन्द्रमङ्क इवाहं तु, विमलं मलिनः श्रितः ॥ ३१ ॥

शाठ्याशाठ्यभृतोरेवमावयोर्यान्ति वासराः ।
सह क्रीडाविनोदेन, प्रथितस्नेहशालिनोः ॥ ३२ ॥

कौमारस्थोऽथ विमलो, जग्राह सकलाः कलाः ।
तारुण्यं प्राप लावण्यसुधारसतरङ्गितम् ॥ ३३ ॥

मया सहान्यदा प्राप्तः, स क्रीडानन्दनं वनम् ।
तालहिन्तालमालूरनागपुन्नागराजितम् ॥ ३४ ॥

विलसत्केतकीजातिचन्दनागुरुकेसरम् ।
सहकारलतास्फारद्राक्षामण्डपमण्डितम् ॥ ३५ ॥

कयोश्चिद् ध्वनिरायातो, नूपुरारवमिश्रितः ।
अत्रान्तरे स्फुटं तत्र, श्रवःपुटकुटुम्बिताम् ॥ ३६ ॥

कस्यायं ध्वनिरित्याह, प्रति मां विमलस्ततः ।
मयोक्तं न श्रुतः सम्यग्, गत्वा निर्णीयतां पुरः ॥ ३७ ॥

तथेत्युक्त्वा गते स्तोके, भूभागे पदपद्धतिः ।
दृष्टाऽऽवाभ्यां रथाम्भोजचक्राङ्कुशझषाङ्किता ॥ ३८ ॥

ततो मामाह विमलः, श्रेष्ठं नृमिथुनं ह्यदः ।
सामान्यमर्त्या नेदृक्षाः, न स्पृशन्ति भुवं सुराः ॥ ३९ ॥

गत्वाऽग्रतस्ततो दृष्टं, मिथुनं तल्लतागृहे ।
निलीनौ शंकरभयात्, प्रत्यक्षौ रतिमन्मथौ ॥ ४० ॥

निरूप्यापसृतावावामदृष्टौ तेन किञ्चन ।
अत्रान्तरे नरौ दृष्टावायान्तौ व्योम्नि भीषणौ ॥ ४१ ॥

लतागृहोपरि प्राप्तावुद्गीर्णासी क्षणेन तौ ।
तत्रैकः प्राह रे लज्जाविहीन पुरुषाधम ! ॥ ४२ ॥

न नश्यतोऽपि मोक्षस्ते, स्मर तेनेष्टदेवताम् ।
लतागृहस्थस्तच्छ्रुत्वा, संस्थाप्य ललनां नरः ॥ ४३ ॥

निष्कृष्टासिः करालभ्रूरुत्पपातास्य सम्मुखम् ।
तस्य ताभ्यां समं घोरं खड्गयुद्धमभूत् तदा ॥ ४४ ॥

प्रवेष्टुमैहत तयोर्नर एको लतागृहम् ।
शरणं विमलस्यागाद्, भीता बालाऽथ सा ततः ॥ ४५ ॥

तां ग्रहीतुं स पुरुषस्तत्रागाद् वनदेवता ।
व्योम्नि तं स्तम्भयामास, कुमारगुणरागिणी ॥ ४६ ॥

विस्फारिताक्षश्चित्रस्थ, इवागात् स विलक्षताम् ।
जितो मिथुनकेनाथ, नरो नष्टो द्वितीयकः ॥ ४७ ॥

तत्पृष्ठलग्नं तं दृष्ट्वा, यियासुः पृष्ठतोऽपि न ।
शशाक स्तम्भितो गन्तुं, वारिबद्ध इव द्विपः ॥ ४८ ॥

उत्तम्भितोऽथ तं ज्ञात्वा, वनदेवतयाऽऽशयम् ।
अनुगन्तुं प्रवृत्तोऽन्यौ, लङ्घितौ दृष्टिगोचरम् ॥ ४९ ॥

गतस्तदनुमार्गेण, प्रययौ सोऽप्यदर्शनम् ।
प्रललाप ततो बाला, काऽऽर्यपुत्र ! गतिस्तव ॥ ५० ॥

संस्थापिता कथञ्चित् सा, मया च विमलेन च ।
अथायातो जितरिपुर्वेगान्मिथुनको नरः ॥ ५१ ॥

तं दृष्ट्वाऽमृतसिक्तेव, सा मुदं प्राप बालिका ।
निखिलः स्वीयवृत्तान्तस्तया तस्मै निवेदितः ॥ ५२ ॥

ततो नत्वा स विमलं, पुरुषो मुदितोऽब्रवीत् ।
बन्धुर्भ्राता पिता मे त्वं, दयिता येन रक्षिता ॥ ५३ ॥

प्रेष्योऽहं तव तद् ब्रूहि, किं करोमि समीहितम् ।
विमलः प्राह शक्त्या ते, धृतेयं तत्र के वयम् ॥ ५४ ॥

कोऽयं कथय वृत्तान्तो, महन्मेऽत्र कुतूहलम् ।
स प्राह तन्निषीदेयं, कुमार ! महती कथा ॥ ५५ ॥

स्थिता लतागृहे सर्वे, विमलं प्रति सोऽब्रवीत् ।
रम्ययाम्योत्तरश्रेणिरस्ति वैताढ्यपर्वतः ॥ ५६ ॥

पुराणि तत्र विद्यन्ते, पञ्चाशत् षष्टिरेव च ।
तत्रास्ति दक्षिणश्रेण्यां, पुरं गगनशेखरम् ॥ ५७ ॥

तत्राभूदरिवक्त्राब्जचन्द्रो भूपो मणिप्रभः ।
तस्य देवी च कनकशिखा सद्गुणशालिनी ॥ ५८ ॥

तस्याः पुत्रोऽभवद्, भूरिभाग्यभृद् रत्नशेखरः ।
पुत्र्यौ पुण्यान्विते रत्नशिखामणिशिखे तथा ॥ ५९ ॥

तत्र रत्नशिखा दत्ता, मेघनादस्य भूभुजः ।
सितप्रभस्य च मणिशिखा लावण्यदीर्घिका ॥ ६० ॥

जातो रत्नशिखामेघनादयोरहमङ्गजः ।
रत्नचूड इतीदं मे, नाम रम्यं प्रतिष्ठितम् ॥ ६१ ॥

जातावुभौ मणिशिखासितप्रभसुतौ पुनः ।
अचलश्चपलश्चेति, रतिकान्ताह्वया तथा ॥ ६२ ॥

रत्नशेखरभार्याऽभूत्, तत्पुत्री चूतमञ्जरी ।
चक्रुः सर्वाण्यपि क्रीडां, बाल्येऽमूनि सहाद्भुताम् ॥ ६३ ॥

कुमारभावं प्राप्तानि, गृहीताः सकलाः कलाः ।
इतश्च चन्दनो नाम, प्रसिद्धः सिद्धपुत्रकः ॥ ६४ ॥

बालमित्रं दधद् रत्नशेखरस्यास्ति कौशलम् ।
जैनागमे निमित्ते च, ज्योतिषे मन्त्रलक्षणे ॥ ६५ ॥

जैनधर्मरतः सङ्गात्, तस्याभूद् रत्नशेखरः ।
धर्मं सोऽपि पितुर्मेऽदाद्, भगिन्योर्मह्यमेव च ॥ ६६ ॥

अन्यदा चन्दनेनाहं, निर्दिष्टः प्रेक्ष्य लक्षणम् ।
यदयं दारको विद्याचक्रवर्ती भविष्यति ॥ ६७ ॥

ततः साधर्मिकोऽयं सल्लक्षणश्चेति मातुलः ।
ममेमां प्रददौ चूतमञ्जरीं रत्नशेखरः ॥ ६८ ॥

ततो नितान्तमचलचपलौ कुपितौ मयि ।
न शक्नुतोऽभिभवितुं, छिद्राणि मम पश्यतः ॥ ६९ ॥

मया तस्य च्छलं ज्ञातुं, प्रयुक्तो मुखरश्चरः ।
आगत्याह स लब्धाऽऽभ्यां, काली विद्या कुतश्चन ॥ ७० ॥

गतौ तत्साधनार्थं च, क्वापीमौ विधितत्परौ ।
मयोक्तं तौ यदाऽऽयातो, वक्तव्यं भवता तदा ॥ ७१ ॥

तेनाद्य प्रातरुक्तं तौ, सिद्धविद्यौ समागतौ ।
दुष्टधीर्मन्त्रयन्नेवमचलश्चपलं जगौ ॥ ७२ ॥

योद्धव्यं रत्नचूडेन, सार्द्धं सत्त्ववता मया ।
भवता हरणीया च, तरसा रत्न(चूत)मञ्जरी ॥ ७३ ॥

निशम्यैतन्मया ध्यातं, निराकार्याविमौ मया ।
सविद्यौ न पुनर्मातुःष्वसुः पुत्रौ वधोचितौ ॥ ७४ ॥

दुःशीलश्चपलश्चायं, गृहीत्वा चूतमञ्जरीम् ।
विनाशयेद् यदि तदा, ध्रुवं स्याल्लाघवं मम ॥ ७५ ॥

न चान्योऽस्ति सहायो, यस्त्रायते चूतमञ्जरीम् ।
ततोऽपक्रमणं श्रेय, इत्यहं निर्गतो गृहात् ॥ ७६ ॥

क्रीडानन्दनमायातो, गृहीत्वा चूतमञ्जरीम् ।
मयेदं बहुशो दृष्टं, तल्लीनोऽत्र लतागृहे ॥ ७७ ॥

तावदेवानुमार्गेण, तावायातौ दुराशयौ ।
अचलेनाहमाहूतः, स च युद्धे मया जितः ॥ ७८ ॥

मया प्रोत्तेजितो वाक्यैः, खरैर्नष्टोऽनुगच्छता ।
वलित्वा सम्मुखं लग्नो, योद्धुं बद्धो मया बलात् ॥ ७९ ॥

आस्फोटितः क्षितौ प्राप, चूर्णिताङ्गः कदर्थनाम् ।
गलितं पौरुषं दैन्यं, जातं विद्या ययुर्लयम् ॥ ८० ॥

मया ध्यातं तथा जातं, यथा न पुनरेत्यसौ ।
हतं मुष्ट्या परं व्योम, कण्डिताश्च तुषा मया ॥ ८१ ॥

अस्याहं पृष्ठतो लग्नो, यत् त्यक्त्वा चूतमञ्जरीम् ।
सा मरिष्यति भीत्यैव, चपलो वा हनिष्यति ॥ ८२ ॥

यद्वा हत्वैव तां बालां, गतो दुष्टः स कुत्रचित् ।
ततोऽधुना क्वयातीति, विचिन्त्य वलितो द्रुतम् ॥ ८३ ॥

दृष्टः संमुखमागच्छंश्चपलश्चिन्तितं मया ।
आगतः किमयं किं सा, न दृष्टा चूतमञ्जरी ॥ ८४ ॥

किं वा रतमनिच्छन्ती, रुषाऽनेन निपातिता ।
जीवन्त्यां स्ववशायां वा, तस्यां नास्यागतिर्भवेत् ॥ ८५ ॥

यावच्च चिन्तयाम्येवं, चपलस्तावदागतः ।
लग्नं युद्धं मया सोऽपि, बद्ध्वैवास्फोटितो भुवि ॥ ८६ ॥

ततः किं सा मृता किं वा, नष्टा लीनाऽथवा क्वचित् ।
किं वान्यवशतां प्राप्तेत्यनेककुविकल्पभाग् ॥ ८७ ॥

प्राप्तोऽहमिममुद्देशं, दृष्टा प्रियतमा ततः ।
उल्ललास मनश्चिन्ता, गता रोमाञ्चितं वपुः ॥ ८८ ॥

माहात्म्यं मे सवृत्तान्तं, कथितं चानया तव ।
रक्षितं जीवितं तन्मे, रक्षता मत्प्रियां त्वया ॥ ८९ ॥

तद्दीयतां ममादेशो, विधायानुग्रहं मयि ।
येनायं कुरुते दासो, यथाशक्ति प्रियं तव ॥ ९० ॥

विमलः प्राह हे धीर ! कृतज्ञजनशेखर ! ।
सम्भ्रमेणालमधिकं, न मे त्वद्दर्शनात् प्रियम् ॥ ९१ ॥

दर्शनादेव सुहृदामुद्गिरन्ति मुदं बुधाः ।
कुमुदाब्धिचकोराणां, किमन्यत् कुरुते विधुः ॥ ९२ ॥

विमलोक्तमिति श्रुत्वा, रत्नचूडो व्यचिन्तयत् ।
अर्थदेषु हि नार्थित्वं, सत्सु कल्पद्रुमेष्विव ॥ ९३ ॥

विना प्रत्युपकारं च, न स्यान्मे चित्तनिर्वृतिः ।
धत्ते तापं रसं दातुं, द्रुमेष्वात्तरसो रविः ॥ ९४ ॥

रत्नं करतले तेन, ध्यात्वेति प्रकटीकृतम् ।
निर्मलं वर्णसंकीर्णं, नीलाद्यप्रविभागतः ॥ ९५ ॥

बद्धेन्द्रकार्मुकं दिक्षु, प्रभाजालैः प्रसृत्वरैः ।
अखिलग्रहधामेव, पिण्डितं सर्वकार्यकृत् ॥ ९६ ॥

प्रदर्शयित्वा तद् रत्नचूडोऽथ विमलं जगौ ।
कुमार ! सर्वरोगघ्नमिदं दारिद्र्यनाशनम् ॥ ९७ ॥

दत्तं तुष्टेन देवेन, मम चिन्तामणिप्रभम् ।
अनुग्रहं कुरु व्यक्तं, तदस्य ग्रहणेन मे ॥ ९८ ॥

विमलः प्राह पूतात्मन् !, न कार्योऽत्राग्रहस्त्वया ।
हन्यतां चेतसो दैन्यं, मुच्यतामतिसंभ्रमः ॥ ९९ ॥

विभातीदं तवाभ्यर्णे, केशवस्येव कौस्तुभः ।
अतः संगोप्यतां सम्यग्, भावतो दत्तमेव मे ॥ १०० ॥

तदोक्तं चूतमञ्जर्या, तृष्णाहीनोऽपि नार्हसि ।
कर्तुमस्यार्थनाभङ्गं, मयूरस्येव वारिदः ॥ १०१ ॥

यावत् किमुत्तरामीति, धत्तेऽथ विमलो हृदि ।
तावद् वस्त्राञ्चले बद्धं, रत्नचूडेन तस्य तत् ॥ १०२ ॥

शुशुभे तच्च तादृक्षं, प्राचीगर्भस्थभानुवत् ।
बहिः प्रसृत्वरज्योतिः, प्रच्छन्नमपि भास्करम् ॥ १०३ ॥

तन्मनस्तरलं नाभूद्, रत्नं लब्ध्वाऽपि तादृशम् ।
शशाङ्करत्नमासाद्य, व्योम क्षुभ्यति नाब्धिवत् ॥ १०४ ॥

दृष्ट्वाऽथ हर्षनिर्मुक्तं, विमलं विगतस्पृहम् ।
तद्गुणैर्भावितश्चित्ते, रत्नचूडो व्यचिन्तयत् ॥ १०५ ॥

अहो माहात्म्यमस्योच्चैरहो निःस्पृहताऽतुला ।
स्यादीदृशे मनोरत्ने, रत्नैरन्यैः किमस्य वा ॥ १०६ ॥

सखायमस्य पृच्छामि, तत् क्कत्योऽयं कुमारकः ।
किमस्य नाम गोत्रं च, किमुद्दिश्येह चागतः ॥ १०७ ॥

पृष्टोऽहं रत्नचूडेन, धृत्वैकान्तेऽखिलं ततः ।
मयोक्तं धवलस्यायं, वर्धमानपुरेशितुः ॥ १०८ ॥

भूपतेर्विमलः पुत्रो, क्रीडानन्दनमुच्चकैः ।
सुरम्यं जनवादेन, श्रुत्वा द्रष्टुमिहागतः ॥ १०९ ॥

शुश्राव युवयोः शब्दं, मित्रेणात्र मयाऽन्वितः ।
भूभागमागतेनाग्रे, दृष्टा च पदपद्धतिः ॥ ११० ॥

तया नृमिथुनं ज्ञातं, युवां दृष्टौ लतागृहे ।
अवदानं तवाप्यस्य, ततो व्यक्तमनन्तरम् ॥ १११ ॥

आह्लादकोऽयं बन्धूनां, रुच्योऽयं सर्वदेहिनाम् ।
स्पृहणीयोऽपि शमिनां, श्लाघ्यश्च विदुषामपि ॥ ११२ ॥

नानेन प्रतिपन्नं च, किं च नाद्यापि दर्शनम् ।
तच्छ्रुत्वा रत्नचूडेन, चिन्तितं शुद्धचेतसा ॥ ११३ ॥

प्रदर्शयामि भगवद्बिम्बमस्य मनोहरम् ।
कृतः प्रत्युपकारः स्यादित्थमस्य मयोचितः ॥ ११४ ॥

अथासौ विमलं प्रोचे, कुमारेह पि(मा)तामहः ।
मणिप्रभो ममायातस्तस्येदं रुचितं वनम् ॥ ११५ ॥

समागमकृते विद्याभृतामिह पुनः पुनः ।
कृत्वा चैत्यं युगादीशबिम्बं तेन प्रतिष्ठितम् ॥ ११६ ॥

प्रणामार्थमतस्तस्य, बहुशोऽहमिहागतः ।
तद् द्रष्टुमर्हति भवान् ममानुग्रहकृत् ततः ॥ ११७ ॥

तथेति विमलः प्रोचे, रत्नचूडो जहर्ष च ।
ततो वयं भवध्वंसिभवनाभिमुखं गताः ॥ ११८ ॥

घटितं स्फटिकैर्दृष्टं, राजितं स्वर्णराजिभिः ।
ज्वलदौषधिरूप्याद्रिशृङ्गाभं भगवद्गृहम् ॥ ११९ ॥

संक्रान्तैः काञ्चनस्तम्भैः, स्वच्छस्फाटिककुट्टिमे ।
दधत् क्षीराब्धिनिर्मग्नमन्थाद्रिव्रजविभ्रमम् ॥ १२० ॥

मुक्तावचूलैः स्तम्भस्थैर्विद्रुमद्युतिमिश्रितैः ।
हसत् पूर्वाद्रिशृङ्गस्थसन्ध्यारक्तविधुश्रियम् ॥ १२१ ॥

अवचूलस्थवैडूर्यत्विड्व्याप्तसितचामरैः ।
भवकण्ठप्रभापीनगङ्गापूरश्रियं हरत् ॥ १२२ ॥

सितचामरसौवर्णदण्डत्विट्पिङ्गदर्पणैः ।
स्वर्धुनीभृद्भवजटास्फुटेन्दुद्युतिचित्रकृत् ॥ १२३ ॥

मणिहारैर्महादर्शमण्डलप्रतिबिम्बितैः ।
जलस्थविद्रुमलतावितानश्रीप्रपञ्चकम् ॥ १२४ ॥

प्रविश्य भवनेऽस्माभिश्चारु तत्रावलोकितम् ।
बिम्बं युगादिनाथस्य दिक्षु प्रेङ्खत्प्रभाभरम् ॥ १२५ ॥

प्रणामो विहितः सर्वैः, पश्यतो विमलस्य तत् ।
उल्ललासान्तरं वीर्यं, गलिता कर्मसन्ततिः ॥ १२६ ॥

व्यचिन्तयदथोद्भूतगुणरागः स चेतसि ।
अहो भगवतो रूपमिदं शान्तं मनोहरम् ॥ १२७ ॥

अयमाकार एवाह, देवस्य गुणगौरवम् ।
वीतरागो गतद्वेषो, देवोऽस्मादनुमीयते ॥ १२८ ॥

इति ध्यानजलेनास्योन्मूलिते मोहपादपे ।
जातिस्मरणमन्तःस्थं, सन्निधानमिवोदभूद् ॥ १२९ ॥

जातमूर्च्छोऽथ पतितः, क्ष्मापीठे ससंभ्रमः ।
शीतवायुप्रदानेन, कृतः सुव्यक्तचेतनः ॥ १३० ॥

रत्नचूडेन पृष्टश्च, किमेतदिति सादरम् ।
नत्वा तं प्रोद्भवद्भक्तिः, प्राह रोमाञ्चभूषणः ॥ १३१ ॥

प्राणास्त्वं बान्धवस्त्वं मे, त्वं मे माता पिता गुरुः ।
येनेदं दर्शितं बिम्बं, दर्शनादेव पापहृत् ॥ १३२ ॥

दर्शितो मोक्षमार्गो मे, त्वया दर्शयता ह्यदः ।
प्रापितं शिवसौधं मे, छेदिता भववल्लरी ॥ १३३ ॥

जातिः स्मृता मया तेन, प्रेक्षेऽद्य दिनवद् भवान् ।
अतीतान् भगवद्बिम्बं, पुराऽपि हि मयेक्षितम् ॥ १३४ ॥

रञ्जितं दर्शनेनान्तः, सदनुंष्ठानमादृतम् ।
सद्भावैर्भावितश्चात्मा, मैत्रीपात्रीकृता मतिः ॥ १३५ ॥

अङ्गाङ्गिभावं नीतश्च, प्रमोदो गुणशालिषु ।
क्लिश्यमानेषु कारुण्यं, दुष्टे चोपेक्षणं धृतम् ॥ १३६ ॥

औदासीन्यं स्थिरीभूतं, शमः परिणतस्तराम् ।
संवेगः संस्तुतः स्फीतो, भवनिर्वेदचारिमा ॥ १३७ ॥

उद्भूते करुणास्तिक्ये, व्यक्तिं भक्तिर्गुरौ ययौ ।
समाधिर्ववृधे प्रौढिं, चारित्रतपसी गते ॥ १३८ ॥

आसम्यक्त्वभवात् सर्वमस्य बिम्बस्य दर्शनात् ।
जातिस्मृतेर्मया ज्ञातमूहापोहं वितन्वता ॥ १३९ ॥

कुर्वन्ति यत् सुगुरवस्तत् कृतं मे त्वयेत्यथ ।
वदन् पपात विमलो, रत्नचूडस्य पादयोः ॥ १४० ॥

संभ्रमेणालमियता, जाता ते प्रत्युप्रक्रिया ।
उत्थापितस्ततो रत्नचूडेनेति प्रजल्पता ॥ १४१ ॥

ततः साधर्मिक इति, स्तुतश्चेत्थं महाशय ! ।
स्थाने हर्षातिरेकस्ते, धर्मवित्ता हि साधवः ॥ १४२ ॥

अनित्येषु च तुच्छेषु, विषयेषु सतां न धीः ।
धर्म एव मतिस्तेषां, शाश्वतप्रौढशर्मदे ॥ १४३ ॥

इच्छा सत्त्वानुरूपेण, भवेदर्थेषु देहिनाम् ।
तृणैर्हि तुष्यति मृगः, केसरी करिभिर्हतैः ॥ १४४ ॥

श्वा फेलापिण्डमासाद्य, पुच्छमुच्छाल्य नृत्यति ।
द्विपेन्द्रोऽवज्ञया भुङ्क्ते, दत्तं यत्नैः सुभोजनम् ॥ १४५ ॥

धनराज्यादिकं प्राप्य, माद्यन्ति क्षुद्रजन्तवः ।
त्वं तु मध्यस्थधीर्लब्धे, दिव्ये रत्नेऽप्यभूः पुरा ॥ १४६ ॥

अधुना तु समासाद्य, सन्मार्गं परितुष्यसि ।
तदसि श्रेयसां पात्रं, नारोप्यो गरिमा मयि ॥ १४७ ॥

स्वयंबुद्धेम भवता, लोकान्तिकसुरोपमः ।
द्रष्टव्योऽहं जिनाभेन, न तु धार्या गुरुत्वधीः ॥ १४८ ॥

विमलः प्राह मा वादीरिमां वाचं महाशय ! ।
लोकान्तिका जिनज्ञाने, न हि यान्ति निमित्तताम् ॥ १४९ ॥

व्यापृतस्त्वं तु मत्कार्ये, गतो व्यक्तं निमित्तताम् ।
युक्तस्ते विनयः कर्तुं, गुरुस्त्वं पारमार्थिकः ॥ १५० ॥

रत्नचूडोऽवदत् पूज्यो, गुणैस्त्वं द्युसदामपि ।
त्वय्येव गुरुता युक्ता, रत्नश्रीरिव रोहणे ॥ १५१ ॥

विमलः प्राह सा ज्ञेया, गुणवत्ता मनीषिणा ।
न त्रपन्ते यया कर्तुं, गुरूणां प्रेष्यतामपि ॥ १५२ ॥

तेन दुष्प्रतिकारस्त्वं, पूज्योऽसि मम धर्मदः ।
पर्यालोच्यं ममास्त्युच्चैरन्यच्चेदं त्वया सह ॥ १५३ ॥

भववासादहं भीतो, मया पीतं शमामृतम् ।
ग्राह्या भागवती दीक्षा, न स्थेयं गृहपञ्जरे ॥ १५४ ॥

स्वजनाः सन्ति ताताद्याः, केवलं बहवो मम ।
तेषां चेत् प्रतिबोधः स्यात्, तदानृण्यं भवेन्मम ॥ १५५ ॥

रत्नचूडो जगौ सूरिर्बुधनामाऽस्ति भूरिधीः ।
यद्यागच्छेत् कथञ्चित् स, ज्ञातींस्ते प्रतिबोधयेत् ॥ १५६ ॥

स चित्तज्ञोऽतिशयवानब्धिर्लब्धिव्रजस्य च ।
वाचामगोचरस्तस्य, महिमा धुतपाप्मनः ॥ १५७ ॥

विमलोऽवक् क्व दृष्टोऽसौ, बुधाचार्यस्त्वयाऽनघ ! ।
रत्नचूडोऽवदत् क्रीडानन्दनेऽत्रैव सुन्दरे ॥ १५८ ॥

आयातोऽहं गताष्टम्यामर्हद्‌बिम्बार्चनं चिकीः ।
दृष्टं च भवनद्वारि, भूभागे मुनिमण्डलम् ॥ १५९ ॥

तस्य मध्ये स्थितः कृष्णो, दृष्टो बीभत्सदर्शनः ।
त्रिकोणशीर्षश्चिपिटघ्राणो वक्रशिरोधरः ॥ १६० ॥

लम्बोदरः कुरूपश्च, करालदशनो मुनिः ।
केवलं स्निग्धगम्भीरध्वनिना हृदयं हरन् ॥ १६१ ॥

प्रेक्ष्य तं तादृशं ध्यातं, मया नास्य महामुनेः ।
रूपं गुणोचितं चैत्ये, प्रविष्टोऽहं ततो मुदा ॥ १६२ ॥

विधाय विधिवत् पूजामथ चैत्याद् विनिर्गतः ।
आयातो वन्दितुं साधून्, स दृष्टः साधुमध्यगः ॥ १६३ ॥

तपस्वी स्वर्णपद्मस्थः सत्कार्त्तस्वरभास्वरः ।
कूर्मोन्नतपदो गूढशिराजालः सुलक्षणः ॥ १६४ ॥

दधत् करिकराकारमुरुजङ्घं झषोदरः ।
विशालवक्षा विस्तीर्णभुजः करजिताम्बुजः ॥ १६५ ॥

विधुजैत्रमुखस्तुङ्गनाशावंशस्ततेक्षणः ।
प्रलम्बकर्णयुगलः कान्तिमद्दन्तपद्धतिः ॥ १६६ ॥

अष्टमीन्दुलसद्भालश्छत्राकरोत्तमाङ्गभृत् ।
अनन्योपमसौभाग्यभाग्यलावण्यभाजनम् ॥ १६७ ॥

ध्वनिना प्रत्यभिज्ञाय, तं ध्यातं विस्मयान्मया ।
इदानीं कथमीदृक्षः, स एवायं तपोनिधिः ॥ १६८ ॥

अथवाऽत्र किमाश्चर्यं, चन्दनेनोदितं हि मे ।
भवन्ति लब्धिपात्राणि, कामरूपा मुनीश्वराः ॥ १६९ ॥

जायन्ते तेऽणुवत्सूक्ष्मा, गुरवोऽपि च शैलवत् ।
पूरयेयुः स्वदेहस्य, विस्तारेणाखिलं जगत् ॥ १७० ॥

तूलवल्लघवोऽपि स्युः, कुर्युर्देवांश्च किङ्करान् ।
घटाद् घटशतं कुर्युर्मज्जेयुश्च शिलातले ॥ १७१ ॥

आकर्णयन्ति सर्वाङ्गैः, स्पर्शाद् रोगान् हरन्ति च ।
वायुवद् गगने यान्ति, क्वापि नैव स्खलन्ति ते ॥ १७२ ॥

अतोऽयं यः कुरूपः प्राग्, दृष्टः सम्प्रति चेक्ष्यते ।
सुन्दराङ्गस्ततः पात्रं, लब्धीनां परिभाव्यते ॥ १७३ ॥

मया प्रहृष्टचित्तेन, वन्दितो भगवांस्ततः ।
अन्ये च मुनयोऽहं तैर्दत्ताशीश्च पुरःस्थितः ॥ १७४ ॥

पीत्वा तद्वाक्यपीयूषं, भावितस्तद्‌गुणैर्भृशम् ।
पृष्टं चैकस्य साधोः कः, कुत्रत्यश्चैष सूरिराट् ॥ १७५ ॥

तेनोक्तं गुरुरस्माकमयं सूरिर्बुधाभिधः ।
पुत्रः शुभविपाकस्य, धरातलपुरेशितुः ॥ १७६ ॥

साधुतानन्दनो राज्यं, त्यक्त्वा दीक्षामुपाददे ।
साम्प्रतं विहरत्युग्रविहारेण तपोनिधिः ॥ १७७ ॥

ततस्तच्चरितं श्रुत्वा, दृष्ट्वा तल्लब्धिवैभवम् ।
जैनेश्वरे स्थिरीभूतो, धर्मेऽहं मेरुशैलवत् ॥ १७८ ॥

गुरुं च शेषसाधूंश्च, प्रणम्याथ गतो गृहे ।
अन्यत्र विहरत्येष, भगवानपि निःस्पृहः ॥ १७९ ॥

तद् वदामि बुधाचार्यो, यद्यागच्छेदिहोरुधीः ।
परोपकारव्यसनी, त्वद्ज्ञातीन् बोधयेत् तदा ॥ १८० ॥

तेन यद् वैक्रियं रूपं, मम स्थैर्याय निर्मितम् ।
विश्वस्थैर्याय तदसौ, व्यापिपर्ति न संशयः ॥ १८१ ॥

विमलः प्राह सोऽप्यत्राभ्यर्थनीयस्त्वयाऽऽगमे ।
रत्नचूडोऽवदत् कुर्वे, त्वदादेशं न संशयः ॥ १८२ ॥

साम्प्रतं तु गृहे यामि, पित्रोः संधीरणाकृते ।
विमलः प्राह विस्मार्यो, नाहं कार्यं मदीहितम् ॥ १८३ ॥

सुहृद्विरहदूनाऽथ, बभाषे चूतमञ्जरी ।
भ्राताऽसि मे कुमार ! त्वं, स्मर्तव्या निर्गुणाऽप्यहम् ॥ १८४ ॥

विमलः स्म वदत्यार्ये !, गुरुं च गुरुवल्लभाम् ।
स्मरामि यदि नो तन्मे, धर्मधीः कीदृशी भवेत् ॥ १८५ ॥

इत्थं मामपि संभाष्य, गतौ तौ निजमन्दिरम् ।
धर्मालापमिमं व्यक्तं, शृण्वतोऽपि तदा मम ॥ १८६ ॥

सुप्तस्येव गतस्येव, हृदये गुरुकर्मणः ।
न स्थितं पदमप्येकमुपेक्षामरुता हृतम् ॥ १८७ ॥

ततो विशेषतः स्तुत्वा, भगवन्तं विनिर्गतः ।
भगवद्भवनाद् भक्तो, विमलः सहितो मया ॥ १८८ ॥

प्राह मां रत्नचूडेन, रत्नं दत्तमिदं मम ।
प्रयोजने महत्येतत्, कदाचिदुपयोक्ष्यते ॥ १८९ ॥

मम चास्थाऽधुना नात्र, ततो नङ्क्ष्यत्यनादरात् ।
निधायेदं क्वचिद्देशे, गच्छावस्तदिहैव हि ॥ १९० ॥

रत्नं वस्त्राञ्चलाद् दत्तमित्युक्त्वा विमलेन मे ।
मयैकत्र प्रदेशे तन्निखाय स्थगितं स्थलम् ॥ १९१ ॥

ततः पुरे गतावावामहं स्वभवने गतः ।
विजृम्भिते बहुलिकास्तेये मम शरीरके ॥ १९२ ॥

ततोऽवलम्ब्य नीचत्वमपर्यालोच्य चायतिम् ।
विस्मृत्य विमलस्नेहं, स्मृत्वा रत्नं महागुणम् ॥ १९३ ॥

तज्जिहीर्षन्नहं तत्र, प्रदेशे सहसा गतः ।
उत्खातं तत् ततो देशान्निखातं चापरस्थले ॥ १९४ ॥

निखातः तत्प्रदेशे च, पाषाणस्तन्मितो मया ।
विमलो वेत्त्वपुण्यैर्मे, ग्रावीभूतमिदं त्विति ॥ १९५ ॥

ततः समागतो गेहं, लङ्घितं तद्दिनं मया ।
आगता रजनी जाता, चिन्ता सुप्तस्य मे तदा ॥ १९६ ॥

नानीतं यद्गृहे रत्नं, विरूपं तत्कृतं मया ।
दृष्टं तदा तदन्येन, हृतं हन्त भविष्यति ॥ १९७ ॥

अधुना किं करोमीति वितर्काकुलचेतसः ।
विनिद्रस्य व्यतीयाय, रात्रिर्मे दुःखसाक्षिणी ॥ १९८ ॥

प्रभाते द्रुतमुत्थाय, तं प्रदेशमहं गतः ।
समागतो मद्भवने, विमलो विमलाशयः ॥ १९९ ॥

न दृष्टोऽहं गृहे तेन, पृष्टः परिजनो मम ।
क्व वामदेवः स गतः, क्रीडानन्दनमित्यवक् ॥ २०० ॥

ततो मदनुमार्गेण, विमलोऽपि समागतः ।
दूराद् दृष्टो मयाऽऽगच्छन्, जातोऽहं व्याकुलो भिया ॥ २०१ ॥

रत्नप्रदेशं विस्मृत्यादाय पाषाणमञ्जसा ।
संगोप्य तं कटीपट्या, गतोऽहं गहनान्तरे ॥ २०२ ॥

संप्राप्तो विमलस्तत्र, दृष्टोऽहं भयविह्वलः ।
पृष्टं मित्र ! किमेकाकी, भीतोऽसि किमिहागतः ॥ २०३ ॥

मया प्रोक्तं श्रुतः प्रातर्भवानत्र समागतः ।
तेनागतोऽहमप्यत्र, त्रस्तश्च त्वददर्शनात् ॥ २०४ ॥

यास्यामि स्वस्थतां दृष्टे, साम्प्रतं तु द्रुतं त्वयि ।
विमलोऽवक् सुसंपन्नं, गच्छावो जिनमन्दिरे ॥ २०५ ॥

मयेत्थमस्त्विति प्रोक्ते, गतौ तत्राविशत् ततः ।
विमलोऽभ्यन्तरे द्वारदेशेऽहं चकितः स्थितः ॥ २०६ ॥

व्यचिन्ति रत्नहर्तारं, नूनं मां ज्ञातवानयम् ।
तन्नश्यामि द्रुतं नो चेद्, रत्नं लास्यत्ययं बलात् ॥ २०७ ॥

विदेशं यामि नात्रास्मान्मोक्षस्तु स्यात् स्थितस्य मे ।
नष्टस्ततस्त्र्यहेणागामष्टाविंशतियोजनीम् ॥ २०८ ॥

अद्राक्षं तत्र पाषाणं, रत्नग्रन्थौ विमुद्रिते ।
कृच्छ्रेण चेतनां प्राप्तो, हा हतोऽस्मीति मूर्च्छितः ॥ २०९ ॥

इष्टप्रदेशाभिमुखं, वलितस्तज्जिहीर्षया ।
पुनः प्रवृद्धानुशयः, स्तेयमायाविलुप्तधीः ॥ २१० ॥

इतश्च विमलेनाहं, जिनगेहान्निरीयुषा ।
न दृष्टो जातचिन्तेन, वने शेषे गवेषितः ॥ २११ ॥

तत्रानासाद्य सर्वत्रान्वेषितो नगरेऽप्यहम् ।
तत्राप्यदृष्ट्वा सर्वत्रान्वेषकाः प्रेषिता नराः ॥ २१२ ॥

दृष्टस्तेष्वहमेकेनागच्छन्नुक्तश्च वर्तते ।
विमलस्त्वद्वियोगेन, वामदेव ! भृशातुरः ॥ २१३ ॥

ततो ध्यातं मया नाहं, विमलेनास्मि लक्षितः ।
गतं भयं मे नीतोऽहं, पार्श्वं च विमलस्य तैः ॥ २१४ ॥

स्नेहेनालिङ्गितस्तेन, द्वाभ्यां मुक्ताऽश्रुधोरणी ।
सव्याजाव्याजचित्ताभ्यां, पप्रच्छ विमलस्ततः ॥ २१५ ॥

वामदेव ! वदेयन्तं, कालं किमनुभूतवान् ।
मयोक्तं त्वयि चैत्यान्तः, प्रविष्टे प्रविविक्षुणा || २१६ ||

मयाऽम्बरचरी दृष्टा, समायान्ती नभोऽध्वना ।
प्रभोद्भासितदिक्चक्रा, पुण्यलावण्यशालिनी || २१७ ||

आकृष्टासिश्च लेखेव, चान्द्री रुद्राहिभीषणा ।
गतस्तां प्रेक्ष्य भीप्रेमकरम्बितरसान्तरम् || २१८ ||

तदैवोत्पाट्य नीतः खे, हा कुमारेत्यहं रटन् ।
तया स्तनोपपीडं च, सस्नेहमवगूहितः || २१९ ||

प्रतिभाता विषसमा, रतार्थनपराऽपि सा ।
चुम्बन्ती च बलाद् वक्त्रं, त्वया विरहितस्य मे || २२० ||

अत्रान्तरे समायाता, तत्राम्बरचरी परा ।
साऽपि मय्यभिलाषं च, गता दृष्ट्वैव मन्मुखम् || २२१ ||

उद्दालने प्रवृत्तायां, मम तस्यां तयोरभूत् ।
घोरं परस्परं युद्धं, तयोः खचरयोषितोः || २२२ ||

अथाकुलायाः खेचर्याः, पतितः फलवत् करात् ।
चूर्णिताङ्गोऽपि नष्टोऽहं, पुनः संहृतिभीतिभाग् || २२३ ||

अमीभिः पुरुषैर्दृष्टः प्रापितोऽहं त्वदन्तिके ।
कुमार मारजैत्रेदमनुभूतं स्फुटं मया || २२४ ||

तच्छ्रुत्वाऽनुपधिस्नेहाद् रञ्जितो विमलो मयि ।
प्रत्यायितो मुग्ध इति, हृष्टा बहुलिका च मे || २२५ ||

अत्रान्तरे मग्न इवाम्भोधौ दष्ट इवाहिना ।
कामप्यहं दशां प्राप्तः, शोच्यां प्लुष्ट इवाग्निना || २२६ ||

उत्थितं शूलमुदरे, विलूने इव लोचने ।
तीव्रा शिरोर्तिरुदिता, त्रुटितं सन्धिबन्धनैः || २२७ ||

उल्ललास महाश्वासो, विमलो व्याकुलोऽभवत् ।
वैद्यमण्डलमाहूय, कारिता भेषजक्रिया ॥ २२८ ॥

विशेषो न तया जातो, विमलो रत्नमस्मरत् ।
गतो वनप्रदेशं तं, यत्नतस्तन्निरूपितम् ॥ २२९ ॥

अदृष्ट्वा तत्र तद् रत्नं, हा जीविष्यत्यसौ कथम् ।
इति चिन्तापरोऽभ्यर्णं, विमलो मे समागतः ॥ २३० ॥

अत्रान्तरे प्रादुरभूदेका वृद्धनितम्बनी ।
करालरूपा निर्मुक्तफेत्कारा विलुलत्कचा ॥ २३१ ॥

भीतो जनः कृता पूजा, पृष्टा धूपं प्रदाय सा ।
का त्वं भट्टारिकेऽसीति, साऽऽहास्मि वनदेवता ॥ २३२ ॥

मयैव वामदेवोऽयं, विहितो मृतसन्निभः ।
यदनेनापदम्भोऽपि, विमलो वञ्चितः सुहृत् ॥ २३३ ॥

अस्य रत्नं हृतं न्यस्तं, प्रदेशेऽन्यत्र पाप्मना ।
गृहीत्वा तद्भिया नष्टः, पाषाणं पुनरागतः ॥ २३४ ॥

दृष्ट्वा ग्रन्थिस्थपाषाणमानीतो राजपुरुषैः ।
आलजालमिदं चक्रे, वृत्तमित्यखिलं मम ॥ २३५ ॥

वनदेवतया प्रोक्तं, तद्देशस्थं च दर्शितम् ।
रत्नमाह च सा दुष्टो, हन्तव्योऽयं मयाऽधुना ॥ २३६ ॥

विमलः प्राह मा कार्षीरित्थमस्यानघे ! व्यथाम् ।
निहतोऽहं भविष्यामि, हते ह्यस्मिंस्तपस्विनि ॥ २३७ ॥

वनदेवतया मुक्तो, विमलप्रार्थनात् ततः ।
हसितो बालसार्थेन, निखिलैर्निन्दितो जनैः ॥ २३८ ॥

बहिष्कृतोऽहं स्वजनैर्लघु जातस्तृणादपि ।
तथापि प्राक्तनस्थित्या, विमलो मां विलोकते ॥ २३९ ॥

न विप्रियं दर्शयति, भाषते मूर्खभाषितैः ।
न शोच्यं भवता मित्र ! दुराराधो ह्ययं जनः ॥ २४० ॥

दुष्टेऽपि मयि शिष्टत्वं, विमलो नैव यज्जहौ ।
छिन्दतोऽपि तरोश्छायां, प्रकृतिर्ददतो हि सा ॥ २४१ ॥

सज्जनाः सज्जना एव, दुर्जना एव दुर्जनाः ।
विशदा न तमोव्यूहा, मलिना न विधोः कराः ॥ २४२ ॥

खलतायास्तथा दृष्टिः, सज्जनेन बहिष्कृता ।
खलचेष्टां यथा नायं, पुरःस्थामपि पश्यति ॥ २४३ ॥

विमलेनाश्रित इति, स्नेहात् त्यक्तोऽप्यहं जनैः ।
मदन्वितोऽन्यदा प्राप्तो, विमलो जिनमन्दिरम् ॥ २४४ ॥

स्तोतुं प्रावर्तताऽर्हन्तं, स विधायाखिलां क्रियाम् ।
अत्रान्तरे रत्नचूडः, संप्राप्तः खेचरान्वितः ॥ २४५ ॥

आकर्ण्य सोऽथ मधुरां, विमलस्य स्तुतिध्वनिम् ।
सह स्त्रिया च खचरैश्चित्रन्यस्त इव स्थितः ॥ २४६ ॥

अथ तुष्टाव विमलः, पश्यन्निव पुरःस्थितम् ।
उद्भिन्नपुलकोऽर्हन्तं, गम्भीरमधुरध्वनिः ॥ २४७ ॥

नृत्यन्निव ध्यानलयैर्भृशं मज्जन्निवामृते ।
क्षालयन्निव कल्याणीभक्तिर्हर्षाश्रुभिर्मलम् ॥ २४८ ॥

पुण्याब्धिविस्तारकरः सवृत्तः, पीयूषवर्षी तमसां विहन्ता ।
करोति मन्नेत्रचकोरकस्य, मुदं भवानिन्दुरिवोरुदीप्तिः ॥ २४९ ॥

भक्तिं चरीकर्ति विभो ! त्वदीया-माज्ञां बरीभर्ति च यो विशुद्धाम् ।
न संसरीसर्ति स तस्य नूनम्, पुरो नरीनर्ति महोदयश्रीः ॥ २५० ॥

न विस्मयो मोहमलिम्लुचो यत्, त्वद्ध्यानभाजो बहिरेति चित्तात् ।
पञ्चाननाधिष्ठितकाननात् किम्, शृगालबालो न पलायते वा॥ २५१ ॥

प्रशान्तदृष्टिं स्थिरसन्निवेशाम्, विकारहीनामतिसुप्रसन्नाम् ।
न नाथ ! मुद्रामपि तीर्थिकास्ते-ऽनुकुर्वते क्वान्यगुणप्रवृत्तिः॥ २५२ ॥

जगद्धतं येन दुराशयेन, सोऽपि त्वयाऽहन्यत मोहमल्लः ।
भानुः समुद्यन् प्रबलप्रतापः, सर्वंकषं किं न तमः प्रमार्ष्टि ॥ २५३ ॥

त्वदाननेन्दुं जिनराज ! दृष्ट्वा मनो मदीयं द्रवतीन्दुकान्तम् ।
शमामृतापूर्णगुणालवालैः, प्रवर्धतां त्वत्करुणालतान्तः ॥ २५४ ॥

निहत्य मिथ्यात्वपिशाचमीश !, तव प्रसादात् पटुतां गतोऽस्मि ।
तथाऽपि तृष्णा छलयत्यहो मां, स्वामिन् ! पिशाची विनिवारयैनाम्२५५

ममैकतस्त्वद्वचनानुवृत्ति-स्तथाऽन्यतः संसृतिपाशबन्धः ।
बद्धस्य मार्गे गमनं तदेत-न्न शोभते त्याजय सर्वबन्धम् ॥ २५६ ॥

त्वं निर्घृणः कर्म चमूविनाशे, न मोहबन्धुः परवत् कदाऽपि ।
त्वद्भक्तमच्चित्तविनाशिभूरि-भावारिघाते किमुपेक्षसे तत् ॥ २५७ ॥

सिक्तोऽस्मि सद्दर्शनतस्त्वयाऽहम्, द्रुमो विवेकैरथ पुष्पितोऽस्मि ।
गणाश्रयैः पल्लवितोऽस्मि रागैः, कर्मक्षयात् तत् फलिनं कुरुष्व॥ २५८ ॥

नरेन्द्रदेवेन्द्रविभूतयो या-स्तवांह्रिभक्तेरनुषङ्गलभ्याः ।
न तासु लुब्धं मम चित्तमुच्चै-र्मुख्ये फले धावति मोक्ष एव॥ २५९ ॥

कथं समर्थोऽपि कषायलुप्तं, मां वीक्ष्य चित्ते करुणां न धत्से ।
अमी कषायाः स्फुटपौरुषस्य, हुङ्कारमात्रेण तव म्रियन्ते॥ २६० ॥

किं कृत्रिमोऽस्ति त्वयि मेऽनुरागो, नाहं कृपायास्तव भाजनं यत् ।
निरीक्षितोऽहं कृपया त्वया तु, पिबामि कुम्भोद्भववद् भवाब्धिम्॥ २६१ ॥

कायः प्रणामैकरतस्तवायं, स्तोत्री गुणानां तव भारती मे ।
त्वय्येव लीनं हृदयं सदेति, स्वकिङ्करे किं कुरुषे न तोषम्॥ २६२ ॥

माता पिता त्वं मम नायकश्चा-नौपाधिकस्त्वं जिन ! बान्धवो मे ।
फलं ततो भक्त्युचितं प्रदेहि, किमालजालैर्मम विप्रलापैः॥ २६३ ॥

इत्येवं विमलः स्तुत्वा, जिनं यावन्महाशयः ।
पञ्चाङ्गप्रणतिं चक्रे, ब्रह्माद्वैतानुभूतिभाग् ॥ २६४ ॥

तावत् प्रादुरभूद् रत्नचूडः खेचरसंयुतः ।
स्तवनं वीतरागस्य, कृतं साध्वीति कीर्तयन् ॥ २६५ ॥

धन्यस्त्वं कृतपुण्यस्त्वं, भक्तिर्यस्येदृशी जिने ।
भवात् त्वं मुक्त एवासि, निर्लेपः पद्मपत्रवत् ॥ २६६ ॥

अभिनन्द्येति विमलं, जिनं भक्त्याऽभिवन्द्य सः ।
निषण्णो विमलाभ्यर्णे, विधिवच्छुद्धभूतले ॥ २६७ ॥

विधायोचितकर्तव्यं, निषण्णा चूतमञ्जरी ।
विद्याधरनरेन्द्राश्च, निषण्णा नतमौलयः ॥ २६८ ॥

अथ पृष्टसुखोदन्तौ, संलापं तौ प्रचक्रतुः ।
रत्नचूडो जगौ कालविलम्बो यो ममाजनि ॥ २६९ ॥

बुधाचार्यश्च नानीतो, यत् तत्र शृणु कारणम् ।
इतो गतोऽहं वैताढ्ये, दृष्टा माता शुचाऽर्दिता ॥ २७० ॥

पिता च मद्वियोगार्त्तो, मया संधीरितौ च तौ ।
गते दिने प्रमोदाढ्ये, शय्यायां निश्यहं स्थितः ॥ २७१ ॥

ध्यायतः परमात्मानं, क्षीणकर्मसमुच्चयम् ।
आगता द्रव्यतो निद्रा, भावतो जागरस्य मे ॥ २७२ ॥

उत्तिष्ठ कृतपुण्येति, गिरं शृण्वन्नहं ततः ।
विबुद्धः पुरतोऽद्राक्षं, देवता भास्वरत्विषः ॥ २७३ ॥

ताः प्राहुः पूजनीयोऽसि, जैने धर्मे स्थिरोऽसि यत् ।
रोहिण्याद्या वयं विद्याः, पुण्याकृष्टास्तवागताः ॥ २७४ ॥

सर्वाः पञ्चनमस्कारमन्त्रमाहात्म्ययन्त्रिताः ।
प्रवेशं ते करिष्यामः, शरीरे पुण्यपावने ॥ २७५ ॥

भाव्यं चास्मत्प्रवेशेन, भवता चक्रवर्तिना ।
विद्याधरबलं चेदं, द्वारि तिष्ठति भृत्यवत् ॥ २७६ ॥

ततः प्रविश्य प्रणतं, तत् प्रातस्तूर्यनिस्वनैः ।
सह वैतालिकानां च, प्रसृता मधुरा गिरः ॥ २७७ ॥

तदाऽचिन्ति मया नूनमिदं धर्मस्य पाटवम् ।
अतर्कितोपनम्रा यद् विद्याः सिद्धा ममाखिलाः ॥ २७८ ॥

हर्षस्थानं न चेदं मे, यद् विघ्नोऽयमुपस्थितः ।
विमलेन समं दीक्षाग्रहणं न भविष्यति ॥ २७९ ॥

उक्तो हेममयो बन्धः पुण्यं पुण्यानुबन्ध्यपि ।
विद्याभृच्चक्रवर्तित्वमुक्तं मे चन्दनेन च ॥ २८० ॥

तन्मे का गतिरित्येवं, भृशं भावयतस्तनौ ।
विद्याः प्रविष्टा राज्ये चाभिषिक्तोऽहं नभश्चरैः ॥ २८१ ॥

नवराज्योचितं कृत्यं, कुर्वतो मे कियत्स्वपि ।
ततो दिनेष्वतीतेषु, त्वदादेशो हृदि स्मृतः ॥ २८२ ॥

चिन्तितं च मया सूरिर्न बुधाख्यो गवेषितः ।
नानीतो विमलाभ्यर्णं, प्रमत्तत्वमहो मम ॥ २८३ ॥

भ्रान्तो भूमण्डलं भूरि, ततोऽहं तं गवेषयन् ।
दृष्टश्चैकत्र नगरे, त्वद्वार्ता च निवेदिता ॥ २८४ ॥

तेनोक्तं भद्र ! गच्छ त्वं, वदेदं विमलाय च ।
पश्चादेष्याम्यहमयं, हेतुस्तद्बन्धुबोधने ॥ २८५ ॥

प्रच्छन्नो रत्नचूडेन, विमलायोदितस्ततः ।
बुधाचार्यस्य सन्देशः, स तु नाकर्णितो मया ॥ २८६ ॥

रत्नचूडो जगावेवं, विलम्बोऽभून्ममाधुना ।
नानीतो बुधसूरिश्च, विमलः प्राह शोभनम् ॥ २८७ ॥

ततः प्रविष्टाः सर्वेऽपि, नगरे मोदपूरिताः ।
स्वस्थानं रत्नचूडोऽगात्, स्थित्वा द्वित्रांश्च वासरान् ॥ २८८ ॥

विमलस्तत आरभ्य, मुक्तेरासन्नभावतः ।
तानवात् कर्मजालस्य, सद्भावाभ्यासपाटवात् ॥ २८९ ॥

प्राबल्याज्जीववीर्यस्य, ज्ञानशुद्धेः शमोदयात् ।
राज्यश्रियं नाद्रियते, वपुर्भूषां करोति न ॥ २९० ॥

बन्धुरग्रामधर्मस्य, न च गन्धमपीच्छति ।
कालं नयति सद्ध्यानाद् विरक्तो भवचारकात् ॥ २९१ ॥

तं तथाविधमालोक्य, पित्रोश्चिन्तोदपद्यत ।
यदयं यौवनस्थोऽपि, विषयेषु न लीयते ॥ २९२ ॥

तदेतदस्य चरितं, लोकातीतं विजृम्भते ।
मुनिवद् वर्तमानेऽस्मिन्, राज्यं निष्फलमावयोः ॥ २९३ ॥

विषयेषु कुमारोऽयं, तत् प्रवर्तिष्यते कथम् ।
स्वयमभ्यर्थनीयोऽयं, दाक्षिण्यान्मन्यते यथा ॥ २९४ ॥

इति सिद्धान्तयित्वा तौ, गतौ विमलसन्निधौ ।
ऊचतुश्च सुतासि त्वं, राज्यधूर्धरणक्षमः ॥ २९५ ॥

कृतार्थयसि तारुण्यं, किं न तद्दारसंग्रहैः ।
भुङ्क्षे भोगान् न किं किंवा, न वर्द्धयसि सन्ततिम् ॥ २९६ ॥

व्यचिन्ति विमलेनेदं, सूक्तमाभ्यां किलानयोः ।
उपायः प्रतिबोधस्य, भविष्यत्ययमेव हि ॥ २९७ ॥

ततो बभाषे विमलः, प्रमाणं पितृगीर्मम ।
किन्त्वेष मदभिप्रायः, पितृभ्यामवधार्यताम् ॥ २९८ ॥

सुखं संपाद्य सर्वेषां, हत्वा दुःखं च दुःखिनाम् ।
सुन्दरं यत् स्वयं राज्यप्रभुत्वमनुभूयते ॥ २९९ ॥

निराकुलः सुखं भुङ्क्ते, यस्तु लोकेषु दुःखिषु ।
प्रभुता तस्य का नाम, स हि कुक्षिम्भरिर्मतः ॥ ३०० ॥

दाहदीक्षागुरौ भीष्मे, तद् ग्रीष्मसमयेऽधुना ।
कुर्वन् ताताम्बयोराज्ञां, बन्धुवर्गेण संयुतः ॥ ३०१ ॥

समित्रः सदनारामे, मनोनन्दननामके ।
करोम्यहं राजलीलां, विलासै रुचितोचितैः ॥ ३०२ ॥

नियुज्यन्तां च पुरुषा, दुःखितानां गवेषकाः ।
समाहूय मया सार्धं, तेषां शर्मानुभाव्यताम् ॥ ३०३ ॥

इमां पुत्रगिरं श्रुत्वा, मुदितौ पितरौ हृदि ।
ऊचतुश्च त्वया वत्स, साधूक्तं गुरुवत्सल ! ॥ ३०४ ॥

राजाऽथाकारयत् सज्जं, छन्नं शीतगृहं घनैः ।
दलैरुपवनेऽब्जिन्या, हतघर्मदलैरिव ॥ ३०५ ॥

अभितः कदलीक्लृप्तशैत्यलीलोरुविभ्रमम् ।
वेष्टितं गृहनद्योघैरब्धिस्थद्वीपसन्निभम् ॥ ३०६ ॥

लिप्तं चन्दनकर्पूरक्षोदैर्मोदैरिवाहृतैः ।
हृतघर्मयशोवल्लिमृणालोशिरराजितम् ॥ ३०७ ॥

कृतानि तत्र शिशिरैः, शयनीयानि पल्लवैः ।
मृदूनि सुखदान्युच्चैः कल्पितान्यासनानि च ॥ ३०८ ॥

कुमारो विमलस्तत्र, सह लोकैः प्रवेशितः ।
स्थितोऽसौ तत्र लिप्ताङ्गः, सरसैश्चन्दनद्रवैः ॥ ३०९ ॥

पाटलादामकलितो, गुण्डितश्चन्द्ररेणुना ।
मुक्तादामाभिरामश्रीर्मल्लिकापुष्पराजितः ॥ ३१० ॥

वीज्यमानस्तालवृन्तैः, सूक्ष्मकोमलवस्त्रभृत् ।
हारविभ्राजितश्चारुताम्बूलारुणिताधरः ॥ ३११ ॥

मोदितः काकलीगीतैः, स्फीतैर्नृत्यैस्ततोत्सवः ।
ललनाविभ्रमोद्वेलरतिसागरमध्यगः ॥ ३१२ ॥

प्रमोदमर्पयन् पित्रोर्बन्धून् सिञ्चन्निवामृतैः ।
नेत्रयोर्जनयन् सर्वलोकानां कौमुदीमुदम् ॥ ३१३ ॥

नियुक्तपुरुषा दुःखदौर्गत्योपहतान् जनान् ।
प्रवेशयन्ति तत्रोच्चैस्तेषां दुःखं प्रणुद्यते ॥ ३१४ ॥

इत्थं राज्ञि समाजे च, स्थिते संमदमेदुरे ।
केचिन्नियुक्तपुरुषाः, प्रविष्टाः शीतमन्दिरे ॥ ३१५ ॥

नरं संस्थाप्य तैरेका, दत्ता जवनिकाऽन्तरा ।
व्यजिज्ञपंस्ते नत्वैवं, देवादेशवशंवदैः ॥ ३१६ ॥

विचरद्भिर्महादुःखी, दृष्टोऽस्माभिरयं नरः ।
अत्रानीतोऽतिबीभत्स, इति च स्थापितोऽन्तरे ॥ ३१७ ॥

तच्छ्रुत्वा धवलोर्वीशः, प्राह युष्माभिरीक्षितः ।
क्वायं कथं महादुःखी, तेष्वेकः प्राह चारुगीः ॥ ३१८ ॥

देवादेशाद् वयमितो, गता दुःखिदिदृक्षवः ।
नगरं सततानन्दं, दृष्ट्वा प्राप्ता महाटवीम् ॥ ३१९ ॥

दूरात् तत्र नरो दृष्टो, मध्याह्नार्ककराग्निना ।
भूतले तप्तलोहाभे, पादत्राणोज्झितो व्रजन् ॥ ३२० ॥

दूरादुच्चैरभिहितस्तिष्ठ भद्रेति तिष्ठत ।
यूयं स्थितोऽहमित्युक्त्वा, गन्तुं प्रववृते च सः ॥ ३२१ ॥

आनीतस्तरुमूलेऽसौ, बलाद् गत्वा मया ततः ।
दवदग्ध इव स्थाणुर्दृष्टः सर्वैः कृशोऽसितः ॥ ३२२ ॥

क्षुधितस्तापवान् खिन्नः, पिपासाशोषिताधरः ।
क्षरत्स्वेदो गलत्कुष्ठलुलत्कृमिकुलाकुलः ॥ ३२३ ॥

शूलभृन्मुखभङ्गेन, दीर्घश्वासाज्ज्वरार्दितः ।
भग्ननेत्रो जराजीर्णः, शीर्णनासाकरक्रमः ॥ ३२४ ॥

चीवरैर्जीर्णमलिनैरलाबुयुगलेन च ।
कम्बलेन सदण्डेन, युतो दारिद्र्यभाजनम् ॥ ३२५ ॥

साक्षाद् ज्ञातोऽयमस्माभिर्नारको भूरिदुःखभूः ।
उक्तश्च भद्र ! मध्याह्ने, बम्भ्रमीषि किमीदृशम् ॥ ३२६ ॥

आश्रित्य शीतलच्छायां, न तिष्ठसि सुखेन किम् ।
प्राहासौ गुरुनिर्देशाद्, भ्रमामि स्ववशोऽस्मि न ॥ ३२७ ॥

तदा चिन्तितमस्माभिरहो कष्टं महत्तरम् ।
इमां दशां गतस्यापि, पराधीनत्वमस्य यत् ॥ ३२८ ॥

ततोऽभिहितमस्माभिर्गुरुः किं ते करिष्यति ।
प्राहासावृणिकाः सन्ति, ममाष्टौ यमसन्निभाः ॥ ३२९ ॥

ग्रन्थदानेन तेभ्यो मां, गुरुर्मे मोचयिष्यति ।
विचिन्तितं तदाऽस्माभिरिदं कष्टं महत्तमम् ॥ ३३० ॥

यदीदृशदशस्यापि, दानिग्रहकदर्थना ।
तन्मोचनदुराशा चेत्यतो दुःखी परोऽस्तु कः ॥ ३३१ ॥

भाषितं च ततोऽस्माभिरेहि राजकुलेऽनघ ! ।
क्षणमोक्षो यथा ते स्याद्, दारिद्र्यं च विलीयते ॥ ३३२ ॥

प्राहासौ भवतां भद्राः !, कृतं मच्चिन्तयाऽनया ।
कदापि नैव मुच्येऽहं, मोचितो हि भवादृशैः ॥ ३३३ ॥

इत्युक्त्वाऽसौ द्रुतं गच्छन्नीतोऽस्माभिर्बलादिह ।
सोन्मादोऽयमिति ज्ञात्वा, राजशासनकारिभिः ॥ ३३४ ॥

ततो बभाषे धवलः, क्षितीशो मेऽतिकौतुकम् ।
पश्याम्येनं जवनिकां, तद् दूरीकुरुत द्रुतम् ॥ ३३५ ॥

ततो जवनिकां ते द्रागपनिन्युर्निरीक्ष्य तम् ।
यथोक्तरूपं नृपतिः, ससमाजो विसिस्मि(ष्मि)ये ॥ ३३६ ॥

विमलस्तु सुधीर्दध्यौ, बुधाचार्यः स एष हि ।
अहो भगवतो लब्धिः, करुणाऽहो ममोपरि ॥ ३३७ ॥

अहो स्वसुखवैमुख्यमहो अन्यार्थनिष्ठता ।
अहो सौजन्यसारत्वमहो निर्व्याजबन्धुता ॥ ३३८ ॥

आह्लादाय यथा चन्द्रो, जीविताय यथाऽमृतम् ।
तथा लोके स्वभावेन, परार्थः साधुसंगमः ॥ ३३९ ॥

तदेष वैक्रियं रूपं, विधाय भगवानयम् ।
इहायातो महाभागो, बन्धून् बोधयितुं मम ॥ ३४० ॥

अयं संदिष्टवान् रत्नचूडद्वारा हि मे पुरा ।
भिन्नरूपोऽहमेष्यामि, व्यक्तं वन्द्यस्त्वया च न ॥ ३४१ ॥

दुःखितान्वेषणं कार्यं, केवलं स्वार्थसिद्धये ।
इति संस्मृत्य विमलो, हृदा तस्मै नमोऽकरोत् ॥ ३४२ ॥

दत्तस्तेनापि मनसा, धर्मलाभः सुखावहः ।
अन्तःशीतगृहं सोऽथ, राजभृत्यैः प्रवेशितः ॥ ३४३ ॥

द्राट्कृत्य स निषण्णोऽथ, भूतले खेदनिःसहः ।
गलावलम्बितश्वासः प्रवृत्तः प्रचलायितुम् ॥ ३४४ ॥

हसन्ति तादृशं प्रेक्ष्य, जनाः केचन तं परे ।
शोचन्ति केऽपि निन्दन्ति, केऽप्येवं ब्रुवते मिथः ॥ ३४५ ॥

दुःखी दीनस्तथा श्रान्तस्तृषितश्च बुभुक्षितः ।
आनीतोऽत्रैष किं वेत्ति, न किञ्चित् प्रचलायते ॥ ३४६ ॥

तदाकर्ण्य वचस्तेन, क्रुद्धेन बुधसूरिणा ।
भाषितं भास्वरौ कृत्वा, दीपवन्नेत्रगोलकौ ॥ ३४७ ॥

युष्मत्तोऽपि विरूपोऽहमाः पापा दुःखितोऽथवा ।
मां दुःखितं विरूपं च, यद् दृष्ट्वा हसथाधमाः ! ॥ ३४८ ॥

कृष्णाः क्षुधापिपासार्ताः, कुष्ठिनः खेदविह्वलाः ।
ज्वरशूलजराग्रस्ताः, सोन्मादास्तापपीडिताः ॥ ३४९ ॥

यूयमेव परायत्ता, विकलाक्षा ऋणार्दिताः ।
यूयं च प्रचलायध्वं, नाहं भो बालिशा जनाः ! ॥ ३५० ॥

यूयं प्रविष्टा निःशङ्कं, भोः पापाः कालगह्वरे ।
येऽधुना हसथैवं मां, मुनिमुद्वीक्ष्य दुर्बलम् ॥ ३५१ ॥

दृष्ट्वा तौ भास्कराकारौ, ज्वलन्तावक्षिगोलकौ ।
विद्युदाभां च रसनां, श्रुत्वा च क्षोभिकां गिरम् ॥ ३५२ ॥

हनूमत्कोपनिर्दग्धलङ्कादुर्गस्थरक्षसाम् ।
अवस्थां ययुरास्थानस्थिताः प्रक्षुभिता नराः ॥ ३५३ ॥

बभाषे धवलो राजा, तदेदं विमलं प्रति ।
कुमार ! मर्त्यमात्रोऽयं, नास्ति दुर्लक्षलक्षणः ॥ ३५४ ॥

मलाविलं गलत्कान्ति, प्रागभूदस्य लोचनम् ।
मूषोत्तप्तसुवर्णाभमधुना तु विजृम्भते ॥ ३५५ ॥

राहुग्रस्तेन्दुजातीयं, प्रागभूदस्य लोचनम् ।
देदीप्यतेऽधुना त्वेतत् तेजसा विश्वदाहिना ॥ ३५६ ॥

भारतीं पुष्करावर्तगर्जितप्रतिपन्थिनीम् ।
रणधीरमपि स्वान्तं, श्रुत्वाऽस्य मम कम्पते ॥ ३५७ ॥

तच्छन्नो मुनिवेषेण, देवोऽयं कोऽपि लक्ष्यते ।
क्रुद्धं प्रसादयाम्येनं, यथा भस्मीकरोति न ॥ ३५८ ॥

प्रकृतौ स्थापितः श्रेयानन्तस्तेजोनिधिः खलु ।
कोपितोऽसौ वमत्यग्निं मथितारणिसन्निभः ॥ ३५९ ॥

जगाद विमलः सत्यं, चारु तातेन निश्चितम् ।
भक्तिग्राह्यः प्रसाद्योऽयं, प्रणत्या विषमो भृशम् ॥ ३६० ॥

तच्छ्रुत्वा लोलकोटीरो, विलसत्करकुड्मलः ।
प्रणनाम मुनिं राजा, समाजश्चाखिलस्ततः ॥ ३६१ ॥

जगौ भूपः सहस्वैतज्जनानां बालचापलम् ।
कृत्वा प्रसादं प्रह्वस्य, देहि मे दिव्यदर्शनम् ॥ ३६२ ॥

इति विज्ञप्य तं राजा, यावद् भूयः समीक्षते ।
तावत् स ददृशे दीप्तः, साक्षादिव दिवाकरः ॥ ३६३ ॥

निविष्टः स्वर्णकमले, विनिद्रकमलेक्षणः ।
वदनेनोल्लसद्भासा, पूर्णिमेन्दुं विडम्बयन् ॥ ३६४ ॥

वीक्ष्य तं तादृशं सर्वे, विस्मिता सनृपा जनाः ।
परस्परमभाषन्त, भृशमुत्फुल्ललोचनाः ॥ ३६५ ॥

निस्तेजाः प्रागभूदेष, साम्प्रतं महसां निधिः ।
जगच्चमत्कारकरी, दैवीयं कामरूपता ॥ ३६६ ॥

पप्रच्छाथ नृपो भालविन्यस्तकरकुड्मलः ।
कोऽसि त्वं भगवन् ! ब्रूहि, देवो वा दानवोऽथवा ॥ ३६७ ॥

मुनिः प्राह न देवोऽहं, नापि पार्थिव ! दानवः ।
यतिरस्मि यतित्वं हि, लिङ्गेनैवावगम्यते ॥ ३६८ ॥

भूमीन्द्रः प्राह यद्येवं, त्वया किमिति तत्कृतम् ।
इदानीमीदृशं रूपं, पूर्वं बीभत्सदर्शनम् ॥ ३६९ ॥

स्वदेहवर्तिनो दोषा, भवता केन हेतुना ।
प्रदर्शिताः कथं चाभूः क्षणाद् दिव्याकृतिः पुनः ॥ ३७० ॥

मुनिराह महाराज ! मया पूर्वं प्रदर्शितम् ।
बीभत्सरूपं जीवानां, बोधाय भववर्तिनाम् ॥ ३७१ ॥

सर्वेऽपि तादृशा जीवा:, संसारोदरवर्तिन: ।
स्वस्वरूपं न जानन्ति, तथाऽपि हतबुद्धय: ॥ ३७२ ॥

अतस्तत्प्रतिबोधाय, तादृग् रूपं मया कृतम् ।
मुनिवेषधरं यच्च, कृतं तत्कारणं शृणु ॥ ३७३ ॥

मुनयो धुतपापा ये, ते कृष्णास्तृट्क्षुधार्दिता: ।
कुष्ठिनोऽपि बहिर्ज्ञेयास्तत्त्वतो भूप ! सुन्दरा: ॥ ३७४ ॥

ये तु सद्धर्मविमुखा, गृहस्था भोगगृध्नव: ।
सुखिनोऽपि हि ते ज्ञेया, दु:खिनो रोगपीडिता: ॥ ३७५ ॥

गृहिणां कृष्णवर्णाद्या, दोषा: सन्ति यथाऽखिला: ।
साधूनां च सन्त्येते, तथा ते कीर्तयाम्यहम् ॥ ३७६ ॥

उत्तप्तस्वर्णवर्णोऽपि, बहिर्बुद्धिधनैर्जन: ।
पातकध्वान्तलिप्तोऽन्त:, कृष्णवर्णो निगद्यते ॥ ३७७ ॥

बहिरञ्जनवर्णोऽपि स्वान्ते स्फटिकनिर्मल: ।
न कृष्ण: प्रोच्यते प्राज्ञैर्गौर एवाभिधीयते ॥ ३७८ ॥

साधुस्तत् कृष्णवर्णोऽपि, गौराङ्गो धर्मबद्धधी: ।
गृहस्थ: स्वर्णवर्णोऽपि, कृष्ण: पापपरायण: ॥ ३७९ ॥

इममर्थमभिप्रेत्य, मयोक्तं शत्रुशातन ! ।
मूढा ! न कृष्णवर्णोऽहं, यूयमेव तथाविधा: ॥ ३८० ॥

सा बुभुक्षा न विषयैस्तृप्तिर्याऽधिगतैरपि ।
तया बुभुक्षिता: सर्वे, भवचक्रनिवासिन: ॥ ३८१ ॥

ते हि यद्यपि दृश्यन्ते, तृप्तिभाजो भृतोदरा: ।
ज्ञेयास्तथाऽपि तुच्छाशा, बुभुक्षाक्षामकुक्षय: ॥ ३८२ ॥

साधवस्तु सदा तृप्ता:, प्रशमोद्गारमोदिता: ।
रिक्तोदरा अपि ज्ञेया, मुक्ता भावबुभुक्षया ॥ ३८३ ॥

धृत्वा हेतुमिमं चित्ते बुभुक्षापीडिता मया ।
प्रोक्ताः, सर्वे जना राजंस्तृप्तश्चात्मा प्रकाशितः ॥ ३८४ ॥

पिपासाऽनागतेष्विच्छा, भोगेषु नरनायक ! ।
स्तम्भनी ज्ञानजिह्वायाः, शमकण्ठस्य शोषणी ॥ ३८५ ॥

पिबन्तोऽप्युदकं स्वादु, तया सर्वे पिपासिताः ।
जैनधर्मबहिर्भूता, जना भवविवर्तिनः ॥ ३८६ ॥

मुनयो भाविभोगेषु, निष्पिपासाः सदैव हि ।
तेनोक्तं निष्पिपासोऽहं, यूयं सर्वे तृषाऽर्दिताः ॥ ३८७ ॥

कुष्ठं मिथ्यात्वमुर्वीश ! कुतर्ककृमिजन्मभूः ।
गलदास्तिक्यजम्बालमबालमतयो विदुः ॥ ३८८ ॥

मार्गानुसारिणीं बुद्धिं, नासिकां नाशयत्यदः ।
कुरुते घर्घराव्यक्तघोषं जात्यादिमानतः ॥ ३८९ ॥

शमसंवेगनिर्वेदकारुण्यानि च देहिनाम् ।
हस्तपादसमान्येतच्छाटयत्यनिवारितम् ॥ ३९० ॥

जैनो धर्मो न यैः स्पृष्टो, भावतस्ते हि जन्तवः ।
सर्वे मिथ्यात्वकुष्ठेन, नष्टाङ्गास्तेन सर्वथा ॥ ३९१ ॥

दृश्यन्ते मन्मथाकारास्ते यद्यपि बहिर्दृशा ।
क्षताङ्गाः कृमिजालेन, तथाऽपि परमार्थतः ॥ ३९२ ॥

कुष्ठमेतन्मुनीनां तु, नास्ति सर्वाङ्गसुन्दराः ।
तेन ते कर्मदोषेण, बहिःकुष्ठान्विता अपि ॥ ३९३ ॥

प्रोक्तं मयेदमालोच्य, यूयं भोः कुष्ठिनो जनाः ।
सम्यक्त्वेन गरिष्ठात्मा, नाहं कुष्ठी कदाचन ॥ ३९४ ॥

दुःखधूलिभृतो दीर्घो, विषमो दोषतस्करैः ।
करालविषयव्यालो, विच्छिन्नप्रशमोदकः ॥ ३९५ ॥

ज्ञानच्छायोज्झितो व्यासः, कामैः कण्टकसन्निभैः ।
क्रोधभूधरभूमग्नपान्थपुण्यपराक्रमः ॥ ३९६ ॥

खेदहेतुर्जिनैर्दृष्टो, भवोऽध्वा भावचक्षुषा ।
वहन्त्यत्र सदा जीवा गृहीत्वा कर्मशम्बलम् ॥ ३९७ ॥

कदाऽपि धर्मरहिता, न कुर्वन्त्युत्प्रयाणकम् ।
तेन संसारिणो जीवा, विज्ञेया खेदविह्वलाः ॥ ३९८ ॥

दृश्यन्ते शीतलच्छायाश्रिता यद्यपि गेहिनः ।
तथाऽपि तत्त्वतो ज्ञेया, धावन्तस्ते भवाध्वनि ॥ ३९९ ॥

मुनयस्तु विवेकाद्रौ, सर्वदा जैनसत्पुरे ।
स्थिताश्चित्तसमाधानमण्डपे चन्द्रशीतले ॥ ४०० ॥

निर्वृतास्ते महात्मानो, बहिः खेदं गता अपि ।
तत्त्वतः खेदनिर्मुक्ता, ज्ञेयाः क्षितिपुरन्दर ! ॥ ४०१ ॥

निदानमिदमाशय्य, मया पूर्वं निवेदितम् ।
अहं न खेदनिहतो, भवन्तः खेदविह्वलाः ॥ ४०२ ॥

तृष्णाविवर्धको रागो, नाश्यो वैराग्यलङ्घनैः ।
कर्माजीर्णसमुत्थश्च, प्रोक्तो भावज्वरो बुधैः ॥ ४०३ ॥

तेन संसारिणः सर्वे, ज्वरग्रस्ता नराधिप ! ।
मुनीनां तु न गन्धोऽपि रागस्य हृदि विद्यते ॥ ४०४ ॥

असातवेद्योदयतो, जातु जातज्वरा अपि ।
तेन ते विज्वरा ज्ञेया, ज्वरमूलप्रमाथिनः ॥ ४०५ ॥

ईर्ष्या भूप ! महाशूलं, मुदितामुखभङ्गकृत् ।
विवेकहृदयोन्माथि, दयाश्वासनिरोधकम् ॥ ४०६ ॥

क्षमन्ते न परोल्लासमीर्ष्याशूलहता जनाः ।
तत् कुर्वन्ति परद्रोहाद् वक्त्रभङ्गं मुहुर्मुहुः ॥ ४०७ ॥

तच्छूलं भवमूढानामस्ति न व्रतिनां पुनः ।
विनिवृत्ताः परद्रोहात् ते हि सर्वहितावहाः ॥ ४०८ ॥

एकाकारा सदा भूप ! जन्तवो भववर्तिनः ।
अनन्तदुःखदौर्गत्यवलीपलितपूरिताः ॥ ४०९ ॥

मुखरन्ध्रगलल्लालाहालाहलमृषोदितैः ।
आशायष्टिमवष्टभ्य, गच्छन्तोऽपि स्खलत्क्रमाः ॥ ४१० ॥

गलत्सत्तर्करदना, निष्ठीवन्तः पदे पदे ।
कर्मोदयकृतक्षोभलोभश्लेष्माभिपीडिताः ॥ ४११ ॥

जराजर्जरिता दीना, अनुकम्प्या महात्मनाम् ।
विवेकयौवनं प्राप्तं, दीक्षाभोगोचितं न तैः ॥ ४१२ ॥

अविद्याजन्म तैर्मूढैर्जरसैवातिलङ्घितम् ।
न विद्याजन्म ते प्राप्ता, न मृता भावमृत्युना ॥ ४१३ ॥

मुनिभिस्तु महाराज ! लब्धं विद्याऽभिधं जनुः ।
प्राप्तं विवेकतारुण्यं, बाल्यं नैवान्वभूयत ॥ ४१४ ॥

अप्राप्य तरुणाः सन्तो, जरां संसारदीर्घताम् ।
तथैव ते मरिष्यन्ति, नोत्पत्स्यन्ते यथा पुनः ॥ ४१५ ॥

ज्वरशूलजराग्रस्ता, यूयं प्रोक्तास्ततो मया ।
ज्वरशूलजराहीनः, स्वस्थ चात्मा प्रकाशितः ॥ ४१६ ॥

कुर्वन्ति सदनुष्ठानं, न बुधैः प्रेरिता अपि ।
वारिता अपि कुर्वन्ति, पापानुष्ठानमादृताः ॥ ४१७ ॥

मूर्ध्नि मोहरजः क्षिप्त्वा, प्रलपन्ति यथा तथा ।
परिधानं त्रपां मुक्त्वा, कामनृत्यं वितन्वते ॥ ४१८ ॥

गले वल्गन्ति पूतानां, तृष्णाविड्लिप्तपाणयः ।
प्रवदन्तु तथा धर्मं, यथा भोगान् लभामहे ॥ ४१९ ॥

इत्थं विचेष्टमाना हि, सर्वे संसारवर्तिनः ।
सोन्मादा नायमुन्मादः साधूनां भूप ! विद्यते ॥ ४२० ॥

इदं कारणमाश्रित्य, मया पूर्वं निवेदितम् ।
सोन्मादा भो जना ! यूयं, नाहमुन्मादबाधितः ॥ ४२१ ॥

कषायाख्यः सदा तापो, घोरः संसारवर्तिनाम् ।
धृतिहन्ता च्युतशमस्वेदक्लेदभयङ्करः ॥ ४२२ ॥

दंदह्यन्ते हि ते तेन, लिप्ताङ्गाश्चन्दनैरपि ।
साधवस्तु सदा शान्ता, निस्तापास्तापसूदनाः ॥ ४२३ ॥

बाह्यस्तापोऽपि नो तेषां, शमिनामुपतापकृत् ।
तत् तापपीडिता यूयं, प्रोक्ता नाहं तु तादृशः ॥ ४२४ ॥

इदं पुत्रकलत्रादि, निर्मितं भिन्नकर्मभिः ।
कुटुम्बमेकवृक्षस्य, पक्षिसंघातसन्निभम् ॥ ४२५ ॥

निःस्नेहं चञ्चलं तुच्छं, तथाऽपि हृदयप्रियम् ।
अज्ञातपरमार्थानां, बालानां प्रतिभासते ॥ ४२६ ॥

क्लिश्यन्ते च तदर्थन्ते, स्वयं कर्मकरा इव ।
धनार्जनाय धावन्ति, मोहेनान्धा दिवानिशम् ॥ ४२७ ॥

विनिद्राः शेरते रात्रौ, भुञ्जतेऽपि सुखेन न ।
भ्रमन्ति पशुवच्छून्याः, पूरिता भूरिचिन्तया ॥ ४२८ ॥

परायत्ताः कुटुम्बस्य, तत्त्वार्थं ते न जानते ।
यत् कुटुम्बार्थपापस्य, भोक्ष्येऽहं फलमेककः ॥ ४२९ ॥

मातापित्रादिसम्बन्धो, मृगतृष्णोपमोऽखिलः ।
सन्तोषामृतसौख्यं कस्तात्त्विकं तेन हारयेत् ॥ ४३० ॥

कुटुम्बपञ्जरं त्यक्त्वा, ये त्वेवं भावनाभृतः ।
निष्क्रान्ता न परायत्तास्ते स्वाधीनसुखाब्धयः ॥ ४३१ ॥

गृहपाशविमुक्तानां, तेषां या गुर्वधीनता ।
सा ग्रीवाभरणं नैव, रज्जुराकषर्णी भवे ॥ ४३२ ॥

यूयमुक्ताः परायत्ताः, संचिन्त्येदं स्वमानसे ।
स्वाधीनत्वं मया स्वस्य, वचोऽध्वपथिकीकृतम् ॥ ४३३ ॥

पश्यन्ति नान्तः कामान्धाः, पश्यन्तोऽपि बहिर्दृशा ।
विकलाक्षास्ततस्ते स्युः, साधवस्तु न तादृशाः ॥ ४३४ ॥

सज्जाक्षा, एव तद् ज्ञेया, नष्टबाह्यदृशोऽपि ते ।
विकलाक्षा मयेत्येते, प्रोक्ता नाहं तु तादृशः ॥ ४३५ ॥

ये चाष्टावृणिकाः प्रोक्ताः, कर्माण्यष्ट प्रतीहि तान् ।
दानग्रहणिकैर्लोकाः, कदर्थ्यन्ते हि तैर्भृशम् ॥ ४३६ ॥

धार्यन्ते क्षुधिताः क्वापि, तिर्यग्भवचतुष्पथे ।
क्षिप्त्वा नरककारायां, पीड्यन्ते निष्कृपैः क्वचित् ॥ ४३७ ॥

चिन्तापङ्के विलोठ्यन्ते, क्वचिदाहत्य पार्ष्णिना ।
पुण्याख्यो ह्रियते गेहोपस्करः क्वापि दुर्गतौ ॥ ४३८ ॥

साधूनां ते न बाधायै, शुद्धप्रायमृणं हि तैः ।
ग्रन्थेन गुरुदत्तेन, शोधयन्ति च ते सदा ॥ ४३९ ॥

ऋणार्दितास्ततः प्रोक्ता, यूयं नाहं तु तादृशः ।
ऋणिका बाधका नैव, ऋणं शोधयतो हि मे ॥ ४४० ॥

क्रूरं कर्म भवो घोरो, रौद्रं रागादिमण्डलम् ।
जीवितं दृष्टनष्टं च, चलाः सर्वविभूतयः ॥ ४४१ ॥

प्रमादो देहिनां शत्रुर्देहोऽयं क्षणभङ्गुरः ।
जरामृत्यू करगतौ, भोगाः पर्यन्तदारुणाः ॥ ४४२ ॥

इत्यादिकमनालोच्य, कामभोगाशयौ क्रमौ ।
प्रसार्य ज्ञानतत्पात्रसङ्गनेत्रे निमील्य च ॥ ४४३ ॥

अविद्याशयने सर्वे, स्वपन्ति भवजन्तवः ।
महाघुरघुरारावं, कुर्वन्तः क्रोधचेष्टितैः ॥ ४४४ ॥

शब्दैरपि न बुध्यन्ते, प्रदीर्घैस्ते विवेकिनाम् ।
बोधिता अति कृच्छ्रेण, घूर्णन्ते मोहनिद्रया ॥ ४४५ ॥

वल्गन्तोऽपि ततो ज्ञेया, गृहिणः प्रचलायिताः ।
मुनयस्तां विना निद्रां, सुप्ता अपि हि जाग्रति ॥ ४४६ ॥

स्वस्यान्येषां च पश्यन्ति, ते हि गत्यागती श्रुतैः ।
तद् यूयं प्रचलायध्वे, नाहमित्यास्थितं मया ॥ ४४७ ॥

दरिद्रा भूपते ! ज्ञेया, ये सद्धर्मविवर्जिताः ।
परप्रार्थनया बाढं, दीना विषयभिक्षवः ॥ ४४८ ॥

येषां तु भावरत्नानि, चित्तापवरके सदा ।
देदीप्यन्ते मुनिजनाः, स्वाधीना धनिनो हि ते ॥ ४४९ ॥

ते स्वयं भुञ्जते वित्तं, जगत् पुष्णन्ति तेन च ।
अलाबुहस्ता अपि ते, विज्ञेयाः परमेश्वराः ॥ ४५० ॥

अनादिनिधनज्ञानधनोऽहं तद् भवादृशैः ।
स्वं दारिद्र्यमनालोच्य, दरिद्रो भावितः कथम् ॥ ४५१ ॥

मलिनोऽपि स विज्ञेयो, यः कर्ममलभारितः ।
मुद्रिताशुचिकुम्भाभः, क्षालितोऽपि बहिर्भृशम् ॥ ४५२ ॥

हारतारकनाथांशुक्षीरनिर्मलमानसः ।
निर्मलस्तत्त्वतो ज्ञेयो, बहिर्मलधरोऽपि हि ॥ ४५३ ॥

भावमालिन्यमध्यात्वा, तदिदं स्वहृदि स्थितम् ।
हसितोऽहं जनैः केन, हेतुना मलभागिति ॥ ४५४ ॥

सुरासुरनरैः पूज्यो, धर्मी सौभाग्यवान् मुनिः ।
वदन्त्यधर्मभूयिष्ठं, दुर्भगं भावतो नरम् ॥ ४५५ ॥

कृष्णपाक्षिकमूर्द्धन्यं, यं निन्दन्ति विवेकिनः ।
स दौर्भाग्यकरः प्राणी, तं स्तुवन्ति नराधमाः ॥ ४५६ ॥

शीलसौभाग्यपूर्णोऽपि, मुनिवेषेण धार्मिकः ।
केनाहं हेतुना लोकैर्निन्दितो दुर्भगाग्रिमैः ॥ ४५७ ॥

उक्तदोषान्विता लोका, राज्यभाजोऽपि दुःखिनः ।
अनाख्येयरसोल्लसनिमीलितदृशोऽपि हि ॥ ४५८ ॥

व्याघ्रवक्त्रे प्रविष्टस्य, कराले तीक्ष्णदंष्ट्रया ।
मृगस्य यत् सुखं भूप तत् सुखं भववर्तिनाम् ॥ ४५९ ॥

यथा शोफस्य पुष्टत्वं, यथा वा वध्यमण्डनम् ।
सुखाभिमानजनितो, विलासो देहिनां तथा ॥ ४६० ॥

अशक्नुवन्तो निर्गन्तुं, दुःखाशनिहता अपि ।
गृहिणो धर्मरहिता भूपते ! नारकोपमाः ॥ ४६१ ॥

सत्साधूनां तु नास्त्येव, क्षुद्रोपद्रवसंभवः ।
नष्टं मोहतमस्तेषां, ज्ञानोद्योतो व्यजृम्भत ॥ ४६२ ॥

शमामृतं परिणतं, त्रुटिता भववल्लरी ।
धर्ममेघसमाधिश्च, स्थिरीभूतो महोदयः ॥ ४६३ ॥

सन्तोषदा धृतिः पत्नी, श्रद्धा चित्तप्रसादकृत् ।
सुखासिकाऽऽह्लादकरी, हिता विविदिषा सदा ॥ ४६४ ॥

विज्ञप्तिः पाटवाधात्री, मेधा सद्बोधकारिणी ।
नैश्चिन्त्यकृदनुप्रेक्षा, मैत्री चित्तानुवर्तिनी ॥ ४६५ ॥

करुणा वत्सलाऽऽकालं, मुदिताऽन्तःप्रसादकृत् ।
उपेक्षोद्वेगहन्त्री चेत्येष तेषां प्रियागणः ॥ ४६६ ॥

इमाभिरनुरक्ताभिर्मोदमाना मुनीश्वराः ।
तिष्ठन्ति मग्ना संसारातीतशर्ममहोदधौ ॥ ४६७ ॥

देहादपि स्वमात्मानं, तिष्ठन्ति प्रविविच्य ये ।
तेषां सुखं विजानातु, कः परोऽनुभवं विना ॥ ४६८ ॥

कुमारी न यथा वेत्ति, सुखं दयितभोगजम् ।
न जानाति तथा लोको, योगिनां समतासुखम् ॥ ४६९ ॥

तदेवं सुखपूर्णोऽपि, निन्दितोऽहं मुधा जनैः ।
परमार्थमजानानैः, स्वसुखस्मयनाटितैः ॥ ४७० ॥

नृपतिः प्राह यद्येवं, भोगा दुःखं शमः सुखम् ।
नेदं प्रबुध्यते कस्मात्, तदेष निखिलो जनः ॥ ४७१ ॥

मुनिराह महामोहशैलूषेन विनाटितः ।
जनो न बुध्यते तत्त्वं, यथा स बठरो गुरुः ॥ ४७२ ॥

भूपः प्राह भदन्तासौ, को नाम बठरो गुरुः ।
कथं न बुबुधे तत्त्वं, तन्मे ब्रूहि महामुने ! ॥ ४७३ ॥

मुनिराह महाराज !, सावधानमनाः शृणु ।
अलब्धमूलो विस्तीर्णो, ग्रामोऽस्त्येको मनोहरः ॥ ४७४ ॥

शिवायतनमस्त्येकं, तत्र रत्नौघपूरितम् ।
भृतं मनोज्ञैर्विविधैः, खण्डखाद्यकपानकैः ॥ ४७५ ॥

धनधान्यहिरण्याढ्यं, वरचेलव्रजान्वितम् ।
सम्पूर्णोपस्करं शर्मसामग्रीधाम निर्मलम् ॥ ४७६ ॥

तस्य सारगुरुर्नाम, शैवाचार्योऽस्ति नायकः ।
सकुटुम्बो वसंस्तत्र, स मत्तो वेत्ति नो हितम् ॥ ४७७ ॥

स्वकुटुम्बं न पुष्णाति, भवनर्द्धिं न पश्यति ।
ज्ञातोऽसौ तादृशो धूर्तैश्चौरैस्तद्ग्रामवासिभिः ॥ ४७८ ॥

कृतं तैस्तेन भौतेन, सह सख्यं मनोऽनुगैः ।
ते चौराः प्रतिभासन्ते, प्रियास्तस्य हितावहाः ॥ ४७९ ॥

स्वकुटुम्बं परित्यज्य, तैः सार्धं विलसत्यसौ ।
माहेश्वरा निषेधन्ति, मा कृथाश्चौरसंगमम् ॥ ४८० ॥

न मन्यते स तद्वाचं, ततो मूर्खमवेत्य तम् ।
ते सारगुरुरित्याख्यां, हत्वाऽऽहुर्बठरं गुरुम् ॥ ४८१ ॥

चौरमित्रान्वितं ज्ञात्वा, स्वामिनं बठरं गुरुम् ।
सर्वे माहेश्वरास्तत् ते, विजहुर्देवमन्दिरम् ॥ ४८२ ॥

ततः सप्रसरैश्चौरैर्योगशक्त्याऽस्य वर्धितः ।
उन्मादो बाढमायत्तं, तत् कृतं शिवमन्दिरम् ॥ ४८३ ॥

मध्यापवरके धृत्वाऽभिभूतं तत्कुटुम्बकम् ।
मुद्रितं द्वारमेकोऽत्र, स्थापितस्तस्कराग्रणीः ॥ ४८४ ॥

कृततालारवास्तस्याग्रस्तं नाटयन्त्यथ ।
गायन्ति ध्रुवकोच्चारैर्गीतं ते स्फीतमानसाः ॥ ४८५ ॥

स्वकुटुम्बव्यतिकरं, बठरः स्वां विडम्बनाम् ।
हरणं भवनर्द्धेस्तद्वैरितां च न वेत्ति सः ॥ ४८६ ॥

दिवा रात्रौ च सन्तुष्टश्चौरमध्ये स नृत्यति ।
विपुलास्तत्र च ग्रामे, चत्वारः सन्ति पाटकाः ॥ ४८७ ॥

हीनहीनतरौ द्वौ द्वौ, श्रेष्ठश्रेष्ठतरौ तथा ।
क्षुधितो याचते भिक्षामथासौ बठरो गुरुः ॥ ४८८ ॥

ततस्तैरर्पितं तस्य, तस्करैर्घटकर्परम् ।
भिक्षामटेत्यभिहितो, मषीपुण्ड्रकचर्चितः ॥ ४८९ ॥

भिक्षार्थी तद्युतोऽथागात्, स हीनतरपाटकम् ।
नर्तितोऽनुगृहं तत्र, कृततालारवैश्च तैः ॥ ४९० ॥

तत्संज्ञितैः षिड्गलोकैस्तत्रासौ ताडितो भृशम् ।
यष्टिमुष्टिमहालोष्टुप्रहारैरतिदारुणैः ॥ ४९१ ॥

अनुभूय महादुःखं, निर्गतः पाटकात् ततः ।
भिक्षाविवर्जितो भग्नकर्परस्तस्करैः सह ॥ ४९२ ॥

तैः शरावं ततो दत्तमानीतो हीनपाटके ।
भिक्षां न लेभे तत्रापि, बद्ध्वा षिड्गजनैर्धृतः ॥ ४९३ ॥

ततः शरावके भग्ने, नीतस्तैः श्रेष्ठपाटके ।
दत्त्वा ताम्रमयपात्रं, भिक्षां तत्राश्नुतेऽल्पिकाम् ॥ ४९४ ॥

षिड्गैर्देवगृहस्वामी, तत्रापि स कदर्थ्यते ।
नीतो भग्ने ताम्रपात्रे, स श्रेष्ठतरपाटके ॥ ४९५ ॥

राजतं भाजनं दत्तं, तत्रासौ लभतेऽद्भुताम् ।
भिक्षां सुसंस्कृतां स्वामी, कृतस्तैर्धूर्ततस्करैः ॥ ४९६ ॥

तं भौतं नाटयन्त्येवं, पाटकेषु पुनः पुनः ।
तेषु ते तस्करास्तालारवगानपरायणाः ॥ ४९७ ॥

भिक्षामात्रेण तुष्टात्मा, स तु तां स्वविडम्बनाम् ।
न वेत्ति द्वेष्टि च स्तेनदोषौघकथकं जनम् ॥ ४९८ ॥

राजन् ! प्रदर्शितस्तुभ्यं, स एष बठरो गुरुः ।
येनायं सदृशो लोको, न वेत्ति स्वहिताहितम् ॥ ४९९ ॥

भूपं भावार्थजिज्ञासुं, ज्ञात्वेत्युपनिनाय च ।
सूरिर्ग्रामोऽत्र संसारः, सदाऽविचलितस्थितिः ॥ ५०० ॥

विज्ञेयं जीवलोकस्य, स्वरूपं शिवमन्दिरम् ।
संभृतं सुखसामग्र्या, भावरत्नौघपूरितम् ॥ ५०१ ॥

भौताचार्यश्च तत्स्वामी, जीवः स्वाभाविका गुणाः ।
कुटुम्बं तस्य विज्ञेयं, हितकारि मनोहरम् ॥ ५०२ ॥

उन्मत्तः कर्मयोगेन, लोको नाद्रियते च तत् ।
भावरत्नभृतं वेत्ति, रूपं स्वाभाविकं च न ॥ ५०३ ॥

चौरा रागादयो दोषा, धूर्ता लोकस्य वञ्चकाः ।
तेन मित्रीकृताः कर्मोन्मादं संवर्धयन्ति ते ॥ ५०४ ॥

तस्य रूपं वशीकृत्य, क्षिप्त्वाऽन्तस्तत्कुटुम्बकम् ।
मुद्रयन्ति मनोद्वारं, सद्यस्ते नाट्यविद्यया ॥ ५०५ ॥

अथ स्वाभाविकं रूपं, मुषित्वा तस्य मन्दिरम् ।
महामोहं बृहद्धूर्तं, चक्रुस्तत्र महीपतिम् ॥ ५०६ ॥

लोकं तस्याग्रतो हृष्टाः, सोन्मादं नाटयन्ति ते ।
श्रूयते तत्कलकलो, गीततालारवोद्धतः ॥ ५०७ ॥

माहेश्वरास्तु ते ज्ञेयाः, प्रबुद्धा ये जिनागमे ।
लोकस्य वारयन्त्येते, रागादिस्तेनसंगतिम् ॥ ५०८ ॥

हितं न मन्यते वाक्यं, स तून्मादेन विह्वलः ।
तत् तैः सारगुरुः प्रोक्तः, सोऽज्ञत्वाद् बठरो गुरुः ॥ ५०९ ॥

जैनमाहेश्वरैस्तस्य, त्यक्तं च शिवमन्दिरम् ।
रागादिचौरवशगं, लोकभौतमवेत्य तम् ॥ ५१० ॥

भिक्षां तं याचमानं च, भोगाकाङ्क्षाक्षुधातुरम् ।
रागादयो भवग्रामे, भ्रामयन्ति मदोद्धताः ॥ ५११ ॥

तिर्यग्नारकमानुष्यदेवसम्बन्धिनो भवाः ।
चत्वारः पाटकास्तत्र, प्रोक्तरूपाः प्रकीर्तिताः ॥ ५१२ ॥

कर्परं च शरावं च, ताम्रं राजतमेव च ।
कीर्तितं तत् तदायुष्कं, लोकभौतस्य भाजनम् ॥ ५१३ ॥

तत्र पापमषीलिप्तो, नरकायुष्ककर्परे ।
दीनोऽसौ याचते भोगभिक्षां नरकपाटके ॥ ५१४ ॥

न तत्र लभते भिक्षां, रागादिस्तेनसंज्ञितैः ।
घोरैर्नरकपालैश्च, षिङ्गतुल्यैः प्रपीड्यते ॥ ५१५ ॥

अनन्ततीव्रदुःखौघमनुभूय ततः पुनः ।
आयुष्ककर्परे भग्ने, निर्गच्छेच्चौरवेष्टितः ॥ ५१६ ॥

पर्यटेदथ भिक्षार्थी, तिर्यग्जन्मनि पाटके ।
तत्रापि नाश्नुते भोगान्, बाध्यते च क्षुदादिभिः ॥ ५१७ ॥

निष्ठिते तिर्यगायुष्के, मानुष्यकमवाप्नुयात् ।
पुण्यच्छायालवात् तत्र, लभते भोगभोजनम् ॥ ५१८ ॥

तत्राप्युपद्रवैस्तैस्तैः, पीड्यते धूर्तसन्निभैः ।
ताम्रपात्रे नरायुष्के, भग्ने गच्छेत् सुरालयम् ॥ ५१९ ॥

बिभ्राणो राजताकारममरायुष्कभाजनम् ।
तत्र पुण्यमहाच्छायो, लभते भोगभोजनम् ॥ ५२० ॥

एवं लोको भवग्रामे, बम्भ्रमीति पुनः पुनः ।
उन्मत्तस्तस्कराधीनो, हसन् गायन् रुदन् भृशम् ॥ ५२१ ॥

भिक्षालवं समासाद्य, तुच्छं वैषयिकं सुखम् ।
भौतवत् सुखमानी स, स्वां न वेत्ति विडम्बनाम् ॥ ५२२ ॥

भ्रंशितौ यैर्महैश्वर्यात्, कुटुम्बाच्च वियोजितः ।
हितांस्तानेव रागादीन्, लोकोऽयं वेत्ति बान्धवान् ॥ ५२३ ॥

भिक्षाप्रायानिमान् लब्ध्वा, विषयान् प्रभुताच्युतः ।
तथा नृत्यति मूढात्मा, यथाऽसौ बठरो गुरुः ॥ ५२४ ॥

धरणीनाथ ! तेनेदं, लोकस्तत्त्वं न मन्यते ।
दुःखाब्धिमध्यपतितः, सुखित्वमभिमन्यते ॥ ५२५ ॥

बभाषे धवलः क्ष्माभृत्, तदुन्मत्ता भृशं वयम् ।
लुप्तं रागादिभिश्चौरैः, स्वरूपं शिवमन्दिरम् ॥ ५२६ ॥

पर्यटामो भवग्रामे, नष्टभावकुटुम्बकाः ।
सुदुर्लभा भोगभिक्षा, तुष्टास्तल्लवलाभतः ॥ ५२७ ॥

मग्ना दुःखोदधावस्मात् कथं मोक्षो भविष्यति ।
सूरिराह तथा जातं, तस्य वार्तान्तरं यथा ॥ ५२८ ॥

तैरुपद्रूयमानं तं, संप्रेक्ष्य बठरं गुरुम् ।
महामाहेश्वरस्याभूत्, तस्यैकस्य कृपोपरि ॥ ५२९ ॥

पृष्टस्तेन महावैद्यस्ततस्तदुपदेशतः ।
आत्तोपकरणो रात्रौ, गतोऽसौ शिवमन्दिरम् ॥ ५३० ॥

नाटयित्वाऽथ तं सुप्ता, बहुवेलं मलिम्लुचाः ।
प्रस्तावं तं समासाद्य, तेन दीपः स्फुटीकृतः ॥ ५३१ ॥

भवितव्यतयाऽपश्यत्, खिन्नस्तं बठरो गुरुः ।
ययाचेऽम्बु ददौ तस्य, स ततस्तत्त्वरोचकम् ॥ ५३२ ॥

तत्पानान्नष्ट उन्मादो, नैर्मल्यं चेतना गता ।
धूर्ताश्चौरास्तेन दृष्टा, वज्रं माहेश्वरो ददौ ॥ ५३३ ॥

जगौ च वैरिणस्तेऽमी, तदेतेन निपातय ।
वज्रेण तेन ते चौरा, अथोत्थायाखिला हताः ॥ ५३४ ॥

उद्घाटितः स्फुरद्धामा, चित्तापवरकस्ततः ।
कुटुम्बं स्वं स्फुटीभूतमुदभूद् रत्नसञ्चयः ॥ ५३५ ॥

दृष्टाऽखिला स्वसद्मश्रीरभूत् सारगुरुस्ततः ।
परित्यज्य भवग्रामं, गतः शिवमठेऽथ सः ॥ ५३६ ॥

भूपः प्राह नियोज्येयं, कथमत्र जने कथा ।
गुरुर्जगौ महामाहेश्वरो धर्मप्रबोधकृत् ॥ ५३७ ॥

लोकभीतं भवग्रामे, दृष्ट्वा रागादिपीडितम् ।
भिक्षामात्रेण सन्तुष्टमुन्मत्तं च कृपापरः ॥ ५३८ ॥

अस्माद् दुःखात् कथं मोक्षः, स्यादस्येति विचिन्तयन् ।
जिनवैद्योपदेशेन, तद्धिताय प्रवर्तते ॥ ५३९ ॥

रागादिषु प्रसुप्तेषु, क्षयोपशमभावतः ।
तत्स्वरूपे दीपयति, ज्ञानदीपं शिवाश्रये ॥ ५४० ॥

सम्यक्त्वं पाययत्यम्बु, दत्ते च चरणाशनिम् ।
रागादितस्करगणं, लोकस्तेन निहन्ति च ॥ ५४१ ॥

ततस्तस्य विशालः स्यान्निर्मलः कुशलाशयः ।
क्षीयन्ते प्राच्यकर्माणि, बध्यन्ते नूतनानि न ॥ ५४२ ॥

याति दुश्चरितावेशः, प्रभवत्यप्रमत्तता ।
मिथ्याविकल्पाः शाम्यन्ति, समाधिश्च प्रवर्धते ॥ ५४३ ॥

उद्घाटयत्येष ततश्चित्तापवरकं निजम् ।
स्वाभाविककुटुम्बं च, ज्ञानालोकेन पश्यति ॥ ५४४ ॥

जिहासति भवग्रामं, निःसङ्गानन्दवांस्ततः ।
शाटं सूक्ष्माणवो यान्ति, रूक्षतां तस्य गच्छतः ॥ ५४५ ॥

चिन्ता व्यावर्तते योगो, जृम्भते ध्यानसङ्गतः ।
अपूर्वकरणं याति, महासामायिकस्ततः ॥ ५४६ ॥

निहत्य क्षपकश्रेण्या, घातिकर्म जिनो भवन् ।
अनुगृह्णाति जगतीं, समुद्घातं ततो व्रजेत् ॥ ५४७ ॥

कर्मचक्रं समीकृत्य, ततो योगान्निरुध्य च ।
समारोहति शैलेशीं, सर्वकर्मक्षयावहाम् ॥ ५४८ ॥

त्यक्त्वा ततो भवाग्रामं, स्वाभाविककुटुम्बयुग् ।
गतः शिवालयमठे, सदाऽऽस्ते सुखनिर्भरः ॥ ५४९ ॥

अनेन हेतुना प्रोक्तमभूत् सारगुरोर्यथा ।
वार्तान्तरं तथा चेत् स्यात्, दुःखं न क्षीयते तथा ॥ ५५० ॥

इदं श्रुत्वा मुनेर्वाक्यं हृष्टा राजान्विता जनाः ।
प्राहुश्च त्वां प्रपन्नानां, वृत्तान्तोऽयं न दुर्लभः ॥ ५५१ ॥

आज्ञाप्यतामिदानीं च, यदस्माभिर्विधीयते ।
मुनिराह भवद्भिस्तत्, क्रियतां यत् कृतं मया ॥ ५५२ ॥

निर्विण्णेन भवग्रामाद्, दीक्षा भवनिबर्हणी ।
मया गृहीता सा ग्राह्या, भवद्भिः सुखमिच्छुभिः ॥ ५५३ ॥

नृपः प्राह वयं नाथ, त्वया यत्नेन बोधिताः ।
भवांस्तु बोधितः केन, स्वयंबुद्धोऽपि वा वद ॥ ५५४ ॥

सूरिराह महाराज ! लघुतायै स्ववर्णनम् ।
ब्रुवे तथाऽपि सद्भूतं, त्वत्कुतूहलपूर्तये ॥ ५५५ ॥

अस्तीह कौतुकैः पूर्णं, पुरं नाम्ना धरातलम् ।
राजा शुभविपाकोऽस्ति, तत्र तेजोदिवाकरः ॥ ५५६ ॥

साधुता सुन्दरी तस्य, पुण्यसिंहस्थितौ दरी ।
तयोः सुतो बुधो जातो, विलसद्बुद्धिपाटवः ॥ ५५७ ॥

क्रमेण वर्धमानोऽसौ, बभूव गुणरत्नभूः ।
शीलेनालङ्कृतश्चारुरूपेण मकरध्वजः ॥ ५५८ ॥

भ्राता शुभविपाकस्य, महाऽनर्थकरः परः ।
तथाऽशुभविपाकोऽस्ति, देवी तस्यास्त्यसाधुता ॥ ५५९ ॥

ताभ्यां विषाङ्कुरः क्रूरो, मन्दो नाम सुतोऽजनि ।
गुणहीनोऽपि मदवान्, वर्धमानो बभूव सः ॥ ५६० ॥

पितृव्यपुत्रभावेन, मैत्र्यभूद् बुधमन्दयोः ।
सर्वत्र सहितावेव, स्वैरं विचरतः स्म तौ ॥ ५६१ ॥

इतश्च धीषणा नाम, पुरेऽस्त्यमलमानसे ।
शुभाभिप्रायभूपस्य, जयन्तीव सुता हरेः ॥ ५६२ ॥

बुधेन परिणीता सा, गृहायाता स्वयंवरा ।
मनोरथौघैः सुषुवे, विचाराख्यः सुतस्तया ॥ ५६३ ॥

अन्यदा बुधमन्दाभ्यां, ददृशे भालपर्वतः ।
विलसद्‌भ्यां निजक्षेत्रे, सानुस्थकबरीवनः ॥ ५६४ ।

तस्याधस्ताद् गता दूरं, दृष्टा नासा महागुहा ।
तत्रापवरकद्वन्द्वं, दृष्टं भूयोऽन्धकारभृत् ॥ ५६५ ।

इत्थमाश्चर्ययुतयोः, पश्यतोर्बुधमन्दयोः ।
गुहातो निर्गता नारी, काचित् पवनचञ्चला ॥ ५६६ ॥

दर्शयन्ती पुरः प्रीतिं, सा कृत्वा प्रणतिं तयोः ।
जगौ साधुकृतं नाथौ, युवाभ्यां यदिहागतम् ॥ ५६७ ॥

मन्दस्तां कोमलोल्लापैः, सस्नेहं समभाषत ।
का त्वं बाले ! किमर्थं वा, वसस्यत्र गुहाऽन्तरे ॥ ५६८ ॥

श्रुत्वा तद्वचनं मूर्च्छां, प्राप सा शोकपीडिता ।
किमेतदिति पृष्टा च, स्वस्थीभूताऽऽह तं प्रति ॥ ५६९ ॥

युवयोर्विस्मृतिर्नाथं !, मम शोकस्य कारणम् ।
अहं भुजङ्गता नाम, युवयोः परिचारिका ॥ ५७० ॥

अहं भवद्भ्यामेवास्यां, गुहायां स्थापिता पुरा ।
अस्यां हि घ्राणनामाऽस्ति, वयस्यो युवयोः प्रियः ॥ ५७१ ॥

तिष्ठामि भवदादेशात्, तस्याहं परिचारिका ।
संगतं चिरकालीनं, युवयोः सह तेन हि ॥ ५७२ ॥

पुरेऽसंव्यवहाराख्ये, स्थितिः प्राग् युवयोरभूत् ।
एकाक्षाख्ये गतौ कर्मपरिणामाज्ञया ततः ॥ ५७३ ॥

विकलाक्षे ततः प्राप्तौ, तत्रास्ते पाटकत्रयम् ।
द्वितीयपाटके तत्र, त्रीन्द्रियाख्ये यदा स्थितौ ॥ ५७४ ॥

दत्तेयं वां गुहा कर्मपरिणामेन भूभुजा ।
तदा तत्र प्रसन्नेन, घ्राणाख्यश्च कृतः सुहृत् ॥ ५७५ ॥

स्थानेषु तादृशेष्वेष, ततः प्रभृति वां हितः ।
अन्वागतो युवाभ्यां च, गुहास्थः परिलालितः ॥ ५७६ ॥

आगताभ्यां विशेषेण, लालितो नृगतिं पुरीम् ।
अहं भुजङ्गताऽऽख्या च, कृताऽस्य परिचारिका ॥ ५७७ ॥

तदेवं चिरसम्बद्धौ, कुरुथो गजमीलिकाम् ।
युवां यत् स्यात् ततोऽन्यत् किं, परं मे शोककारणम् ॥ ५७८ ॥

युवाभ्यां प्राक्तनस्थित्या, तद् धार्या प्रेमपद्धतिः ।
इति श्रुत्वा बुधो दध्यौ, धूर्तेयं न हितावहा ॥ ५७९ ॥

ईषत्स्मितं सलज्जं च, कुलस्त्री मृदु भाषते ।
इयं च बृहदाटोपा, वितनोति विपर्ययम् ॥ ५८० ॥

इत्युपेक्षापरस्तस्यां, बुधो नोत्तरमप्यदात् ।
स्नेहक्रीतोऽभवत् तस्याः, साक्षान्मन्दस्तु किङ्करः ॥ ५८१ ॥

ऊचे च किं करोम्येष, ततः प्राह भुजङ्गता ।
सेव्यः सुहृत् त्वया गन्धलुब्धबुद्धिरयं सदा ॥ ५८२ ॥

चन्दनागुरुकर्पूरकस्तूर्यादि सुगन्धि यत् ।
तद् रोचतेऽस्य नामापि, दुर्गन्धस्य न रोचते ॥ ५८३ ॥

इष्टोपनत्याऽनिष्टस्य, दूरतश्च निवारणात् ।
घ्राणेन लालितेनेह, तद् भावि भवतो सुखम् ॥ ५८४ ॥

मन्दः प्राह करोम्येवं, तिष्ठ भद्रे ! निराकुला ।
साऽपि तद्वचसा तुष्टा, दधौ मौनं बुधः पुनः ॥ ५८५ ॥

दध्यौ च क्षेत्रमेतन्मे, शैलश्चेयं महागुहा ।
घ्राणोऽप्यस्यां स्थितः पाल्यो, मम नास्त्यत्र संशयः ॥ ५८६ ॥

अस्या नार्या गिरा कार्यं, केवलं नास्य लालनम् ।
आक्षेत्रमोक्षं कार्याऽस्य, धारणा लोकयात्रया ॥ ५८७ ॥

इति निश्चित्य तं घ्राणं, पालयन्नपि नो बुधः ।
दोषौघैर्युज्यते कीर्तिं, लभते शुद्धमार्गतः ॥ ५८८ ॥

मन्दस्तु लालयन् घ्राणं, पुरस्कृत्य भुजङ्गताम् ।
लोल्यात् तन्तम्यते बाढं, सुगन्धिद्रव्यसंग्रहैः ॥ ५८९ ॥

शङ्कापिशाच्या दुर्गन्धं जिहीर्षंश्च निहन्यते ।
धृतिसौख्यं न लभते, हस्यते च विवेकिभिः ॥ ५९० ॥

इतश्च प्राप्ततारुण्यो, विचारो लीलया गतः ।
गेहाद् देशदिदृक्षुः स, दृष्ट्वाऽऽयातोऽखिलां भुवम् ॥ ५९१ ॥

हृदि प्रहृष्टौ धिषणाबुधौ तस्मिन् समागते ।
मुदितं राजभवनं, कृतस्तस्यागमोत्सवः ॥ ५९२ ॥

आकर्ण्य घ्राणसम्बन्धं, संजातं बुधमन्दयोः ।
रहसि स्वीयपितरं, संस्थाप्य स इदं जगौ ॥ ५९३ ॥

वयस्यो घ्राणनामाऽयं, न युक्तो दुष्टधृष्टधीः ।
यदहं भवचक्रेऽगां, गतो देशदिदृक्षया ॥ ५९४ ॥

राजमार्गे मम दृशोस्तत्रैका योषिदागता ।
मद्दर्शनात् सा मुदिता, मयूरीव घनागमात् ॥ ५९५ ॥

ममापि प्रमदो दृष्ट्वा, तामभूदनिवारितः ।
कुतस्त्योऽसीति पृष्टोऽहं, ततो दत्ताशिषा तया ॥ ५९६ ॥

मयोक्तं बुधराजस्य, पुत्रोऽहं धिषणात्मजः ।
देशान् दिदृक्षुरायातो, धरातलपुरादिह ॥ ५९७ ॥

हर्षाश्रुपूर्णनयना, श्रुत्वेदं साऽङ्गनाऽवदत् ।
आदावेव मनोनेत्रैर्वत्स ! त्वं विदितोऽसि मे ॥ ५९८ ॥

मया त्वं बालको मुक्तस्तन्मां वेत्सि विशिष्य नं ।
मार्गानुसारिताऽऽख्याऽहं, मातुः प्रियसखी तव ॥ ५९९ ॥

तव माता मम प्राणाः, पिता ते जीविताधिकः ।
तयोरेवाहमादेशाद्, देशान् द्रष्टुं विनिर्गता ॥ ६०० ॥

जातमात्रे त्वयि सुते, भागिनेयोऽसि तेन मे ।
सर्वस्वं परमात्मा च, किं किं त्वं मे न वर्तसे ॥ ६०१ ॥

कृतं चारु यदायातो, देशदर्शनकाम्यया ।
देशाटनं किल ज्ञानपूःकपाटविपाटनम् ॥ ६०२ ॥

तच्च चारुतरं वत्स !, भवचक्रे यदागतः ।
अत्र दृष्टेऽखिलं दृष्टमिदं सर्वाद्भुतास्पदम् ॥ ६०३ ॥

धन्याऽस्मि च यया दृष्टस्त्वं हृत्कुमुदचन्द्रमाः ।
मयाऽप्युक्तं कृतार्थोऽस्मि, मीलितोऽहं यदम्बया ॥ ६०४ ॥

दर्शयत्वधुनाऽम्बा मे, निखिलं भवचक्रकम् ।
साऽपि तद् बाढमित्युक्त्वा, सवृत्तान्तमदर्शयत् ॥ ६०५ ॥

अथैकमत्र मया दृष्टं, पुरं तत्र महानगः ।
निविष्टं शिखरे तस्य, रमणीये परं पुरम् ॥ ६०६ ॥

ततो मयोक्तं किं नाम, पुरमेतदधःस्थितम् ।
किंनामाऽयं गिरिर्मातः !, शिखरे किं परं पुरम् ॥ ६०७ ॥

मार्गानुसारिता प्राह, पुरं सात्त्विकमानसम् ।
इदमत्रातितुङ्गोऽयं, विवेकवरपर्वतः ॥ ६०८ ॥

विख्यातं शिखरं चेदमप्रमत्तत्वनामकम् ।
इदं जैनपुरं तत्र, स्थित्याऽप्युच्चं गुणैरिव ॥ ६०९ ॥

इदं वदन्त्यामेवास्यां, पुरुषैर्वेष्टितो मया ।
दृष्ट एको नीयमानो, राजपुत्रः शरक्षतः ॥ ६१० ॥

ततो मयोक्तमम्बैष, कः कथं च शरैः क्षतः ।
कुत्र वा नीयते केऽमी, लग्नाश्च परिचारकाः ॥ ६११ ॥

मार्गानुसारिता प्राह, राजतेऽत्र महागिरौ ।
राजा चारित्रधर्माख्यो, यतिधर्मश्च तत्सुतः ॥ ६१२ ॥

संयमो नाम तस्यायं, पुरुषः पौरुषाधिकः ।
गतोऽस्त्रैः क्वचिदेकाकी, महामोहादिभिः क्षतः ॥ ६१३ ॥

नेष्यन्तीमं स्वभवने, रणभूमेः पदातयः ।
तिष्ठन्त्यस्य पुरे जैने, बहवः खलु बान्धवाः ॥ ६१४ ॥

मयोक्तं द्रष्टुमिच्छामि, भाव्यत्र यदतः परम् ।
नीत्वा मां शैलशिखरे, सर्वं मातः ! प्रदर्शय ॥ ६१५ ॥

मां निनाय पुरं जैनं, ततो मार्गानुसारिता ।
तत्र चित्तसमाधानमण्डपे ददृशे नृपः ॥ ६१६ ॥

मोहाद्यैर्निहतं दृष्ट्वा, संयमं तत्र चागतम् ।
केचिन्मुञ्चन्ति हुङ्कारान्, केचित् खिद्यन्ति रोषणाः ॥ ६१७ ॥

भुजमास्फोटयन्त्यन्ये, परे भ्रकुटिभीषणाः ।
जायन्ते केऽपि रक्ताङ्गाः, परेऽसिधृतदृष्टयः ॥ ६१८ ॥

केचित् प्रवृत्ताट्टहासाः, केचिदूर्जितगर्जिताः ।
केचित् कराहतभुवः, केऽपि साक्षात् कृशानवः ॥ ६१९ ॥

तादृशं क्षुभितं प्रेक्ष्य, निखिलं राजमण्डलम् ।
चारित्रधर्मराजेन्द्रं, सद्बोधो नीतिवज्जगौ ॥ ६२० ॥

धीराणां युज्यते नायं, संभ्रमः कातरोचितः ।
तदेते विनिवार्यन्तां, देव ! क्षुब्धाब्धिसन्निभाः ॥ ६२१ ॥

भावः परीक्ष्यतामेषामथेङ्गितनिवारिताः ।
चारित्रधर्मराजेन, ते सर्वे मौनमास्थिताः ॥ ६२२ ॥

स्वं स्वं विवक्षितं ब्रूतेत्युक्ताश्च पृथिवीभुजा ।
नृपा जगुर्योद्धुकामास्त्यागशौचानृतादयः ॥ ६२३ ॥

विलम्बोऽद्यापि नो युक्तः, संयमाभिभवे विभोः ।
सिंहः किं स्ववनोन्माथिगजघाते विलम्बते ॥ ६२४ ॥

वृद्धिकृत् विषवृक्षाणामपराधक्षमा द्विषाम् ।
तेषां वीर्यकुठारेण, च्छेदनं हितकारणम् ॥ ६२५ ॥

उल्लासोऽगलितेषु स्यादभ्रेष्विव रवित्विषाम् ।
कृतम्लानिषु नास्माकं, महामोहादिशत्रुषु ॥ ६२६ ॥

कारणं देवपादानामनिच्छैव द्विषां स्थितौ ।
निद्रयैव मृगारातेः, करिक्रीडा वने भवेत् ॥ ६२७ ॥

अलं वैरिचमूं हन्तुमेकैकोऽपि भटस्तव ।
एकोऽपि पूरः क्षुब्धाब्धेः, प्लावयत्येव काननम् ॥ ६२८ ॥

क्रोधकण्डूं रिपुतरुस्कन्धेष्वपनिनीषताम् ।
त्वदुपेक्षाऽङ्कुशोऽस्माकं, द्विपानां प्रतिबन्धकः ॥ ६२९ ॥

द्विषद्भिरभिभूतानां, निष्फलं देव ! नोऽधुना ।
छन्नस्यान्तर्ज्वलत्तेजः कृशानोरिव भस्मना ॥ ६३० ॥

प्रेक्ष्य तान् रणकण्डूलानेवं भूपान् स भूपतिः ।
गतो गुह्यसभां, मन्त्रिमहत्तमसमन्वितः ॥ ६३१ ॥

मदन्विताऽगात् तत्रापि, छन्ना मार्गानुसारिता ।
पृष्टौ राज्ञोचितं कार्यमथ मन्त्रिमहत्तमौ ॥ ६३२ ॥

महत्तमोऽवदत् तत्र, सम्यग्दर्शननामकः ।
उक्तं त्यागादिधीरैर्यत् तत्क्रियैवाधुनोचिता ॥ ६३३ ॥

विनाऽपमानकृद्ध्वंसं, न स्यात् तेजस्विनः सुखम् ।
नाग्निः प्रज्वालयत्युच्चैराक्रामन्तं क्रमेण किम् ॥ ६३४ ॥

तस्याजननिरेवास्तु, योऽरिदग्धोऽपि जीवति ।
स निन्द्यः सर्वलोकानां, स लघुः पवनादपि ॥ ६३५ ॥

एकारिरपि वीर्याढ्यः, समुत्थाय जिगीषति ।
अत्ययुक्तं तव स्थातुं, यस्यानन्ताः किलारयः ॥ ६३६ ॥

तदरिध्वान्तसंघातं, विनिर्द्धूयोदयी भव ।
राजार्केत्यभिधायासौ, विरराम महत्तमः ॥ ६३७ ॥

चारित्रधर्मराजोऽथ, पप्रच्छ सचिवाग्रिमम् ।
सद्बोधं किमिह न्याय्यं, कर्तुं वैरिपराभवे ॥ ६३८ ॥

स प्राह देव ! नो युक्तमन्यथा प्रतिभाषितुम् ।
अस्मिन्महत्तमेनेत्थं, ममाद्रेरिव भाषिते ॥ ६३९ ॥

तथाऽपि त्वत्कृपानुन्नः, किञ्चिदेनं प्रतिब्रुवे ।
इति विज्ञप्य राजानं, स जगाद महत्तमम् ॥ ६४० ॥

दक्षोऽसि स्वामिभक्तोऽसि, धुर्यस्तेजस्विनामसि ।
वचो येनेदृशं, प्रोक्तं, गुरुणाऽपि हि दुर्वचम् ॥ ६४१ ॥

द्विषामभिभवः सत्यं, दुःसहो मानिकेसरिन् ! ।
सत्यं मोहादयो वध्याः, सत्यं पूर्णं बलं च नः ॥ ६४२ ॥

प्रस्तावः केवलमिहापेक्षणीयो जिगीषता ।
प्रस्तावं फलदं प्राहुर्नीतिपौरुषयोर्बुधाः ॥ ६४३ ॥

स्थानं यानं तथा सन्धिर्विग्रहश्च परैः सह ।
संश्रयो द्वैधभावश्च, षड्गुणाः परिकीर्तिताः ॥ ६४४ ॥

उपायः कर्मसंरम्भे, विभागो देशकालयोः ।
पुरुषद्रव्यसम्पच्च, प्रतिकारस्तथाऽऽपदाम् ॥ ६४५ ॥

पञ्चमी कार्यसिद्धिश्च, स्मृतमित्यङ्गपञ्चकम् ।
सामदानभेददण्डा, उपायाः परिकीर्तिताः ॥ ६४६ ॥

प्रभुत्वोत्साहमन्त्राख्याः, प्रोक्तास्तिस्रश्च शक्तयः ।
मित्रकाञ्चनभूमीनां, लाभाः सिद्धित्रयं ततः ॥ ६४७ ॥

आन्वीक्षिकी त्रयी वार्ता, दण्डनीतिस्तथाऽपरा ।
विद्याश्चतस्रो भूपानां, फलवत्यः स्वगोचरे ॥ ६४८ ॥

नीतिसारमिदं ज्ञेयं, राज्ञा भावार्थसंयुतम् ।
विना भावं तु विज्ञानमन्धस्यादर्शसन्निभम् ॥ ६४९ ॥

भावानभिज्ञोऽसाध्येऽपि, प्रवर्तेत हि वस्तुनि ।
ततो हास्यो भवेल्लोके, समूलश्च विनश्यति ॥ ६५० ॥

इदं च सर्वं युद्धस्य, मूलनष्टं प्रयोजनम् ।
फलवांस्तावकोत्साहः, कथं तत्र भविष्यति ॥ ६५१ ॥

वयं महारयस्ते च, भवचक्रपुरं तथा ।
स कर्मपरिणामो राट्, सा च चित्तमहाटवी ॥ ६५२ ॥

यस्यायत्तमिदं सर्वं, भवजन्तोः स वेत्ति न ।
नामाप्यस्मादृशां किन्तु, मोहादीन् बहु मन्यते ॥ ६५३ ॥

यत्राधिकः पक्षपातो, बलेऽस्य विजयेत तत् ।
तत् तेनानादृतानां नो, युक्ता गजनिमीलिका ॥ ६५४ ॥

प्रदीपा इव विद्वांसः, संकुचन्ति प्रवृद्धये ।
तैलपूरमिव प्राप्य, प्रस्तावनयविस्तरम् ॥ ६५५ ॥

नश्यतोऽपि न दक्षस्य, न्यूनं भवति पौरुषम् ।
मेषो ह्यपसरत्येव, प्रतिमेषजिघांसया ॥ ६५६ ॥

महत्तमो जगावार्य !, सोऽस्मान् विज्ञास्यते न वा ।
उपस्थिताश्च रिपवः, स्वस्थैः स्थेयं कथं ततः ॥ ६५७ ॥

प्राह मन्त्री मा त्वरिष्ठाः, कालसाध्ये प्रयोजने ।
बलद्वये समानोऽस्ति, स कर्मपरिणामराट् ॥ ६५८ ॥

भवजन्तुस्तदायत्तः, कदाचित् तेन बोधितः ।
स करिष्यति नः पक्षं, हनिष्यामो रिपूंस्तदा ॥ ६५९ ॥

तेन कालविलम्बोऽत्र, रोचते मे प्रयोजने ।
अप्रस्तावनिशा तेजोभानोर्नाभ्युदयावहा ॥ ६६० ॥

महत्तमो जगौ तर्हि, दूतस्तेषां प्रहीयताम् ।
दूतेन भर्त्सितास्ते यन्मर्यादां व्यतियन्ति न ॥ ६६१ ॥

सचिवः प्राह न प्रेष्यो, दूतः स्थेयं तु निश्चलैः ।
महत्तमो जगौ केयमतिभीतिर्भवादृशाम् ॥ ६६२ ॥

दण्डपूर्वश्च यदि ते, दूतस्तेषु न रोचते ।
प्रेष्यतां सामपूर्वस्तन्मिथःसन्धिविधौ पटुः ॥ ६६३ ॥

सद्बोधोऽथ जगौ साम, क्रुद्धे कलहवृद्धिकृत् ।
उद्गिरत्यग्निमेवोच्चैस्तप्तलोहे धृतं पयः ॥ ६६४ ॥

फलेन ज्ञायतामेतद्, यद्वा दूतः प्रहीयताम् ।
ज्ञात्वा ततश्च तद्भावं, कार्यं कार्यं यथारुचि ॥ ६६५ ॥

इदं चारित्रधर्मस्य, संलग्नं वचनं हृदि ।
प्रेषितः सत्यदूतोऽथ, महामोहबले गतः ॥ ६६६ ॥

मया सह गता तत्र, साऽपि मार्गानुसारिता ।
प्रमत्तता नदीतीरे, चित्तविक्षेपमण्डपे ॥ ६६७ ॥

महामोहनृपस्याग्रे, स्थित्वा दूतो जगाद सः ।
चित्तवृत्तिमहाटव्या, भवजन्तुः किल प्रभुः ॥ ६६८ ॥

बहिरङ्गान्तरङ्गाणां, पुराणां भूभुजामपि ।
स एवेशः स नस्तुल्यः, को विरोधस्ततो मिथः ॥ ६६९ ॥

स्वामिभक्ताः क्षयं भृत्या, न स्वपक्षस्य कुर्वते ।
दृढं भवतु नः प्रेम, युष्माभिः सह तन्नृप ! ॥ ६७० ॥

सत्योदितमिदं श्रुत्वा, महामोहसभास्थिताः ।
क्रोधान्धा जगदुः सर्वे, समं भ्रकुटिभीषणाः ॥ ६७१ ॥

स्वामी नो भवजन्तुर्यत्, तदुक्तं दुष्ट ! केन ते ।
पातालेऽपि गतानां वो, न त्राणमनया गिरा ॥ ६७२ ॥

आलजालप्रलापिस्तद्, व्रज दूताधम ! द्रुतम् ।
सज्जा भवत सर्वेऽपि, वयं योद्धुं समागताः ॥ ६७३ ॥

दूतस्य तर्जनामेवं, कृत्वा ते प्रस्थिताः क्रुधा ।
महामोहं पुरस्कृत्य, सर्वेऽपि कवचावृताः ॥ ६७४ ॥

सत्येनापि प्रभोः सर्वा, तेषां चेष्टा निवेदिता ।
दृष्ट्वाऽऽयातां मोहचमूम्, तेन सज्जीकृतं बलम् ॥ ६७५ ॥

आयोधनं तयोर्लग्नं, दारुणं, सैन्ययोर्द्वयोः ।
चित्तवृत्तिमहाटव्यां, मिथःप्रथितसंभ्रमम् ॥ ६७६ ॥

तताास्त्रतडिद्द्योतं, रजःक्षेपोत्थदुर्दिनम् ।
घनागमसमं भूरि, तूर्यौघोर्जितगर्जितम् ॥ ६७७ ॥

पाटयन्तः परानीकं महामोहभटाः स्फुटम् ।
उद्वेल्लितास्तत्र यमा, बहुरूपा 'इवागताः ॥ ६७८ ॥

हतवाजिरथव्रातं, दलिताखिलवारणम् ।
चारित्रधर्मराजस्य, चकम्पेऽथाखिलं बलम् ॥ ६७९ ॥

जितोऽरिभिस्ततो नंष्ट्वा, स्वस्थानं स गतो द्रुतम् ।
लीनः स्थितोऽरिसेना तु, स्थिता रुद्ध्वा मदोद्धता ॥ ६८० ॥

महामोहनरेन्द्रस्य, राज्यं परिणतं ततः ।
मार्गानुसारिता प्राह, दृष्टं वत्स ! कुतूहलम् ॥ ६८१ ॥

दृष्टं मयोक्तं किन्त्वत्र, ज्ञातुमिच्छामि कारणम् ।
सा प्राह जगतीं जेतुं, रागकेसरिमन्त्रिणा ॥ ६८२ ॥

मानुषाणि नियुक्तानि, पञ्चात्मीयानि कुत्रचित् ।
जितानीह पुरा तानि, सन्तोषेण महस्विना ॥ ६८३ ॥

चारित्रधर्मनृपतेस्तन्त्रपालेन लीलया ।
कलहस्तन्निमित्तोऽयं, जातोऽमीषां परस्परम् ॥ ६८४ ॥

स्पर्शनं रसना घ्राणं, दृष्टिः श्रोत्रं तथा परम् ।
एतानि पञ्च निघ्नन्ति, मानुषाणि जगद्धितम् ॥ ६८५ ॥

ततो मयोक्तं पूर्णं मे, देशदर्शनकौतुकम् ।
अथाहं स्वगृहे यामि, तयोक्तं वत्स ! गम्यताम् ॥ ६८६ ॥

अहमप्यागमिष्यामि, वेगात् तत्र तवान्तिके ।
ततोऽहमागतो गेहे, तद् घ्राणोऽयं न सुन्दरः ॥ ६८७ ॥

मानुषाणां तृतीयोऽयं, रागकेसरिमन्त्रिणः ।
जगत्प्रतारणपटुः, पर्यटत्यतिनिर्घृणः ॥ ६८८ ॥

इत्थं बुधाय बौधेये, निवेदयति सत्वरम् ।
मार्गानुसारिताऽऽयाता, तया तद्गीः समर्थिता ॥ ६८९ ॥

घ्राणं बुधस्ततोऽनर्थकारणं जेतुमैहत ।
इतो भुजङ्गतानुन्नो, गन्धो(मन्दो) घ्राणमलालयत् ॥ ६९० ॥

लीलावत्याः सुगन्धानामन्यदाऽन्वेषकः सदा ।
स देवराजभार्याया, भगिन्या भवने गतः ॥ ६९१ ॥

सपत्नीपुत्रघातार्थं, गन्धयोगस्तया कृतः ।
मारणात्मा क्षणे तस्मिन्, लालाविषकरम्बितः ॥ ६९२ ॥

तां गन्धपुटिकां द्वारे, मुक्त्वा साऽन्तर्गृहं गता ।
दृष्ट्वा तत्रागतो मन्दस्तां चकाराशु मुत्कलाम् ॥ ६९३ ॥

ददौ घ्राणाय तान् गन्धांस्ततोऽसौ प्रलयं गतः ।
तां घ्राणदुष्टतां दृष्ट्वा, विरक्तो नितरां बुधः ॥ ६९४ ॥

तेन शिष्टात्मना पृष्टा, ततो मार्गानुसारिता ।
कथं हेयो मया घ्राणः, साऽऽह हित्वा भुजङ्गताम् ॥ ६९५ ॥

तिष्ठ त्वं साधुमध्यस्थो, दोषायेत्थमयं न ते ।
बुधेनापि कृतं सर्वं, तद्वचो हितकृत् तथा ॥ ६९६ ॥

ततो गृहीतदीक्षोऽसौ, परिज्ञातागमः शुचिः ।
आचार्यैः स्वपदे भूरिलब्धिपात्रं निवेशितः ॥ ६९७ ॥

स एषोऽहं बुधाचार्यो, भवद्बोधविधित्सया ।
एकाकीह गुणस्वच्छं, गच्छं त्यक्त्वा समागतः ॥ ६९८ ॥

अयं वैराग्यहेतुर्मे, जातो युष्मादृशामपि ।
इदं संपद्यते सर्वं, पश्यथ ज्ञानचक्षुषा ॥ ६९९ ॥

जन्ममृत्युजराव्याधिबाधितोऽयं भवोऽखिलः ।
इवमेवाभयस्थानं, भूप ! जैनेन्द्रशासनम् ॥ ७०० ॥

युज्यते क्षणमप्येकं, धीर ! तन्न विलम्बितुम् ।
हीयतां भोगगरलं, पीयतां प्रशमामृतम् ॥ ७०१ ॥

ततो धवलराजेन, सर्वे साकूतमीक्षिताः ।
लोकाः प्रोक्ताश्च संलग्नं, कीदृशं भवतां वचः ॥ ७०२ ॥

प्रोचुस्तेऽनेन वचसा, जीविताः सुधया वयम् ।
क्रियतां तूर्णमादिष्टं, धर्मस्य त्वरिता गतिः ॥ ७०३ ॥

तदाकर्ण्य परं हर्षं, राजेन्द्रः प्राप पूतधीः ।
राज्याभिषेकमाधातुं, प्रोवाच विमलं ततः ॥ ७०४ ॥

पुत्र ! गृह्णाम्यहं दीक्षां, त्वं राज्यमनुपालय ।
विमलः प्राह किं चित्ते, वल्लभोऽहं तवास्मि न ॥ ७०५ ॥

यत् स्वयं यासि निर्वाणे, मां स्थापयसि संसृतौ ।
गले राज्यशिलाक्षेपस्तातायं मे न युज्यते ॥ ७०६ ॥

तच्छ्रुत्वाऽतितरां तुष्टः, प्रोचे न त्वां त्यजाम्यहम् ।
राज्ये ततश्च संस्थाप्य, पुत्रकं कमलाभिधम् ॥ ७०७ ॥

दिनान्यष्टविधायोच्चैर्जिनपूजां महोदयाम् ।
प्रदाय च महादानं, शुभे काले समाहितः ॥ ७०८ ॥

सबान्धवः सपत्नीको, विमलेन समं नृपः ।
सपौरलोको निष्क्रान्तः, सम्यक्त्वं जगृहुः परे ॥ ७०९ ॥

वामदेवस्य मम तु, प्रबोधो न तदाऽप्यभूत् ।
ज्ञातो धूर्तो मया सूरिरसौ बहुलिकास्पृशा ॥ ७१० ॥

राजादीनां मया दीक्षाऽवसरे चेति चिन्तितम् ।
मुनिः सिद्धेन्द्रजालोऽयं, लोकान् सर्वानवञ्चयत् ॥ ७११ ॥

ग्राहयिष्यति तेनैतानेष दीक्षां वशीकृतान् ।
विमलोऽपि वयस्यो मे, मां नेष्यति बलात् सह ॥ ७१२ ॥

तदादौ वञ्चयाम्येनमिति ध्यात्वा पलायितः ।
सर्वत्रान्वेषितो दीक्षादिनेऽहं विमलेन च ॥ ७१३ ॥

अदृष्ट्वा मां बुधाचार्यः, पृष्टः क्व गात् सुहृत् स मे ।
ज्ञानवान् स च निःशेषं तस्मै मच्चरितं जगौ ॥ ७१४ ॥

विमलोऽभिदधे तत् किं, न भव्योऽयं शठाशयः ।
सूरिः प्रोवाच नाभव्यः, प्रकृत्या सुन्दरो ह्ययम् ॥ ७१५ ॥

दोषः सर्वोऽपि चैतस्य, भगिनीभ्रातृसङ्गतः ।
मायाऽऽख्याऽस्ति भगिन्यस्य, भ्राता च स्तेयनामकः ॥ ७१६ ॥

तद्वशोऽयं पुरा चक्रे, रत्नस्य हरणादिकम् ।
विमलः प्राह तत्त्यागस्वास्थ्यं प्राप्स्यत्ययं कदा ॥ ७१७ ॥

सूरिराह गते भूरिकाले ताभ्यां वियोक्ष्यते ।
ऋजुताऽस्तेयते कन्ये, प्राप्य रुच्याशयादसौ ॥ ७१८ ॥

तच्छ्रुत्वा विमलेनाहमयोग्यत्वादुपेक्षितः ।
प्राप्तोऽथ काञ्चनपुरे, दृष्टश्च सरलो वणिग् ॥ ७१९ ॥

गतस्तस्यापणे तत्र, दीप्तिं बहुलिका ययौ ।
कृतं तत्पादपतनं, चक्षुर्मोदाश्रुणा भृतम् ॥ ७२० ॥

उक्तं मया च दृष्ट्वा त्वां, जनकस्य स्मराम्यहम् ।
पुत्र एवास्यपुत्रस्य, त्वं ममेति जगाद सः ॥ ७२१ ॥

नीतोऽहं स्वगृहे तेन, बन्धुमत्याः समर्पितः ।
स्वभार्यायास्तया स्नानभोजनादि च कारितः ॥ ७२२ ॥

पृष्टश्च नामगोत्रादि, मया सर्वं निवेदितम् ।
सजातीयोऽयमित्युच्चैर्मुदितः सरलो हृदि ॥ ७२३ ॥

जगौ बन्धुमतीं भार्ये !, धात्रा नूनमपुत्रयोः ।
पुत्रोऽयमावयोर्दत्तो, वृद्धत्वपरिपालकः ॥ ७२४ ॥

तच्छ्रुत्वा बन्धुमत्याप, मुदं मय्येव मन्दिरम् ।
सरलेन च निःक्षिप्तं, हट्टस्थं दर्शितं धनम् ॥ ७२५ ॥

हट्ट एव स शेते च, मद्युक्तो धनमूर्च्छया ।
अन्यदा तिष्ठतोर्गेहे, सन्ध्यायामावयोः सुखम् ॥ ७२६ ॥

सरलप्रियमित्रस्य, बन्धुलस्य समाययौ ।
गृहादाह्वयकस्तेन, प्रोक्तं चेदं सुहृद्वचः ॥ ७२७ ॥

यथाऽद्य मद्गृहे षष्ठीजागरस्य महोत्सवः ।
सुतस्यास्ति तदागत्य, वस्तव्यं भवता ध्रुवम् ॥ ७२८ ॥

ततोऽहं सरलेनोक्तो, याम्यहं बन्धुलालये ।
दुस्त्यजो मित्रनिर्बन्धस्तत् त्वं गत्वाऽऽपणे वस ॥ ७२९ ॥

मयोक्तं गमनेनालं, हट्टे तातोज्झितस्य मे ।
अम्बायाः पादमूलेऽहं, वत्स्याम्यद्याविशङ्कितः ॥ ७३० ॥

ततोऽहो स्नेहसारोऽयमिति संचिन्तयन् हृदि ।
एवं भवत्विति वदन्, मुदितः सरलो गतः ॥ ७३१ ॥

स्थितो गृहेऽहं रात्रौ च, स्तेयवीर्यविजृम्भितम् ।
अर्धरात्रे गतो हट्टं, हर्तुमन्तःस्थितं धनम् ॥ ७३२ ॥

दृष्टश्चोद्घाटयन् हट्टमागतैः दाण्डपाशिकैः ।
मुक्तस्तैः प्रत्यभिज्ञाय, किं करोमीति चिन्तिभिः ॥ ७३३ ॥

तदन्तर्धनमुत्खातं, मयोद्घाट्यापणं ततः ।
तस्यैव पश्चाद्भूभागे, निखातं चापणस्य तत् ॥ ७३४ ॥

रात्रौ विभातप्रायायां, कृतो हाहारवो महान् ।
मिलितो नागरो लोकः, संप्राप्तः सरलोऽपि च ॥ ७३५ ॥

आविर्बभूवुः प्रच्छन्नाः, स्थिता ये दाण्डपाशिकाः ।
सरलः प्राह किं जातं, मयोक्तं मुषितं धनम् ॥ ७३६ ॥

सोऽवक् त्वया कथं ज्ञातं, मयोक्तं त्वां विनाऽधृतिः ।
इहागां रात्रिशेषेऽहं दृष्टमेतत् तदेदृशम् ॥ ७३७ ॥

दध्युः श्रुत्वेत्यदो दाण्डपाशिकास्तस्करो ह्ययम् ।
अस्याहो वञ्चनाशक्तिरहो विश्रम्भघातिता ॥ ७३८ ॥

ततस्ते जगदुः श्रेष्ठिन् !, चित्ते भव निराकुलः ।
लब्धोऽस्ति चौर इति तैः, साकूतमहमीक्षितः ॥ ७३९ ॥

जातं ततो मम भयं, ग्रहीष्यामः सलोप्त्रकम् ।
इत्यालोच्य गतास्तावत्, प्रचण्डा दाण्डपाशिकाः ॥ ७४० ॥

लङ्घितं तद्दिनं भूरिविकल्पाकुलितस्य मे ।
गच्छन् रात्रौ धनं हृत्वा, गृहीतो दाण्डपाशिकैः ॥ ७४१ ॥

जातः कोलाहलो लोको, मिलितो नागरोऽखिलः ।
रिपुसूदनराज्ञोऽग्रे, नीतोऽहं दाण्डपाशिकैः ॥ ७४२ ॥

तेन वध्यतयाऽऽज्ञप्तः, सरलोऽथ समागतः ।
पतित्वा पादयो राज्ञः, प्राह मेऽसौ प्रियः सुतः ॥ ७४३ ॥

मुच्यतां कृपया तन्मे, सर्वस्वं गृह्यतामिदम् ।
मुक्तस्ततोऽहं राज्ञा तत्, सरलस्यार्पितं धनम् ॥ ७४४ ॥

उक्तं हितार्थिना चेदं, पुत्रोऽयं तव तिष्ठतु ।
मदभ्यर्णे तव गृहे, न युक्तोऽयं विषाङ्कुरः ॥ ७४५ ॥

दुश्चेष्टितैः पराभूतो, नष्टः पुण्योदयोऽथ मे ।
श्रेष्ठिना प्रतिपन्नं तद्, वचनं भूपतेस्तदा ॥ ७४६ ॥

स्थितो धिक्कारनिहतो, दीनोऽहं राजमन्दिरे ।
शान्ते बहुलिकास्तेये, राजदण्डभयान्मम ॥ ७४७ ॥

तथाऽपि सर्वकार्येषु, लोको मां परिशङ्कते ।
मय्येवान्यकृतं चौर्यं, दत्ते प्रत्येति नो वचः ॥ ७४८ ॥

विद्यासिद्धेन केनापि, राज्ञः श्रीगृहमन्यदा ।
मुषितं नैव स ज्ञातो, दोषो मय्येव सोऽर्पितः ॥ ७४९ ॥

ततोऽहं गाढरुष्टेन, राज्ञा बाढं कदर्थितः ।
सरलस्याऽपि वचनं, नादृतं तीव्रतेजसा ॥ ७५० ॥

उल्लम्बितोऽहं विरटन्, जीर्णा प्राग्गुटिका मम ।
भवितव्यतया दत्ता, गुटिकाऽभिनवा ततः ॥ ७५१ ॥

गतः पापनिवासायां, नगर्यामन्त्यपाटके ।
तत्रानुभूय दुःखानि, गुटिकान्तरलाभतः ॥ ७५२ ॥

पञ्चाक्षपशुसंस्थाने, पुरे गत्वा गतस्ततः ।
मुक्त्वाऽसंव्यवहाराख्यं, सर्वेषु नगरेष्वहम् ॥ ७५३ ॥

प्राप्तो बहुलिकादोषात् तिर्यक्स्त्रीत्वमनन्तशः ।
ताभ्यां मे स्तेयमायाभ्यां, स्थाने स्थाने न किं कृतम् ॥ ७५४ ॥

निगदति भवजन्तावित्यदो धीविशाला, समुदितभवभीतिश्चिन्तयामास चित्ते ।
अहह भुवि दुरन्तः स्तेयमायाविकार-स्त्यजति तदपि नैते बोधहीनो मनुष्यः

कथमयमनुभूतानन्तजन्मप्रतानः,
प्रभवति गुटिका कास्त्री किमस्य प्रतीपा ।
किमिदमखिलमन्तर्ग्राममित्राद्यनेनो
दितमिति हृदि भव्यो विस्मितस्तिष्ठति स्म ॥ ७५६ ॥

कलयति मुखरागाद्धीविशालैनमर्थम्, रहसि तदिदमस्याः प्रश्नयिष्यामि पश्चात्
इति मनसि स दध्यावागमो वेत्ति सर्वम्, सदसि सुललिता तु स्मेरनेत्रा शृणोति

संसारिजीवेनोचेऽथ, प्रोक्तोऽहं निजभार्यया ।
त्वयाऽऽर्यपुत्र ! गन्तव्यमानन्दनगरेऽधुना ॥ ७५८ ॥

तुष्टाऽस्मि त्वयि दत्तोऽयं, सुहृत् पुण्योदयश्च ते ।
सहायः सागरश्चायं, मूढतारागनन्दनः ॥ ७५९ ॥

तद्वचः प्रतिपद्याहं, गुटिकां प्राप्य तादृशीम् ।
आनन्दनगरे ताभ्यां, सहितो गन्तुमुद्यतः ॥ ७६० ॥

इति सपदि निशम्य घ्राणदौर्जन्यवार्ता-
मपि च निचितगूढस्तेयमायाविपाकम् ।
य इह निभृतचित्तः स्यात् स्वतत्त्वप्रबुद्धः,
स भुवि शुचियशःश्रीभोगसौभाग्यमेति ॥ ७६१ ॥

॥ सप्तमः स्तबकः ॥

अथास्त्यानन्दनगरं, बहिरङ्गमनोहरम् ।
युक्तं सुपर्वभिर्लोकैः, पुरन्दरपुरोपमम् ॥ १ ॥

तत्रास्ति केसरी भूपः, प्रत्यर्थिद्विपदर्पहृत् ।
गुणरत्नदरी देवी, तस्यास्ति जयसुन्दरी ॥ २ ॥

अस्ति तन्नगराधारो, वाणिजो हरिशेखरः ।
भार्या बन्धुमती तस्य, सुवंशा गिरिभूरिव ॥ ३ ॥

रूपस्येव परं रूपं, श्रियो मूर्तिरिवापरा ।
तस्याः कुक्षावहं भद्रे, भवितव्यतया धृतः ॥ ४ ॥

प्रासूत पूर्णे काले सा, मित्राभ्यां मां समन्वितम् ।
हृष्टौ सा च पिता चाभ्यां, सुहृदौ मे न लक्षितौ ॥ ५ ॥

पितृभ्यां मे कृतं नाम, यथाऽयं धनशेखरः ।
मित्राभ्यां सहितस्ताभ्यां, जातोऽहं विलसन् सुखी ॥ ६ ॥

प्राप्तश्च यौवनं भद्रं, स्मरसिंहवनं तदा ।
त्यक्त्वा धर्मकलामेकां, संप्राप्ताः सकलाः कलाः ॥ ७ ॥

तदा सम्पादितास्तेन, सुहृदा सागरेण मे ।
विततािश्चित्तकल्लोलाः, प्रक्षुब्धेन क्षणे क्षणे ॥ ८ ॥

धनमेव जगत्सारं, श्लाघायाः कारणं धनम् ।
राजाद्या यद् विशिष्यन्ते, तल्लोके धनजृम्भितम् ॥ ९ ॥

तपःश्रुतवयोवृद्धा, धनवृद्धस्य किङ्कराः ।
एका धनकला पूज्या, तच्चान्द्रीवेश्वराश्रिता ॥ १० ॥

यावन्न दृष्टा रत्नौघास्तावन्मे निर्वृतिः कुतः ।
गत्वा देशान्तरं कुर्यां, तद् गृहं रत्नपूरितम् ॥ ११ ॥

तातस्य सन्निधावीदृग्विकल्पप्रेरितो गतः ।
उक्तं मयाऽनुजानीहि, तात ! कर्तुं धनार्जनम् ॥ १२ ॥

गच्छाम्यहं विदेशेषु, स्फोरयामि च पौरुषम् ।
पिता प्राह धनं तेऽस्ति, दानभोगक्षमं बहु ॥ १३ ॥

तदेव त्वं नियुञ्जानः, कुलप्राप्तं यथेच्छया ।
गृहे तिष्ठ वियोगं तु, सोढुं शक्नोमि नो तव ॥ १४ ॥

मयोक्तं पूर्वपुरुषश्रीर्मातेवोपभुज्यते ।
स्तनन्धयेन यूनां तु, तस्या भोगस्त्रपाकरः ॥ १५ ॥

तन्मदुत्साहभङ्गोरुभूतज्वरनिनीषया ।
महानियमवत् तात, सोढव्या विरहव्यथा ॥ १६ ॥

दृढं ज्ञात्वाऽथ निर्बन्धं, जगौ मां हरिशेखरः ।
वत्स ! संपूर्यतामिच्छा, दूरे देशान्तरं परम् ॥ १७ ॥

विद्यन्ते कुटिला लोकाः, कामिन्यो वञ्चनोद्यताः ।
भूयांसो दुर्जनाः स्तोकाः, सज्जना वणिजः शठाः ॥ १८ ॥

भाण्डजातं च दुष्पाल्यं, विकारि नवयौवनम् ।
निरागःकुपिताश्चौरा, दुर्बोधा कार्यपद्धतिः ॥ १९ ॥

क्वचिद् विज्ञेन मूर्खेण, क्वचित् क्वापि दयालुना ।
क्वचित् क्रूरेण धृष्टेन, क्वचिद् भीतिभृता क्वचित् ॥ २० ॥

कृपणेन क्वचित् क्वापि, त्यागिना बकवृत्तिना ।
क्वचित् क्वापि विदग्धेन, भाव्यं तत् सुधिया त्वया ॥ २१ ॥

मयोक्तं गीः प्रमाणं मे, तातस्येयं महोदया ।
प्राप्तार्थो गृहमेष्यामि, सत्त्वमात्रधनोप्यहम् ॥ २२ ॥

इत्युक्त्वा पितरौ नत्वा, निर्गतो रुदतोस्तयोः ।
सार्धमान्तरमित्राभ्यामहं देशान्तरं प्रति ॥ २३ ॥

क्रमाज्जयपुरे प्राप्तो, दक्षिणाम्भोधिपार्श्वगे ।
बहिर्वने निषण्णश्च, प्रवृत्त इति चिन्तितुम् ॥ २४ ॥

उल्लङ्घ्याब्धिं चलद्वीचिं, रत्नद्वीपे व्रजामि किम् ।
चण्डिकां वा स्वरुधिरैस्तर्पयित्वाऽर्थये धनम् ॥ २५ ॥

पातालं वा खनाम्युच्चैः, शेषव्यापारवर्जितः ।
आनयाम्यथ वा गत्वा, महाद्रौ रसकूपिकाम् ॥ २६ ॥

विकल्पयत इत्थं च, सागरक्षोभितस्य मे ।
पुरःस्थिते पपातोच्चैर्दृष्टिः किंशुकपादपे ॥ २७ ॥

प्ररोहो भूमिसंप्राप्तस्तच्छाखाया विनिर्गतः ।
दृष्टो मया ततश्चायं, खन्यवादो हृदि स्मृतः ॥ २८ ॥

नास्त्येव क्षीरवृक्षस्य, प्ररोहो धनवर्जितः ।
स्तोकं वा भूरि वा तत्र, ध्रुवं बिल्वपलाशयोः ॥ २९ ॥

प्ररोहे भूरि तत् स्थूले, तनुके स्तोकमुच्यते ।
रात्रौ ज्वलति तद् भूरि, सोष्मणि स्वल्पमीरितम् ॥ ३० ॥

विद्धे तत्र भवेद् रक्तं, यदि रत्नानि लक्षयेत् ।
अथ क्षीरं सितं रूप्यं, पीतं चेत् कनकं भवेत् ॥ ३१ ॥

प्ररोहः स्यादुपर्युच्चैर्यन्मात्रोऽधोऽपि तावति ।
प्रदेशे निहितं नूनं, विद्यते तन्निधानकम् ॥ ३२ ॥

उपरिष्टात् तनुश्चेत् स्यादधस्तात् पृथुलो यदि ।
प्ररोहोऽसौ निधिं प्राप्तो, विपरीतस्तु सोऽन्यथा ॥ ३३ ॥

अयं पुनः पलाशस्य, प्ररोहो दृश्यते तनुः ।
स्तोकं द्रव्यमिहास्तीति, तच्चित्ते चिन्तितं मया ॥ ३४ ॥

नखविद्धात् ततः क्षीरं, पीतवर्णं विनिर्गतम् ।
ततो मया सुवर्णेन, भाव्यमत्रेति भावितम् ॥ ३५ ॥

तद्देशो विधिना खातः, सागरप्रेरणादथ ।
दृष्टं भृतं च दीनारैस्तत्रैकं ताम्रभाजनम् ॥ ३६ ॥

सहस्रमात्रं तद् वित्तं, प्राप्तं स्फीतश्च सागरः ।
पुण्योदयगुणो मोहान्मया तत्रैष रोपितः ॥ ३७ ॥

भाण्डमूल्यमभूत् तन्मे, प्रविष्टो नगरे ततः ।
बकुलश्रेष्ठिना दृष्टो, हट्टमार्गे वृषोज्ज्वलः ॥ ३८ ॥

कृतं संभाषणं तेन, वितताः स्नेहतन्तवः ।
नीतश्च भवने स्वीये, भोजितश्चारुभोजनम् ॥ ३९ ॥

पृष्टः कुलाभिधानादि, मया प्रोक्तं यथास्थितम् ।
योग्यं ज्ञात्वा कमलिनीं, स्वां पुत्रीं परिणायितः ॥ ४० ॥

ततस्तेनोदितं वत्स, स्वीयं गृहमिदं तव ।
अत्र तिष्ठ निरुद्विग्नो विलसन् सह वत्सया ॥ ४१ ॥

मयोक्तं स्वार्जितं वित्तं, विना भोगो विडम्बना ।
प्रस्थापय सुसार्थेन, रत्नद्वीपं व्रजामि तत् ॥ ४२ ॥

श्रेष्ठी प्राह कृतं वत्स !, समुद्रोल्लङ्घनेन ते ।
मदीयेन धनेन त्वमत्रैव धनमर्जय ॥ ४३ ॥

मयोक्तं यदि निर्बन्धस्तवायं तत् पृथग्गृहे ।
स्थितः स्वीयेन वित्तेन, पणेऽहं पृथगापणे ॥ ४४ ॥

श्रेष्ठिनाऽपि तथेत्युक्ते, लग्नस्तत्र धनार्जने ।
तेन सागरमित्रेण, प्रेर्यमाणः क्षणे क्षणे ॥ ४५ ॥

गता दयालुता नष्टा, धर्मधीः क्षीणमार्जवम् ।
कर्मादानानि सर्वाणि, कृतानि बहुशो मया ॥ ४६ ॥

तृड्बुभुक्षे मया सोढे, धनलोभान्धचेतसा ।
रात्रावपि न सुप्तोऽहं, नापि भोगा निषेविताः ॥ ४७ ॥

क्लेशेन तावता सार्द्धं, सहस्रं तदभूत् ततः ।
सहस्रद्वयवाञ्छाऽभूत्, तत्प्राप्तौ चायुतस्पृहा ॥ ४८ ॥

प्राप्तं तदप्युपायेन, ततो लक्षे गतं मनः ।
नानोपायप्रसक्तेन, मया तदपि मीलितम् ॥ ४९ ॥

ततोऽपि प्रयुतेच्छाऽभूत्, सागराज्ञास्थितस्य मे ।
कालेन भूयसा साऽपि, पूरिता क्लेशकोटिभिः ॥ ५० ॥

कोटिप्राप्तौ ततो वाञ्छा, जाता मे साऽपि पूरिता ।
बहूपायैर्महारम्भैर्नृपसेवादिवृत्तिभिः ॥ ५१ ॥

पुण्योदयस्य माहात्म्याद्, यावत् कोटिरपूर्यत ।
सागरः प्रेरयामास, कोटीनां तावदर्जने ॥ ५२ ॥

इच्छाऽनिवर्तनीयाऽभूत्, ततः सागरलङ्घने ।
बकुलः श्रेष्ठिनः स्वीयोऽभिप्रायश्च निवेदितः ॥ ५३ ॥

स प्राह पूर्यमाणो हि, पुरुषो भूरिभिर्धनैः ।
ज्वालाभिरिन्धनैरग्निरिवेच्छाभिः प्रवर्धते ॥ ५४ ॥

न कदापि निवृत्तिः स्यात्, तस्य रत्नाचलैरपि ।
श्रेयसी तद् धृतिः पुंसां, धनलोभान्धता तु न ॥ ५५ ॥

तिष्ठात्रैव नियुञ्जानस्तदिदं द्रविणं बहु ।
मयोक्तं तात ! मा वादीरेवं धुर्य ! विवेकिनाम् ॥ ५६ ॥

लक्ष्मीः क्लीबादिव भवेन्निरारम्भात् पराङ्मुखी ।
कुटिलेव विटं त्यक्तुं सारम्भं तु न वाञ्छति ॥ ५७ ॥

यो न मुञ्चति संरम्भं, प्राप्तैः क्लेशशतैरपि ।
अङ्कस्थले पतत्यस्य, लक्ष्मीरेत्य स्वयंवरा ॥ ५८ ॥

स्तोकप्राप्त्यैव सन्तुष्टे, श्रियो रागो न वर्द्धते ।
रतिं बध्नाति करिणी, न हि स्वल्पजलाश्रये ॥ ५९ ॥

अनुजानीहि मे तात !, रत्नद्वीपे गमं ततः ।
श्रेष्ठी प्राह न तत्रापि, श्रीर्भाग्यं लङ्घयिष्यति ॥ ६० ॥

तथाऽपि यदि ते वत्स, निर्बन्धो दुरतिक्रमः ।
अनुज्ञातो मयाऽसि त्वं, गच्छ तद् यत्र रोचते ॥ ६१ ॥

ततः प्रमुदितो मुक्त्वा, प्रमदां सदने पितुः ।
पृथक् पूरितपोतौघैः, सहितोऽन्यैर्महाधनैः ॥ ६२ ॥

अन्तर्मित्रयुतः काले, शुभे विहितमङ्गलः ।
यानपात्रं समारुह्य, चलितो वारिधावहम् ॥ ६३ ॥

मध्येऽब्धेर्यानपात्रौघैश्चलद्भिर्धनिनां हृता ।
अन्तर्व्योमव्रजद्देवविमानश्रीः सितध्वजैः ॥ ६४ ॥

तद्वेगविचलद्वीचिबद्धफेनोऽम्बुधिर्बभौ ।
सहास इव संप्रेक्ष्य, वणिगुत्साहसाहसम् ॥ ६५ ॥

तरङ्गहस्तैर्विततैरालिङ्गन्निव वारिधिः ।
पप्रच्छ यानपात्राणां, स्वागतं गर्जितच्छलात् ॥ ६६ ॥

वार्द्धौ वेगं दधुः पोता, उत्साह वणिजामिव ।
दोःस्थ्यैरिव ततः क्षुब्धैः कच्छपैः प्रपलायितम् ॥ ६७ ॥

प्राप्तानि यानपात्राणि, रत्नद्वीपं सुवायुना ।
वणिग्भिः प्राभृतं दत्त्वा, तत्र भूपः प्रसादितः ॥ ६८ ॥

जगृहुः प्रतिभाण्डानि, तेऽथ भाण्डौघविक्रयात् ।
प्रतिचेलुः प्राप्तलाभाः, स्वदेशे शेषवाणिजाः ॥ ६९ ॥

तत्रैव स्थापितोऽहं तु, सागरेण प्रसर्पता ।
प्रारब्धं रत्नवाणिज्यं, विधाय वितताऽपणम् ॥ ७० ॥

अन्यदैकाऽऽगता वृद्धा, नारी मां प्रत्यवोचत ।
अस्त्यानन्दपुरे राजा, केसरी तत्प्रिये उभे ॥ ७१ ॥

जयसुन्दर्याह्वयैका, परा कमलसुन्दरी ।
जातान् जातान् सुतान् हन्ति, गृध्नू राज्यसुखे नृपः ॥ ७२ ॥

अपत्यस्नेहतो नष्टा, ततः कमलसुन्दरी ।
गर्भिणी मां सखीं लात्वा, महाटव्यां पपात च ॥ ७३ ॥

तत्रानुभूतः क्लेशौघो रात्रिशेषे च वेदना ।
जाता शूलाङ्गभङ्गाद्यैस्तस्या हृदयदारिणी ॥ ७४ ॥

प्रसवासन्नतां मत्वा, वाचा साऽऽश्वासिता मया ।
कुर्वत्या मम तत्कालोचितं कर्म मुमूर्च्छ सा ॥ ७५ ॥

योनिद्वारेण निरगात्, दारकः स्वामिनी मृता ।
वज्राहतेव जाताऽहं, भूताविष्टेव शून्यहृत् ॥ ७६ ॥

प्रवृत्ता च प्रलपितुं, देहि स्वामिनि ! मे गिरम् ।
क्व गताऽसि सुतं हित्वा, यस्यार्थे राज्यमुज्झितम् ॥ ७७ ॥

गतैवं विलपन्त्या मे, रजनी रविरुद्गतः ।
तत्पथेनेयुषा दृष्ट्वा, सार्थवाहेन तादृशी ॥ ७८ ॥

आश्वास्य तेन वृत्तान्तः, पृष्टो निगदितो मया ।
विस्मितोऽसौ मया पृष्टः, क्व गन्तव्यं त्वयाऽनघ ! ॥ ७९ ॥

यास्यामि स जगौ रत्नद्वीपं ध्यातं मया ततः ।
नीलकण्ठोऽस्ति कमलसुन्दर्यास्तत्र सोदरः ॥ ८० ॥

भागिनेयं सुसार्थेन, गत्वा तस्यार्पयाम्यहम् ।
सार्द्धं तत् सार्थवाहेन, प्राप्ता द्वीपमिमं ततः ॥ ८१ ॥

दर्शितो नीलकण्ठाय, भागिनेयो मनोहरः ।
वार्ता कमलसुन्दर्याः, सर्वा च कथिता मया ॥ ८२ ॥

खेदगर्भोऽस्य हर्षोऽभूद्, हरिरित्यभिधा कृता ।
दारकस्याथ सोऽस्याभूद् वर्धमानोऽतिवल्लभः ॥ ८३ ॥

ग्राहितोऽसौ कलाः सर्वाः, संप्राप्तश्चारुयौवनम् ।
श्रिया सुरकुमारस्याकारं न्यक्कुरुते कृती ॥ ८४ ॥

अस्योक्तः पूर्ववृत्तान्तो, मयाऽनेन श्रुतः पुनः ।
भवानानन्दनगरादागतो वणिजां वरः ॥ ८५ ॥

ततः स(स्व)देशजं मत्वा, त्वां द्रष्टुं सोऽभिवाञ्छति ।
तत्समीपं ततो गन्तुं, भवानर्हति कोविदः ॥ ८६ ॥

ततो हरिकुमारस्य, वसुमत्या तया समम् ।
गतोऽभ्यर्णं तया तस्य, ज्ञापितोऽहं जहर्ष सः ॥ ८७ ॥

अस्थापयत् समालिङ्ग्य, गाढं मामर्धविष्टरे ।
जगौ चोक्तोऽम्बया तातमित्रं मे हरिशेखरः ॥ ८८ ॥

त्वं च तस्य सुतस्तेन, भ्राताऽसि मम सर्वथा ।
मयोक्तं यादृशस्तातो, भृत्यः केसरिभूपतेः ॥ ८९ ॥

तादृशस्तेऽहमप्यस्मि, तद् भृत्ये कोऽयमादरः ।
ततः सोऽकारयद् गाढं, तुष्टो मित्रागमोत्सवम् ॥ ९० ॥

ततो हरिकुमारेण, सह लीलां वितन्वतः ।
दिनानि मे सुखं यान्ति, संप्राप्तोऽथ मधूत्सवः ॥ ९१ ॥

ततो हरिकुमारोऽसौ, मित्रमण्डलराजितः ।
मदन्वितो ययौ द्रष्टुं, वने मधुकृतश्रियम् ॥ ९२ ॥

सहकारतले तत्र, स्थितः कोकिलकूजितैः ।
प्रपञ्चितस्मरयशःपटहध्वनिविभ्रमे ॥ ९३ ॥

तावत् तत्रागता काचिद्, व्रतिनी रौद्ररूपभृत् ।
वृद्धा सा चित्रालिखितां, कन्यां तस्य करे ददौ ॥ ९४ ॥

कुमारभावं पश्यन्ती, सा ततः स्तिमिता स्थिता ।
सविकारं तमाक्षिप्तमालोक्य च विनिर्गता ॥ ९५ ॥

कुमारस्तां मुहुः पश्यन्, दृष्टो मित्रैः पराहतः ।
दीर्घनिःश्वासहुङ्काराव्यक्तवाग्मूर्द्धकम्पनैः ॥ ९६ ॥

अभूत् क्षणं स मन्दाक्षः क्षणं विस्फारितेक्षणः ।
क्षणं स्मेरः क्षणं लीनः, क्षणक्षणविलक्षणः ॥ ९७ ॥

सस्मितं मन्मथः प्रोचे, ततो नानारसाकुलम् ।
किं नरीनृत्यते चित्ते, कुमार ! स्फारविभ्रमैः ॥ ९८ ॥

विदग्धः सोऽवदत् तस्मै, निह्नुवानो निजाशयम् ।
हृष्याम्यस्मादहमितश्चित्रकृत्करकौशलात् ॥ ९९ ॥

चित्रेऽस्मिन् लिखिता बाला, दत्ते नालापमेव हि ।
अन्यैस्तु विभ्रमैः सर्वैः, साक्षाद्भूतैव दृश्यते ॥ १०० ॥

विभावयामि तदिदमेतच्चित्रैककर्मणः ।
बहुक्रियाव्यग्रमना, विश्वकर्माऽपि नाधिकः ॥ १०१ ॥

किं सत्यमिदमित्यूचे, मन्मथः पद्मकेसरम् ।
सोऽप्याह प्राणिनां मित्र !, विचित्राश्चित्तवृत्तयः ॥ १०२ ॥

चित्रेऽतिकुशला कन्या, भाति चित्रकृतोऽपि मे ।
ललितः प्राह किं चित्रं, दृष्टं क्वाप्यनया कृतम् ॥ १०३ ॥

किन्नरीणामविषये, दुर्गमे सुरयोषिताम् ।
विद्याधरीणां दुर्लङ्घ्ये, दुष्प्रवेशेऽन्ययोषिताम् ॥ १०४ ॥

चित्ते गूढे कुमारस्य, सत्त्वसारे न दृश्यते ।
किमेतया कृतं चित्रमित्यूचे पद्मकेसरः ॥ १०५ ॥

विभ्रमः प्राह किं चित्रं, नन्वाश्चर्यमिदं स्फुटम् ।
मूढ ! श्लेषादिदं ह्येतदित्यूचे पद्मकेसरः ॥ १०६ ॥

कपोलोऽवक् कथं गम्यं, हृतमस्य मनोऽनया ।
मूढ ! लिङ्गैरतिव्यक्तैरित्यूचे पद्मकेसरः ॥ १०७ ॥

यावन्न भवति श्रान्तं, मनः कामाध्वलङ्घनात् ।
न निःश्वासादयो भावास्तावदाविर्भवन्ति हि ॥ १०८ ॥

कुमारमेव पृच्छ स्याद्, यदि न प्रत्ययो मयि ।
प्रोचे हरिकुमारोऽथ कृतं यत्तत्प्रलापतः ॥ १०९ ॥

चारु प्रश्नोत्तरं किञ्चित्, पठ तावदनाविलः ।
जगावथ विनोदार्थं, सहासं पद्मकेसरः ॥ ११० ॥

हृदि प्राप्नोति कश्चित्रं, कां चित्रामधिगत्य मे ।
वाचामाचारपूतात्मा, साधुस्त्यजति कां पुनः ॥ १११ ॥

श्रुत्वेदं शून्यहुङ्कारं, कुमारो व्यग्रधीर्ददौ ।
पुनः पपाठ विस्पष्टधृतये पद्मकेसरः ॥ ११२ ॥

चित्रकन्याहृतस्वान्तस्तथाऽप्यस्थात् स तादृशः ।
स्मित्वा सर्वे ततोऽपश्यन्, वदनानि परस्परम् ॥ ११३ ॥

चेतो हरिकुमारस्य, प्रत्यावृत्तं तदीक्षणात् ।
श्लोकं श्रुत्वाऽथ तं तेनावष्टम्भाद् दत्तमुत्तरम् ॥ ११४ ॥

ततोऽतिविस्मितः पद्मकेसरोऽन्यत् पुनर्जगौ ।
कथं बध्नाति काः प्राज्ञः, के गीतरसलम्पटाः ॥ ११५ ॥

तदपि प्रत्युदतरद्, विचिन्त्य, हृदये हरिः ।
सारङ्गाः पप्रच्छाथ विलासोऽन्यज्जैनेन्द्रमतवासितः ॥ ११६ ॥

प्राबल्यं केन वाच्यं कलयति रसनां कं भवेत् पक्षिणः का,
संबुद्धिर्बुद्धिमन्तः क्व च विरचनया यत्नमुल्लासयन्ति ।
कः प्रार्थ्यः केन तुल्योऽलस इह गरगीः(?) कीदृशी स्यात् पुराऽर्था,
व्यापद्वल्लीकृपाणी जयति जिनपतेः कीदृशी ब्रूहि वाणी ॥ ११७ ॥

हरिर्जगौ बृहद् व्यस्तसमस्तं खल्विदं ततः ।
पुनः पठ पपाठासौ, विचार्योदतरद्धरिः ॥ ११८ ॥

तच्छ्रुत्वा विस्मितश्चित्ते, पुनः पप्रच्छ तादृशम् ।
कुमारस्य विलासार्थी, विलासः प्रश्नकोविदः ॥ ११९ ॥

पूजायां किं पदं स्यात् कुरु दहनवपुर्बोधनं निःस्तनः कः,
शून्यं कीदृग् पुरं स्याद् वनमपि च घनं कीदृशं नैति शोभाम् ।
का वेश्या का महत्री समिति भवति कः सत्त्वभाजां भयानाम्,
धावल्लावण्यपुरे वपुषि जिनेपतेः का निमज्जन्ति नित्यम् ॥ १२० ॥

तदपि प्रत्युदतरद्, विस्फुरद्बुद्धिपाटवः ।
हरिः परिस्मृतव्यस्तसमस्तपदपद्धतिः ॥ १२१ ॥

जहास विमलश्चारु, कुमारोऽस्याहरन्मदम् ।
विलासोऽवक् पठत्वन्यः, सर्वस्मयहरो ह्ययम् ॥ १२२ ॥

मन्मथोऽभिदधे क्लृप्तं, मया स्पष्टान्धकद्वयम् ।
तदर्थं कथयत्वार्यः, सुविभाव्याविलम्बतः ॥ १२३ ॥

राजन् ! रूपेण नारीणां, हरसेवालताफलम् ।
कामाज्ञयाऽपि वामाक्ष्यो, यान्ति नैतावतीं भुवम् ॥ १२४ ॥

सदाख्यातिमनोज्ञश्रीली(र्ली)लाढ्यगुणगौरवम् ।
अभिधत्ते च तेजस्ते, रणसंमर्दधीरताम् ॥ १२५ ॥

हरिर्जगाद हरसे, बालतायाः फलं त्रपाम् ।
इत्येष प्रथमे भङ्गः, सदाख्येति द्वितीयके ॥ १२६ ॥

गूढतूर्यं मया पद्यमथैकं विनिवेदितम् ।
सम्पूर्णः पठितः श्लोको, हरिणा परिपूर्य तत् ॥ १२७ ॥

दाने मेघो रतो धर्मे, प्रशस्तः प्रौढतेजसा ।
यस्तनोति सतां प्रीतिं, यशस्तस्य समेधते ॥ १२८ ॥

तच्छ्रुत्वा विस्मिताः सर्वे, वयस्या धीरहो परा ।
कुमारस्येति सोऽप्येवं, व्यस्मरच्चित्रकन्यकाम् ॥ १२९ ॥

पारापतं प्रियाचाटुकारिणं प्रेक्ष्य तां स्मरन् ।
अथ सोऽभूद् भृशं कम्प्रः, पतच्छिल इव ह्रदः ॥ १३० ॥

वाताहतो दीप इव, मानीवारिपराजितः ।
सम्यक्त्वबानविरतो भवभीत इव क्षणात् ॥ १३१ ॥

ततो मयोक्तं किमिदं कुमार ! तव बाधते ।
स प्राह नागताऽऽसीन्मे, निद्रा रात्रौ शिरोऽर्तितः ॥ १३२ ॥

गच्छन्तु वाऽत्र तिष्ठन्तु, तदेते मन्मथादयः ।
एहि त्वमेको निद्रामि, यच्चन्दनलतागृहे ॥ १३३ ॥

कुमारः प्राविशत् तत्र, मद्युक्तोऽथ गताः परे ।
पल्लवैः शिशिरैः शय्यामारूढोऽसौ कृतां मया ॥ १३४ ॥

न तत्र लभते तप्तसैकते मीनवद् रतिम् ।
विहितेऽथोपविष्टोऽसावासने कोमले मया ॥ १३५ ॥

तत्रापि नाश्नुते सौख्यं, शूलाग्रप्रोतचौरवत् ।
करोतीतस्ततो लग्नः, स्कन्धे चंक्रमणं मम ॥ १३६ ॥

तथाऽपि स्मरतापेन, मुच्यते न महीयसा ।
लङ्घिता शीतलेऽपीत्थं, बृहद्वेला लतागृहे ॥ १३७ ॥

प्रच्छन्नैस्तत् स्थितैः सर्वं कुमारस्य विचेष्टितम् ।
दृष्टं कुतूहलवशाद्, वयस्यैर्मन्मथादिभिः ॥ १३८ ॥

जयध्वनिरिव प्रौढः, पुष्पेषोस्तापदायिनः ।
उत्थितः शङ्खनादोऽथ, मध्याह्नसमये महान् ॥ १३९ ॥

मन्मथाद्यास्ततः सर्वे, संभूयैत्य लतागृहे ।
हरिमूचुर्गृहे गन्तुमधुनाऽवसरोऽस्ति नः ॥ १४० ॥

हरिर्जगौ यात यूयं, विमुच्य धनशेखरम् ।
शान्तायां शूलतापार्त्तावागमिष्याम्यहं पुनः ॥ १४१ ॥

प्रतीत एव सर्वेषां, तस्य तद्धेतुरान्तरः ।
तथाप्येतादृशो जल्पश्छलान्मित्रैः प्रवर्तितः ॥ १४२ ॥

आयुर्वेदविदग्धोऽसि, भोः कपोल ! निरूपय ।
विकारः किंनिमित्तोऽयं, शमोपायोऽस्य कः पुनः ॥ १४३ ॥

कपोलः प्राह दोषाणां, वायुः पित्तं कफस्तथा ।
शारीरो मानसो हेतू, रजश्च तम एव च ॥ १४४ ॥

प्रशाम्यत्यौषधैः पूर्वो, दिव्ययुक्तिव्यपाश्रयैः ।
मानसो ज्ञानविज्ञानधैर्यस्मृतिसमाधिभिः ॥ १४५ ॥

रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥ १४६ ॥

सस्नेहमुष्णं तीक्ष्णं च, द्रवमम्लरसं पटु ।
विपरीतगुणैः पित्तं, द्रव्यैराशु प्रशाम्यति ॥ १४७ ॥

गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छलाः ।
श्लेष्मा(म)णः प्रकृतिं यान्ति, विपरीतगुणैर्गुणाः ॥ १४८ ॥

कफं स्वाद्वम्ललवणाः, कषायकटुतिक्तकाः ।
जनयन्त्यनिलं पित्तं, कट्वम्ललवणा रसाः ॥ १४९ ॥

स्वाद्वम्ललवणा वायुं, कषायस्वादुतिक्तकाः ।
जयन्ति पित्तं श्लेष्माणं, कषायकटुतिक्तकाः ॥ १५० ॥

अजीर्णप्रभवा रोगास्तच्चाजीर्णं चतुर्विधम् ।
आमं विदग्धं विश्र(ष्ट)ब्धं, रसशेषं तथा परम् ॥ १५१ ॥

आमे सदृशगन्धः स्याद्, विदग्धे धूमगन्धता ।
विश्र(ष्ट)ब्धे गात्रभङ्गश्च, रसशेषेऽन्नद्वेषिता ॥ १५२ ॥

आमेषु वमनं कुर्याद्, विदग्धे चाम्लकं पिबेत् ।
विश्र(ष्ट)ब्धे स्वेदनं कुर्याद्, रसशेषे तथा स्वपेत् ॥ १५३ ॥

इत्थं स्थिते कुमारस्याजीर्णं तापेन लक्ष्यते ।
पित्तं विदग्धावस्थेन, क्षोभितं तेन वायुयुग् ॥ १५४ ॥

अन्तस्तापश्च शूलं च, वर्धतेऽस्य ततस्तनौ ।
प्रकृत्याद्यविदन् यत्तत्, किं ब्रूषे विभ्रमो जगौ ॥ १५५ ॥

कपोलः प्राह विज्ञातं प्रकृत्याद्यखिलं मया ।
विकारोऽयमजीर्णस्य, कुमारस्यापरस्य न ॥ १५६ ॥

ततोऽहो मूढताऽस्येति, ध्यात्वा चक्रे स्मितं हरिः ।
प्राहुर्वयस्याः संसिद्धं, कार्यं नस्त्वद्विनोदतः ॥ १५७ ॥

सा परिव्राजिकैवास्य, विकारस्य तु भेषजम् ।
कार्यं पर्येषणं तस्यास्तत् कुमाराविलम्बतः ॥ १५८ ॥

ततोऽहं प्रहितस्तेन, तदन्वेषणकाम्यया ।
पश्यामि स्मान्तराले तां, नगराभिमुखं व्रजन् ॥ १५९ ॥

नत्वा पृष्टा च सा चित्रपट्टिकोदन्त एष कः ।
केयं कन्या किमर्थं चोच्चलिताऽसि निवेदय ॥ १६० ॥

सा प्राह शृणु भद्रैतत्सम्बन्धमिह विद्यते ।
नीलकण्ठस्य नृपतेर्देवी शिखरिणी शुचिः ॥ १६१ ॥

प्राप्ताऽहं तद्गृहे भिक्षाकृते दृष्टो विषादभाग् ।
सर्वः परिजनः पृष्टा, देवी तत्कारणं जगौ ॥ १६२ ॥

मयूरमञ्जरी पुत्री, जीविताद॒पि मेऽधिका ।
बन्धुले ! ते प्रतीतैव, सेयमातपनोदयात् ॥ १६३ ॥

केनापि हेतुना शून्या, जाता तीव्रज्वरारतिः ।
भूषणानि न गृह्णाति, नाङ्गरागं तनोति च ॥ १६४ ॥

नास्वादयति ताम्बूलं, कन्दुकेन न खेलति ।
मुहुर्धावत्यभिद्वारं, सखिभ्यः परिरुष्यति ॥ १६५ ॥

तन्मां भगवति ! ब्रूहि, किमेषा चिन्तयत्यहो ।
कदा च लप्स्यतेऽभीष्टं, निमित्तेऽसि स्फुरन्मतिः ॥ १६६ ॥

दृष्ट्वा होरां ततः प्रोक्तं, ध्वजादिन्यासतो मया ।
एषा जीवं चिन्तयन्ति, नरं नृपसुतं हरिम् ॥ १६७ ॥

ध्वजो धूमस्तथा सिंहः, श्वा बलीवर्द इत्यपि ।
खरो गजेन्द्रो ध्वाङ्क्षश्च, अष्टायाः परिकीर्तिताः ॥ १६८ ॥

कालवासरवेलानां, मुहूर्तककुभोस्तथा ।
नक्षत्रग्रहयोश्चैव, निसर्गबलमष्टमम् ॥ १६९ ॥

ध्वजः खरस्तथा ध्वांक्षः, प्रस्तुते च प्रयोजने ।
समापन्नास्त्रयो ह्याया न्यस्ताद् गोमूत्रिकात्रयात् ॥ १७० ॥

प्रथमाद् ज्ञायते चिन्ता, द्वितीयात् तु शुभाशुभम् ।
तृतीयात् कालनिर्देशं, कुर्यादायादिति श्रुतिः ॥ १७१ ॥

शुनि ध्वजे वृषे चैव, जीवचिन्ता प्रकीर्तिता ।
सिंहवायसयोर्मूलं, धातुर्धूमेभरासभे ॥ १७२ ॥

ध्वजस्य प्रथमं पातात्, तज्जीवं चिन्तयत्यसौ ।
नरादिव्यक्तिबोधश्च, स्फुटः कालबलादिभिः ॥ १७३ ॥

अवश्यं तस्य लाभश्च, धूमोपरि खरागमात् ।
अद्यैव च तृतीयस्य, पाताद् ध्वाङ्क्षस्य यत् स्मृतम् ॥ १७४ ॥

स्थानं लाभं च कुरुते, रासभो ध्वजधूमयोः ।
सिंहस्योपरि नाशं तु, शेषेषु तु स मध्यमः ॥ १७५ ॥

ध्वजकुञ्जरयोर्वर्षं, मासो वृषभसिंहयोः ।
पक्षाः श्वखरयोर्ज्ञेया, धूमवायसयोर्दिनम् ॥ १७६ ॥

ततः शिखरिणी तुष्टाऽऽसन्नजामातृलाभतः ।
जगाद यत् त्वया प्रोक्तं, तत्र शङ्का न काचन ॥ १७७ ॥

अस्याः सख्या मम प्रोक्तं प्रातर्दृष्टोऽनया हरिः ।
तत्रानुरागातिशयात्, ततः प्राप्ता दशामिमाम् ॥ १७८ ॥

करोतु भगवत्येव, तदस्यास्तत्समागमम् ।
बोद्धुं भावं कुमारस्य, चित्रितेयं ततो मया ॥ १७९ ॥

तत्प्रदर्शनतो ज्ञात्वा, कुमाराशयमागता ।
देवी प्रोक्तवती मुष्टिमध्येऽसौ मम वर्तते ॥ १८० ॥

तया मयूरमञ्जर्याः प्रोक्तं प्रत्येति सा तु न ।
शिखरिण्या ततो राज्ञे, प्रोक्तो व्यतिकरोऽखिलः ॥ १८१ ॥

प्रहिताऽऽनयनायाहं, हरेस्ताभ्यां ततो द्रुतम् ।
एष व्यतिकरश्चित्रपट्टिकागोचरोऽखिलः ॥ १८२ ॥

एषा सा कन्यकाहेतोरितश्चोच्चलिताऽस्म्यहम् ।
ततो मयोक्तमनघे !, किं पुनस्त्वत्करेऽस्त्यदः ॥ १८३ ॥

उक्तं बन्धुलया भद्र !, कुमारप्रत्ययावहम् ।
मयूरमञ्जरीहस्तलिखितं चित्रमस्त्यदः ॥ १८४ ॥

मयोक्तं चारु विहितं, कुमारस्यार्पितास्त्वया ।
प्राणास्ततो मया सार्द्धं, साऽऽगता हरिसन्निधौ ॥ १८५ ॥

मया बन्धुलया चोक्तं, हरये राजशासनम् ।
उक्तः सर्वोऽपि वृत्तान्तः, श्रद्धत्ते न हरिः परम् ॥ १८६ ॥

ततोऽर्पितो बन्धुलया, हरेश्चित्रपटः करे ।
स्मरध्वजपटप्रायः, स्फुटद्विपुटचित्रितः ॥ १८७ ॥

सद्यो हरिकुमारेण, प्रोद्घाट्य स निरूपितः ।
तत्रैकत्र पुटे दृष्टं, विद्याधरयुवद्वयम् ॥ १८८ ॥

शुद्धैरालिखितं वर्णैरलक्ष्यैस्तूलिकापदैः ।
सूक्ष्मानुरूपरेखाभिः सुविभक्ताङ्गशोभया ॥ १८९ ॥

चित्रया बिन्दुविच्छित्त्या विस्फुटेन मनोहरम् ।
निम्नोन्नतविभागेन, भूषणैश्चोचितोचितैः ॥ १९० ॥

नवस्नेहरसावेशाद् बद्धदृष्टि परस्परम् ।
चित्तैक्यपिशुनस्पष्टचेष्टाजनितविस्मयम् ॥ १९१ ॥

प्रदृष्टं लिखितं पद्यं, तस्याधस्तादिदं पुनः ।
शृङ्गाराम्भोधिपियूषमनवद्यं किमुद्धृतम् ॥ १९२ ॥

धन्यास्ता दयिताः प्रियाननविधोर्लावण्यलीलासुधा,
यासां नेत्रचकोरकैरविरतं पेपीयते सस्पृहम् ।

यासां तद्वचनैश्च चन्दनरसैरालिप्यते हृत्तटी,
ता एवाप्तजनुःफला रतिरसादेषा यथा खेचरी ॥ १९३ ॥

ततो दृष्टं चित्रपुटं, द्वितीयं राजसूनुना ।
दृष्टा च तत्र लिखिता, राजहंसी विदग्धया ॥ १९४ ॥

पद्मिनी हिमदग्धेव, म्लानेवाम्रस्य मञ्जरी ।
अर्काहतेन्दुलेखेव, पुष्पमालेव मर्दिता ॥ १९५ ॥

वनवल्लिरिव प्लुष्टा, गतविद्येव खेचरी ।
संस्पृष्टस्याम्बुना दिव्यमुकुरस्येव दीधितिः ॥ १९६ ॥

सर्वथा विगतच्छाया, शोकप्रसरदुर्बला ।
कण्ठावलम्बितप्राणा, परित्यक्ताखिलक्रिया ॥ १९७ ॥

अधस्ताल्लिखितं पद्यद्वयं तस्याश्च वीक्षितम् ।
साक्षाद्वियोगावेशेन, स्वान्तस्येव दलद्वयम् ॥ १९८ ॥

भ्रमति परितस्तीरे नीरे निजप्रतिबिम्बिनि,
प्रियतमधिया गत्वा सत्त्वात् पतत्यफलश्रमा ।
त्यजति वदनादात्तं दुःखान्मृणाललताङ्कुरम्,
विरहविधुरा शुष्यत्येषा मरालकुटुम्बिनी ॥ १९९ ॥

इयमिव भवत्यन्या प्रेयोवियोगकृशानुना,
ज्वलितहृदया नारी भारीभवन्निजजीविता ।
असुखवपुषस्तस्या न स्यात् पुराऽर्जितदुष्कृता-
नुभवकलनादन्यत् किञ्चित् फलं जनुषः किल ॥ २०० ॥

ततो हरिकुमारेण, चिन्तितं यन्ममोपरि ।
राजपुत्र्या दृढस्नेहः, कौशलेन प्रदर्शितः ॥ २०१ ॥

विद्याभृन्मिथुनालेखात्, स्वाभिलाषः स्फुटीकृतः ।
इष्टाप्राप्तिकृतं दैन्यं, राजहंस्याश्च चित्रतः ॥ २०२ ॥

दर्शितो मन्मथादीनां, तेन चित्रपटस्ततः ।
तैरुक्तं राजहंस्येषा, गत्वा संधीर्यतां द्रुतम् ॥ २०३ ॥

सर्वेऽपि राजसदने, ततः प्रमुदिता गताः ।
मयूरमञ्जरीं नीलकण्ठश्च हरये ददौ ॥ २०४ ॥

ततः शुभेऽह्नि संजातो, विवाहस्य महोत्सवः ।
पाणौ गृहीत्वा तां प्राप्तो, हरिर्हर्षं रमामिव ॥ २०५ ॥

अथ सान्तःपुरं सर्वं, राजलोकाः सबान्धवाः ।
प्रजाश्च रागं विपुलं, गुणपूर्णे हरौ दधुः ॥ २०६ ॥

इतश्च स हरिर्भूरिपुण्यवान् प्रेमनिर्भरः ।
यन्त्रितो मम पुण्येन, मद्वियोगं न वाञ्छति ॥ २०७ ॥

प्राप्ता मया तत्प्रसादाद्, विलासा देवदुर्लभाः ।
यशश्च चन्द्रविमलं, सज्जनस्पृहणीयता ॥ २०८ ॥

जनिताः कुविकल्पौघाः, सागरेण तथाऽपि मे ।
यन्ममायं हरेः सङ्गो, हेतुरर्थार्जनक्षतेः ॥ २०९ ॥

रत्नौघमिह लास्यामि, निर्विघ्नमिति चिन्तितम् ।
अत्रापि मित्ररूपो मे, विघ्नोऽयं समुपस्थितः ॥ २१० ॥

सर्वथा राजपुत्रोऽयं, त्यक्तुं शक्यश्च नाधुना ।
रुष्टे ह्यपहरेदेष, सर्वस्वमपि मामकम् ॥ २११ ॥

तद् रत्नोपार्जनं कुर्वे, हरेरपि च रञ्जनम् ।
अत्यासङ्गस्तु मित्रेऽस्मिन्, मम स्वार्थं विनाशयेत् ॥ २१२ ॥

कृतं मया यथा ध्यातं, रत्नौघो मीलितस्ततः ।
क्वचित् पश्यामि रत्नानि गतो मूर्च्छां पुनः पुनः ॥ २१३ ॥

क्वचित् स्पृशामि हस्तेन, मुहुरुच्छालयामि च ।
क्वचिद् वक्षःस्थले दत्त्वा, हर्षमग्नो भवामि च ॥ २१४ ॥

निखनामि क्वचिद् गर्त्ते, शङ्कां धृत्वोत्खनामि च ।
सुखं दिने च रात्रौ च, नाविश्वासाद् बभूव मे ॥ २१५ ॥

ध्यानं सर्वजगद्रत्नसंग्रहस्य मया धृतम् ।
स्थितोऽहं सदने नित्यं, रत्नोपार्जनलोलुपः ॥ २१६ ॥

इतश्च द्वौ नरौ कालपरिणत्यनुजीविनौ ।
कदाचिच्चक्रतुर्जल्पं, मिथो मैथुनयौवनौ ॥ २१७ ॥

यौवनेनोदितं मित्र ! भवजन्तुर्ममाधुना ।
धनशेखररूपेण, गतोऽस्ति वशवर्तिताम् ॥ २१८ ॥

तवाप्यवसरो गन्तुमस्ति तस्यान्तिकेऽधुना ।
भाषितं मैथुनेनापि, तत्सम्बन्धं कुरुष्व मे ॥ २१९ ॥

यौवनेनोदितमसौ, पूर्वं संसेवितो मया ।
तद् दृढं तव सम्बन्धं, करिष्यामि सहामुना ॥ २२० ॥

एवं तु कृतसंभाषौ, प्राप्तौ यौवनमैथुनौ ।
उक्तश्च यौवनेनाहं, वत्सलोऽयं सुहृन्मम ॥ २२१ ॥

अतोऽहमिव सर्वत्र, द्रष्टव्योऽयं सदा त्वया ।
अकृत्रिमदृशा दृष्टस्तव दास्यत्यसौ सुखम् ॥ २२२ ॥

ततो यौवनवाक्येन, तेनाहं मुदितो हृदि ।
प्रतिपन्नौ च मयका, तौ प्रीतेनान्तरात्मना ॥ २२३ ॥

मैथुनाय मया दत्तः, प्रासादः स्वान्तसंज्ञकः ।
यौवनाय च गात्राख्यस्तत्सम्बद्धो द्वितीयकः ॥ २२४ ॥

कृता विलासशौर्याद्या यौवनेन गुणा मम ।
मैथुनेन कृतोऽतृप्तो, भुक्तैः स्त्रीणां शतैरपि ॥ २२५ ॥

मैथुनेनेरितो यावद्, रन्तुमीहे पणाङ्गनाम् ।
धनरक्षापरस्तावत्, सागरो मां निषेधति ॥ २२६ ॥

इतो मैथुननिर्देश, इतः सागरलङ्घनम् ।
सम्पन्नस्तदयं न्याय, इतो व्याघ्र इतस्तटी || २२७ ||

सागरस्यातिवाल्लभ्यान्मैथुनाज्ञाऽनतिक्रमात् ।
ततो मया कृतं कर्म, दारुणं लोकगर्हितम् || २२८ ||

याः काश्चिद् बालविधवा, रण्डाः प्रोषितभर्तृकाः ।
व्रतिन्योऽन्याश्च मूल्येन, विना ताः सेविता मया || २२९ ||

ततोऽहं मैथुनहृतस्तृप्तो नैवान्त्यजास्वपि ।
योषित्सम्बन्धिभिर्लोकैस्ताडितश्च विगोपितः || २३० ||

हरिपुण्योदयबलात्, केवलं नैव मारितः ।
जीवन्मृतस्तु धिक्कारप्रहारैर्नागरैः कृतः || २३१ ||

तथाऽपि मे न मूढस्य, व्यावृत्तं मैथुनान्मनः ।
जातोऽहं प्रियमित्रेऽस्मिन्निर्मिथ्यस्नेहनिर्भरः || २३२ ||

अभूत् तुच्छमतेरित्थं, मैथुनो मम वल्लभः ।
ततोऽपि वल्लभतरः, सागरो रागरोचितः || २३३ ||

मित्रयुग्मेन तेनेत्थं, मयकाऽभिमतं सुखम् ।
दुःखितेनाप्यखण्डाभ्यां, पक्षाभ्यामिव पक्षिणा || २३४ ||

अन्तःपुरं पुरं राज्यं, हरौ रक्तमथाखिलम् ।
बभूव नीलकण्ठस्य, पराकुण्ठितविक्रमे || २३५ ||

ततोऽभूत् तस्य विपुला, समृद्धिः कोशदण्डयोः ।
जनानुरागो वल्लीनां, सम्पदा नववारिदः(दे) || २३६ ||

अथासौ कुञ्जरारूढो, राजलोकेन वेष्टितः ।
छत्रेण, ध्रियमाणेन, चारुचामरवीजितः || २३७ ||

युक्तो मयूरमञ्जर्या, पौलोम्या मघवानिव ।
पुरेऽखिले विशिष्टश्रीर्विचचार वयस्ययुग् || २३८ ||

ततश्च वीक्ष्य विपुलं, प्रजारागं हरौ नृपः ।
नीलकण्ठो दधौ चित्ते, कलुषत्वं दुराशया(यात्) ॥ २३९ ॥

अचिन्तयच्च चित्तेऽसौ, वृद्धोऽहं तनयोज्झितः ।
तन्त्रं सबान्धवं सर्वमनुरक्तं हरौ मम ॥ २४० ॥

महाबलोऽयं द्रुमवत्, तन्मामुन्मूलयिष्यति ।
वर्धमानः समुत्तोल्यबलादप्रतिबन्धकः ॥ २४१ ॥

नोपेक्षणीयस्तदयं, यतो नीतिविदो विदुः ।
अर्धराज्यहरं भृत्यं, यो न हन्यात् स हन्यते ॥ २४२ ॥

अमन्त्रयत् ततो राजा, कर्तव्यं हरिमारणम् ।
सुबुद्धमन्त्रिणा सार्धं, सोऽपि राजाऽनुवृत्तिभाग् ॥ २४३ ॥

वज्राहतोऽपि वाक्येन, तेन प्रत्यब्रवीदिदम् ।
युक्तं ते रुचितं देव, शिष्टानां युक्तबुद्धयः ॥ २४४ ॥

सुबुद्धिर्नीलकण्ठश्च, ततः स्वं स्वं गृहं गतौ ।
सुबुद्धेरथ सञ्जाताः, सङ्कल्पा मनसीदृशाः ॥ २४५ ॥

धिग् मोहसुखलुब्धत्वं, धिग् महामोहजृम्भितम् ।
धिग् राज्यं काष्ठवज्जीर्णं, कुविकल्पघुणव्रजैः ॥ २४६ ॥

जामाता भागिनेयश्च, प्रियोऽस्याभूत् पुरा हरिः ।
तृष्णाकृष्णाहिदष्टस्य, साम्प्रतं भाति शत्रुवत् ॥ २४७ ॥

राज्यलोभादमुं हन्तुं, राजा यद्यपि वाञ्छति ।
रक्षणीयस्तथाऽप्येष, नररत्नं मया हरिः ॥ २४८ ॥

ततो दमनकं चेटं, प्रच्छन्नं प्रजिघाय सः ।
तत्सन्देशं हरेः सोऽवग्, देशस्त्याज्योऽधुना त्वया ॥ २४९ ॥

सुबुद्ध्युक्तमिति श्रुत्वा, निर्भयोऽपि हरिर्मनः ।
समुद्रलङ्घने चक्रे, प्रोक्ता वार्ता च सा मम ॥ २५० ॥

यद् राजा कार्यकुपितो, मन्त्रिणा च हितैषिणा ।
आदिष्टमिति गन्तव्यमुल्लङ्घ्याम्बुनिधिं मया ॥ २५१ ॥

प्रतिष्ठस्व त्वमपि तत्, त्वां विना मम नो धृतिः ।
मयाऽपि गाढदाक्षिण्याद्, वचस्तस्य प्रतिश्रुतम् ॥ २५२ ॥

यानपात्रद्वयं सज्जीकारितं सुदृढं ततः ।
तत्रैकं मम रत्नौघैर्भृतमन्यत् पुनर्हरेः ॥ २५३ ॥

हरिर्मयूरमञ्जर्या, वसुमत्या च संयुतः ।
प्रदोषेऽहं च संप्राप्तौ, तीरं वारांनिधेरुभौ ॥ २५४ ॥

आरूढो यानपात्रे स्वे, विधावभ्युद्गते हरिः ।
तेनारुरुक्षुः स्वं पोतमप्यहं स्थापितोऽन्तिके ॥ २५५ ॥

मरुद्वेगादथ तयोर्गच्छतोर्यानपात्रयोः ।
व्यतीयुः कतिचिद् वार्द्धौ, वासरा बहुलङ्घिते ॥ २५६ ॥

अत्रान्तरे पापमित्ररूपौ सागरमैथुनो ।
ममैवं चक्रतुर्बुद्धिं, नाशितह्रीकुलक्रमौ ॥ २५७ ॥

भृतं ममैकं बोहित्थं, रत्नैरन्यद्धरेरिदम् ।
ममैवोपस्थितं भाग्यैस्तत् त्यक्तुं नैव युज्यते ॥ २५८ ॥

मयूरमञ्जरी चेयं यावद् भुक्ता न भामिनी ।
पद्माक्षी मन्थरगतिर्जघनस्तनगौरवात् ॥ २५९ ॥

रम्भोरुः क्षाममध्या च, लावण्यामृतवाहिनी ।
तावत् किं मम रम्येण, यौवनेनावकेशिना ॥ २६० ॥

तदिदं रत्नबोहित्थमेनां च हरिणेक्षणाम् ।
हरिं व्यापाद्य गृह्णामि, नान्यथा चित्तनिर्वृतिः ॥ २६१ ॥

ततो विस्मृत्य तस्योच्चैर्निर्व्याजस्नेहहृद्यताम् ।
अङ्गीकृत्य महापापं, कुलदूषणकारणम् ॥ २६२ ॥

रात्रौ शरीरचिन्तार्थं, बोहित्थान्ते स्थितो हरिः ।
मया संप्रेरितो वेगात्, द्राट्कृत्य पतितोऽम्बुधौ ॥ २६३ ॥

द्राट्कारादुत्थितैर्लोकैः, कृतः कोलाहलो महान् ।
मयूरमञ्जरी भीता, स्थितोऽहं शून्यधीरिव ॥ २६४ ॥

कर्म मे निर्घृणं तादृक्, चुकोप प्रेक्ष्य मय्यथ ।
समुद्राधिपतिर्देवस्तुतोष च हरेर्गुणैः ॥ २६५ ॥

सोऽब्धिनीरात् समुत्पाट्य, बोहित्थेऽस्थापयद्धरिम् ।
अर्थं कविरिव प्रौढं पद्ये हृदयगह्वरात् ॥ २६६ ॥

मत्तः प्रातः शशीवाभ्रान्नष्टः पुण्योदयस्तदा ।
मत्संमुखं बभाषेऽथ, स देवो भीषणाकृतिः ॥ २६७ ॥

रे नराधम पापिष्ठ !, श्रीह्रीधीपरिवर्जित ।
पापकर्मेदृशं कृत्वा, किं त्वमद्यापि जीवसि ॥ २६८ ॥

इत्युक्त्वा कम्पमानं मां, गृहीत्वाऽसौ स्थितोऽम्बरे ।
हरिः प्रणम्य तं देवमेवं स्नेहाद् व्यजिज्ञपत् ॥ २६९ ॥

मुच्यतामेष मित्रं मे, कृपालुर्मयि यद्यसि ।
आकृष्याब्धेरहं क्षेप्यो, न मित्रविरहावटे ॥ २७० ॥

अभूद् घृतं तत्कोपाग्नौ, स्नेहमुग्धं हरेर्वचः ।
मयि गाढतरं रुष्टस्ततो देवोऽब्रवीदिदम् ॥ २७१ ॥

मुग्धोऽसि त्वं न जानासि, पापस्यास्य विचेष्टितम् ।
तद् गच्छाभिमतस्थानं, यच्छाम्यस्य फलं पुनः ॥ २७२ ॥

इत्युक्त्वाऽहं तथा तेन, क्षिप्तोऽगाधमहोदधौ ।
यथा गतोऽवनितलं, पाषाण इव निष्ठुरः ॥ २७३ ॥

आगतः पुनरूर्ध्वं मां, मृतं मत्वा ययौ सुरः ।
पोतद्वयं क्रमात् प्राप्तं, वेलाकूले हरेः पुनः ॥ २७४ ॥

इतश्चानन्दनगरे, श्रुतः केसरिभूपतिः ।
मृतो हरिकुमारेण, तत्रागात् स ततो द्रुतम् ॥ २७५ ॥

जग्राह पैतृकं राज्यं, वसुमत्या निवेदिते ।
बान्धवानां समस्तेऽपि, वृत्तान्ते क्लेशवर्जितम् ॥ २७६ ॥

अनुरक्ताश्च सर्वेऽपि, लोका भूरिगुणे हरौ ।
तेनैकं रत्नबोहित्थमर्पितं जनकस्य मे ॥ २७७ ॥

इतश्च पातालतलादुन्मग्नो जलवीचिभिः ।
प्रेर्यमाणो बध्यमानः, सन्ततैस्तन्तुजन्तुभिः ॥ २७८ ॥

मत्स्यपुच्छच्छटाच्छोटैर्लुलत्कमठकण्टकैः ।
प्राप्तदुःखोऽतिविकटैर्बिभ्यच्च जलमानुषैः ॥ २७९ ॥

लोलद्भिः शङ्खनिकरैर्मकरैश्च प्रसर्पिभिः ।
उद्वृत्तैर्नक्रचक्रैश्च, संप्राप्तप्राणसंशयः ॥ २८० ॥

गहनैर्विद्रुमवनैर्मुह्यमानः कथञ्चन ।
प्राप्तोऽहं जलधेस्तीरं, सप्तरात्रेण पातकी (चतुर्भि कुलकम्) ॥ २८१ ॥

तत्रानिलकृताश्वासः, क्षुत्पिपासाऽभिबाधितः ।
भ्रान्तः फलजलार्थी सन्, प्राप्तो मरुसमं वनम् ॥ २८२ ॥

लब्धा तत्रापि च मया, प्राणवृत्तिः कथञ्चन ।
करणीयं यतोऽद्यापि, पातकं बहु वर्तते ॥ २८३ ॥

अथाकीर्णं ग्रामपुरैर्वसन्तं देशमागतः ।
रिक्तत्वाल्लज्जमानोऽहमुपतातं गतस्तु न ॥ २८४ ॥

नाशात् पुण्योदयस्याथ, मित्रद्वयजुषो मम ।
वाणिज्याचरणेऽर्धं स्यात्, कर्षणे वृष्टिरेव न ॥ २८५ ॥

सेवां कुर्वंस्ततो राज्ञो, गतो योद्धुं महाऽऽहवे ।
तत्रापि निशितास्त्रौघप्रहारैरेव पीडितः ॥ २८६ ॥

मयाऽन्यदा बलीवर्दा, गृहीता वाहनेच्छया ।
मृतास्तिलकरोगेण, सर्वे ते मदभाग्यतः ॥ २८७ ॥

खरसार्थेन वाणिज्ये; मयकाऽथ चिकीर्षिते ।
ससार्थो मुषितश्चौरैर्जातोऽहं कर्मकृत् ततः ॥ २८८ ॥

वृत्तिस्तथाऽपि नो लब्धा, भूत्वाऽन्यस्याथ सेवकः ।
गतोऽब्धौ पोतमारुह्य, भग्नः सोऽपि मदंहसा ॥ २८९ ॥

उत्तीर्य फलकेनाब्धिं, द्वीपं प्राप्याथ रोधनम् ।
प्रवृत्तः खनितुं बाढं, धूलिः प्राप्ता परं करे ॥ २९० ॥

अथान्यत्र नगे गत्वा, धातुवादः कृतो मया ।
मृद्भिर्मूलैश्च पाषाणैः, स्थितः क्षारः परं करे ॥ २९१ ॥

कृता ततो द्यूतलीला, तत्र द्यूतकरैर्जितः ।
ततो लातुं विभावर्यां, प्रविष्टो रसकूपिकाम् ॥ २९२ ॥

सिंहेन त्रासितस्तत्र, कथञ्चिन्न तु मारितः ।
विना पुण्यमभूद् व्यर्थमित्थं कर्माखिलं मम ॥ २९३ ॥

लब्धा भिक्षाऽपि न क्वापि, बुभुक्षाक्षामकुक्षिणा ।
पादप्रसारिकां कृत्वा, मौनं धृत्वा ततः स्थितः ॥ २९४ ॥

सागरः प्रेरयामास, ततो मां स्फोरयोद्यमम् ।
अविषादः श्रियो मूलं, पुनः कुरु धनार्जनम् ॥ २९५ ॥

इत्याहितकुधीस्तेन, पातकेषु प्रवर्तितः ।
कृतानि तानि पापानि, यानि यान्यादिदेश सः ॥ २९६ ॥

धनगन्धोऽपि न प्राप्तः, परं पुण्योदयं विना ।
न गतः श्वसुरस्यापि, गृहे मिथ्याभिमानतः ॥ २९७ ॥

तदाऽपि प्रेरयन्नेव, मैथुनो यौवनान्वितः ।
मां तिष्ठति तदिष्टं तु, नाप्यते सुकृतं विना ॥ २९८ ॥

इतश्चानन्दनगरे, हरिणा सूरिरुत्तमः ।
दृष्टो मनोरमोद्याने, निषण्णस्तं प्रणम्य सः ॥ २९९ ॥

ततो भगवता तेन, देशना क्लेशनाशिनी ।
दत्ता नृपो जहर्षोच्चैस्तामाकर्ण्य श्रवःसुधाम् ॥ ३०० ॥

यावद् विचिन्तयामास, भगवान् सर्वभाववित् ।
तदिदं परिपृच्छामि, किमहो तत्र कारणम् ॥ ३०१ ॥

जातोऽहं प्राक् प्रियस्तस्य, स च मे धनशेखरः ।
किं पुनः क्षणमात्रेण, क्षिप्तोऽहं तेन वारिधौ ॥ ३०२ ॥

कुपितः किं स देवोऽस्मै, कुतः क्षिप्तोऽम्बुधावसौ ।
किं जीवति मृतो वाऽसौ, तावत् सूरिरवोचत ॥ ३०३ ॥

विरूपं त्वयि यद्भूप !, चकार धनशेखरः ।
तत्रापराध्यतः पापमित्रे सागरमैथुनौ ॥ ३०४ ॥

स हि चारुः स्वरूपेण, ताभ्यां च क्रियतेऽन्यथा ।
त्वद्बोहित्थस्य हरणे, सागरेणास्य धीः कृता ॥ ३०५ ॥

मयूरमञ्जरीभोगे, मैथुनेन कृता मतिः ।
तद्वशात् त्वं जले क्षिप्तस्तेनास्मै कुपितः सुरः ॥ ३०६ ॥

तेन त्वमुद्धृतः सोऽब्धौ, क्षिप्तस्तदपि नो मृतः ।
अधुना पापमित्राभ्यां, नानादेशेषु पीड्यते ॥ ३०७ ॥

इत्थं चतुर्ज्ञानभृता सूरिणाऽभिहिते नृपः ।
दध्यावहो मुनेर्ज्ञानं, पापोऽहो धनशेखरः ॥ ३०८ ॥

पुनः पप्रच्छ सूरीन्द्रं, हरिर्मयि कृपापरः ।
कदा त्यक्ष्यति संसर्गं, स तयोः पापमित्रयोः ॥ ३०९ ॥

सूरिराह पुरं भावप्रसादाख्यं विराजते ।
राजा शुद्धाशयस्तत्र, तस्य चात्मरतिः प्रिया ॥ ३१० ॥

विद्येते तनये तस्या, उभे विततलोचने ।
एका ब्रह्मरतिर्नाम, द्वितीया मुक्तताऽभिधा ॥ ३११ ॥

यदा ते कन्यके भार्ये, लप्स्यसे धनशेखरः ।
आभ्यां पापवयस्याभ्यां, तदा नूनं वियोक्ष्यते ॥ ३१२ ॥

तयोर्विलासमासाद्य, गलद्वेद्यान्तरप्रथम् ।
ज्ञानानन्दघने स्थाने, शिवे स्थास्यति निर्भयः ॥ ३१३ ॥

ततो हरिनरेन्द्रेण, पुनः पृष्टः स सूरिराट् ।
लप्स्यसे ते कथं कन्ये, भगवन् ! धनशेखरः ॥ ३१४ ॥

सूरिराह महाराज ! प्रतीतो हि भवादृशाम् ।
स कर्मपरिणामाख्यो, राजाऽस्ति गुरुविक्रमः ॥ ३१५ ॥

प्रसन्नस्तव मित्राय, स कन्ये दापयिष्यति ।
नात्र कश्चिदुपायोऽन्यस्तन्मुञ्चाकुलचित्तताम् ॥ ३१६ ॥

तदाकर्ण्य वचः सूरेर्भूत्वा मयि निराकुलः ।
कृताञ्जलिः पुनः प्रोचे, सूरिराजं हरिर्नृपः ॥ ३१७ ॥

भदन्त ! यत् त्वया प्रोक्तं, पापमित्रप्रसङ्गतः ।
तेन घोरं कृतं कर्म, प्रकृत्या तु स निर्मलः ॥ ३१८ ॥

संशये तत्र किं प्राणी, स्वरूपेणापि निर्मलः ।
परदोषेण दुष्टः स्यात्, सूरिणोक्तं भवेत् तथा ॥ ३१९ ॥

लोकानामन्तरङ्गाणां, दोषाः सांक्रामिका ध्रुवम् ।
एवं कथानकं राजन् !, शृणु तत्र समाहितः ॥ ३२० ॥

प्रतीतमेतद् यत् कर्मपरिणामस्य भूभुजः ।
देव्याः कालपरिणतेश्चापत्यानि बहून्यपि ॥ ३२१ ॥

खलदृग्दोषतो भीतैरविवेकादिमन्त्रिभिः ।
विनिह्नुतानि विद्यन्ते, भुवने स्थितिवेदिभिः ॥ ३२२ ॥

इतश्चास्ति महासत्त्वः, सिद्धान्तः पुरुषोत्तमः ।
कर्माद्यत्यन्तभेदज्ञो, हितदः सर्वदेहिनाम् ॥ ३२३ ॥

विनेयस्तस्य मृदुधीरप्रबुद्धाभिधोऽजनि ।
स पप्रच्छेह भगवन् !, किमिष्टं किं ततोऽन्यथा ॥ ३२४ ॥

सिद्धान्तः प्राह सर्वेषामभीष्टं देहिनां सुखम् ।
ज्ञेयं दुःखमनिष्टं च, प्रवृत्तिविनिवृत्तितः ॥ ३२५ ॥

अप्रबुद्धोऽब्रवीद्धेतुः, कस्तयोरथ तं जगौ ।
सिद्धान्तः सुखकृद् राज्यं, दुःखकारि तदेव च ॥ ३२६ ॥

नोद्भाव्यश्च विरोधोऽत्र, धर्मभेदव्यवस्थितेः ।
दुःखं दुष्पालितं दत्ते, सुखं राज्यं सुपालितम् ॥ ३२७ ॥

अप्रबुद्धोऽवदद् राज्यं, स्तोकानामेव दृश्यते ।
सिद्धान्तः प्राह सर्वेषामेवाभ्यन्तरमस्त्यदः ॥ ३२८ ॥

एकं वा तदनेकं वेत्यप्रबुद्धेन भाषिते ।
जगौ यथास्थितं तत्त्वं, सिद्धान्तो विश्ववत्सलः ॥ ३२९ ॥

एकं सामान्यतस्तद्धि नैकरूपं विशेषतः ।
सामान्यराज्ये संसारिजीवस्तत्र महानृपः ॥ ३३० ॥

ज्ञानध्यानादिरत्नौघैः, कोशस्तत्र भृतः स्मृतः ।
गाम्भीर्यौदार्यशौर्याद्याः, स्यन्दनास्तत्र सुन्दराः ॥ ३३१ ॥

गजाः सौष्ठवसौजन्यप्रभुत्वप्रणयादयः ।
वाग्मित्वमुख्यास्तुरगा, दाक्षिण्याद्याः पदातयः ॥ ३३२ ॥

चारित्रधर्मनामा च, राजते प्रतिनायकः ।
महानृपस्य संसारिजीवस्यातिहितावहः ॥ ३३३ ॥

मन्त्री तस्यास्ति सद्बोधः, सम्यक्त्वाख्यो महत्तमः ।
यतिधर्मस्तथा श्राद्धधर्मश्च तनयावुभौ ॥ ३३४ ॥

सन्तोषस्तन्त्रपालश्च, सुभावाद्या महाभटाः ।
संसारिजीवसौराज्यं, शक्तो वक्तुं विशिष्य कः ॥ ३३५ ॥

भूमिस्तत्र महाराज्ये, चित्तवृत्तिमहाटवी ।
पुराणि शुभ्रचित्तादीन्यस्यां राजन्ति कोटिशः ॥ ३३६ ॥

तस्यां तद्राज्यभुक्तौ च, कषायाभिधलूषकाः ।
घातिकर्माख्यचराटा, भ्रमन्तीन्द्रियतस्कराः ॥ ३३७ ॥

नोकषायाख्यलुण्टका उपसर्गपरीषहाः ।
भुजङ्गा विलसन्त्युच्चैः, प्रमादाः षिङ्गसन्निभाः ॥ ३३८ ॥

तेषां द्वौ भ्रातरौ सर्वप्रधानौ परिकीर्तितौ ।
आद्यः कर्मपरिणामो, महामोहो द्वितीयकः ॥ ३३९ ॥

दर्पिष्ठौ तौ च मन्येते, भूरियं नः परेऽत्र के ।
कोऽयं संसारिजीवोऽस्ति, को वा चारित्रधर्मकः ॥ ३४० ॥

स कर्मपरिणामाख्यस्ततः सिद्धो महानृपः ।
रजस्तमोमुखान्येष नगराणि न्यवेशयत् ॥ ३४१ ॥

अस्थापयन्महामोहं, पल्लिप्रायेषु तेषु सः ।
तस्य सर्वं बलं दत्त्वा, स्वयं पश्यति नाटकम् ॥ ३४२ ॥

परं संसारिजीवस्य, शक्तिमाकलयन्निव ।
चारित्रधर्मराजादिबलं पश्यन्निवातुलम् ॥ ३४३ ॥

तत्साम्राज्येऽपि नात्यन्तं, निरपेक्षोऽवतिष्ठते ।
प्रणयं दर्शयत्येषां, कुरुते चानुवर्तनम् ॥ ३४४ ॥

ततश्चारित्रधर्माद्यैर्मध्यस्थोऽयमिति श्रितः ।
जातः संसारिजीवस्य, प्रष्टव्यः स्वप्रयोजने ॥ ३४५ ॥

तृणवन्मन्यते सर्वं, महामोहस्तु दोर्मदात् ।
बलं चारित्रधर्मादेः, सर्वंकषपराक्रमः ॥ ३४६ ॥

संसारिजीवो नो वेत्ति, यावत् स्वां राज्यसम्पदम् ।
तावत् तद्राज्यभुक्तिं स, स्वीकृत्य हृदि माद्यति ॥ ३४७ ॥

यदा संसारिजीवस्तां, पश्यति स्वीयसम्पदम् ।
स्वशत्रुणा तदा सार्द्धं, महामोहेन युध्यति ॥ ३४८ ॥

जायेते चानयोर्युद्धे, मिथो जयपराजयौ ।
पराजयमितं दुःखं, सुखं च जयसंमितम् ॥ ३४९ ॥

संसारिजीवः प्राप्नोति, युद्धाभ्यासाद् यदाऽतुलम् ।
वीर्यं तदा निजं राज्यं, गृह्णाति हतशात्रवः ॥ ३५० ॥

ततस्तस्योन्मनीभावसमाधिध्वस्तपाप्मनः ।
नित्यं विज्ञानमानन्दं, ब्रह्मज्योतिः प्रकाशते ॥ ३५१ ॥

सामान्यराज्यसामग्री कारणं, सुखदुःखयोः ।
पालनापालनाज्जाता, सेयमेकाऽपि तत्त्वतः ॥ ३५२ ॥

विशेषतस्त्वनेकत्वं, राज्यस्येत्थं विभावय ।
यः कर्मपरिणामाख्यो, भूपतिः कीर्तितः पुरा ॥ ३५३ ॥

सूनवस्तस्य चानन्तास्तेभ्यो दत्तमनेकताम् ।
इदमेव महाराज्यं, याति पात्रविशेषतः ॥ ३५४ ॥

केषाञ्चिद् दुःखहेतुस्तत्, केषाञ्चित् सुखकारणम् ।
इत्थं हि भोक्तृभेदेन, भोज्यं राज्यं विभिद्यते ॥ ३५५ ॥

अप्रबुद्धोऽवदत् कर्मपरिणामसुतेष्वथ ।
कुर्वत्सु तेषु तद्राज्यं, किमभूत् कस्य संदिश ॥ ३५६ ॥

सिद्धान्तः प्राह तेऽनन्ताः, कियतां वक्तुमीश्महे ।
वृत्तान्तं तदतो विद्धि, तद्भावं व्यक्तिसंग्रहात् ॥ ३५७ ॥

षट् पुत्रास्तस्य विद्यन्ते, निकृष्टश्चाधमस्तथा ।
विमध्यमो मध्यमधीरुत्तमश्चोत्तमोत्तमः ॥ ३५८ ॥

राज्यानि द्रष्टुमेतेषां, वितर्कोऽनुचरस्त्वया ।
प्रेष्यः षट्स्वपि राज्येषु, सर्वोऽर्थो बुध्यते यथा ॥ ३५९ ॥

प्रजिघायाप्रबुद्धोऽथ, प्रमाणीकृत्य तद्वचः ।
वितर्कं स समायातो, वर्षषट्केऽतिलङ्घिते ॥ ३६० ॥

प्रोवाच सोऽन्तरङ्गायां, राज्यभुक्तावहं गतः ।
उद्घोष्यमाणः पटहः, श्रुतस्तत्र पुरादिषु ॥ ३६१ ॥

निकृष्टो वर्तते राजा, सुखं पिबत खादत ।
यथेष्टं स्वस्वकृत्यानि, जनाः ! कुरुत निर्भयाः ॥ ३६२ ॥

तां श्रुत्वा घोषणां क्षोभं, राजाद्याः समुपागताः ।
मन्त्रयन्ति च कीदृक्षो, दत्तो भूपतिरेष नः ॥ ३६३ ॥

ततो जगौ महामोहं, सचिवो निर्निमित्तकः ।
क्षोभोऽयमागतो भाग्यादस्माकं हीदृशः प्रभुः ॥ ३६४ ॥

यो न नः पीडने शक्तो, योऽस्मन्निर्देशकारकः ।
अस्मत्पदातिवर्गेऽपि, भृत्यवद्'यो भविष्यति ॥ ३६५ ॥

यः कर्मपरिणामेन, कुरूपो दुर्भगः कृतः ।
क्रूरो लोकद्वयभ्रष्टश्चतुर्वर्गार्थवर्जितः ॥ ३६६ ॥

दीनो देवगुरुद्वेषी, दोषाणामेकमास्पदम् ।
निर्गुणः शक्तिशून्यात्मा, सोऽस्माकं किं करिष्यति ॥ ३६७ ॥

तपस्वी नैष जानीते, स्वराज्यबलसम्पदम् ।
स्वरूपमपि भावेन, नाप्यस्मान् राज्यहारकान् ॥ ३६८ ॥

मन्यते बन्धुभूतान् नस्तदस्मिन् हर्षकारणे ।
महावर्द्धनकं कर्तुं, युज्यते जनतुष्टये ॥ ३६९ ॥

अकारयद् वर्द्धनकं, महामोहोऽथ तद्गिरा ।
गायन्ति स्म च तद्भृत्या, विपुलानन्दपूरिताः ॥ ३७० ॥

येनेदमीदृशं राज्यं, संप्राप्तं भूरिभूतिभृत् ।
अहो सोऽस्मदधीनोऽभूदिदं राज्यं हितं हि नः ॥ ३७१ ॥

महोत्सवो ययौ स्फातिमेवं तन्नगरादिषु ।
मुदिता घातिचरटाः, प्रभविष्याम इत्यलम् ॥ ३७२ ॥

हरिष्याम इति प्रीतिं, दधुरिन्द्रियतस्कराः ।
कषायलूषकाः स्फातिं, लूषयिष्याम इत्यधुः ॥ ३७३ ॥

नोकषायाख्यलुण्टका, उपसर्गपरीषहाः ।
भुजङ्गाश्च प्रमादाख्या, षिङ्गाश्च ननृतुस्तराम् ॥ ३७४ ॥

चारित्रधर्मसैन्ये च, श्रुत्वा तां राज्यघोषणाम् ।
राज्ञां क्षोभो महान् जातः, सद्बोधश्चाब्रवीत् तदा ॥ ३७५ ॥

देव ! राजा निकृष्टोऽयं, राज्यनामापि वेत्ति न ।
द्विषां नः पक्षपात्येष, संवित्ते जातु नैव न ॥ ३७६ ॥

महामोहादिभिस्तावदेकं वित्रासिता वयम् ।
द्वितीयमीदृशः स्वामी, दैवो दुर्बलघातकः ॥ ३७७ ॥

उपप्लवाय तदसौ, धूमकेतुर्न उत्थितः ।
इदं मन्त्रिवचः श्रुत्वा, भीताः सर्वे नरेश्वराः ॥ ३७८ ॥

श्रुत्वा निकृष्टराज्यं तत्, संजाता दीनविह्वलाः ।
लोकाः सात्त्विकचित्तादिनगरेषु च भूरिषु ॥ ३७९ ॥

महदन्तरमुद्वीक्ष्य, सैन्ययोरथ तादृशम् ।
विपुलानन्दशोकाभ्यां, जातं मे कौतुकं महत् ॥ ३८० ॥

चिन्तितं च मया प्रेक्षे, निकृष्टोऽसौ क्व तिष्ठति ।
यद्वा द्रक्ष्यामि राजानं, राज्यार्थं तमिहागतम् ॥ ३८१ ॥

तावत् तस्य स्वयं राज्यं, महामोहादितस्करैः ।
अधिष्ठितं ततस्तत्र, प्रवेष्टुं न शशाक सः ॥ ३८२ ॥

सैन्यं चारित्रधर्मस्य, जित्वा तत् तैर्वशीकृतम् ।
निकृष्टस्तु बहिस्तस्थौ, तैर्बाढं गलहस्तितः ॥ ३८३ ॥

अहं जनेषु बाह्येषु, तं दिदृक्षुस्ततो गतः ।
राज्यभ्रष्टस्तत्र दृष्टो, निकृष्टो नृपतिर्मया ॥ ३८४ ॥

पापकर्मरतः क्रूरो, मत्सरी लोकनिन्दितः ।
पुरुषार्थपरिभ्रष्टो, मलक्लिन्नकलेवरः ॥ ३८५ ॥

तृणकाष्ठादि विक्रीय, स लेखानयनेन वा ।
करोति कर्मभिर्निन्द्यैर्दुष्पूरोदरपूरणम् ॥ ३८६ ॥

ये केऽपि क्रूरकर्माणः, श्वपाकाद्याः सुदुःखिताः ।
तेषां रूपं भजत्येष, तथाऽप्याद्रियते द्विषः ॥ ३८७ ॥

महामोहाभिभूतेन, राज्यं दुष्पालितं त्वया ।
इति तस्मै नृपः कर्मपरिणामश्चुकोप च ॥ ३८८ ॥

क्षिप्तो दुःखानि सहते, तेनासौ पापिपञ्जरे ।
इदमज्ञानजं तस्य, जातं दुःखकदम्बकम् ॥ ३८९ ॥

राज्यं वर्षे द्वितीये भूदधमस्य तथाऽखिला ।
डिण्डिमोद्घोषणात् सैन्यद्वये वार्ता च पूर्ववत् ॥ ३९० ॥

अवर्णयद् गुणांस्तस्य, महामोहाय मन्त्रिराट् ।
ईदृगेषोऽधमः कर्मपरिणामेन निर्मितः ॥ ३९१ ॥

अर्थकामकृतासङ्गो, विद्वेषी धर्ममोक्षयोः ।
परलोकानपेक्षश्च, तपःशीलविदूषकः ॥ ३९२ ॥

चारित्रधर्मसैन्यस्य, द्वेष्टाऽस्मद्बलभक्तिमान् ।
तदेतस्यापि यद् राज्यं, तदस्माकं न संशयः ॥ ३९३ ॥

केवलं न प्रवेश्योऽसौ, भुक्तिदेशे यदत्र नः ।
प्रविष्टश्चेष्टितं विद्याद्, वीर्यमस्त्यस्य किञ्चन ॥ ३९४ ॥

बहिर्धर्तुं कथं शक्य इति प्रोक्ते च भूभुजा ।
मन्त्री प्राह विधेयोऽसौ, प्रतिबद्धोऽर्थकामयोः ॥ ३९५ ॥

इत्थं बहिर्धृतो ह्येष, नान्तर्जातु प्रवेक्ष्यति ।
तदाकर्ण्य महामोहस्तत्कार्ये नियुयोज तम् ॥ ३९६ ॥

तस्यास्ति मन्त्रिणः पुत्री दृष्टिः परमयोगिनी ।
सा प्राह तं करोम्येषा, वशगं नः(वः) प्रसादतः ॥ ३९७ ॥

धनकामविहीनोऽपि, निकृष्टोऽधः कृतो मया ।
अधमस्य बहिष्कारे, तत्सक्तस्य न मे श्रमः ॥ ३९८ ॥

ततो योग्येत्यनुज्ञाता, मन्त्रिणा च महीभुजा ।
ययौ दृष्टिर्बहिष्कर्तुमधमं तं नरेश्वरम् ॥ ३९९ ॥

सैन्यं चारित्रधर्मस्य, तत्प्रवृत्त्या प्रकम्पितम् ।
राज्येऽधमस्य संजाताः, शोकाक्रन्दादयस्तताः ॥ ४०० ॥

योगिन्यथ स्थिता गत्वा, नेत्रयोरधमस्य सा ।
तदावेशादसौ जातो, रूपालोकनलोलुपः ॥ ४०१ ॥

लोलनेत्रः स नारीणां, विभ्रमं मुहुरीक्षते ।
कक्षास्तनान्तरं तासां, गुह्योरुवदनं तथा ॥ ४०२ ॥

स पश्यन्नधमो रूपं, सुधाकुण्डे निमज्जति ।
श्रद्धत्ते नाधिकं स्वर्गं, लीलालालितदृक्सुखात् ॥ ४०३ ॥

असौ दृष्ट्येत्थमाक्षिप्य, निजराज्याद् बहिष्कृतः ।
स्वास्थ्यादिव रुजाऽपथ्ये, नियोज्य परिदीर्घया ॥ ४०४ ॥

ततोऽस्य निजराज्यादि, ज्ञानहीनस्य तध्दृतम् ।
महामोहादिभी राज्यं, हतास्तदनुजीविनः ॥ ४०५ ॥

बाह्ये सुखे निमग्नोऽसौ, बाह्यदेशस्य भूपतिः ।
षिङ्गप्रायोऽथ संजातो, नास्तिको ज्ञानिगर्हितः ॥ ४०६ ॥

हास्यं स धार्मिकं लोकं, दिनेशमिव कौशिकः ।
पापं च मन्यते श्लाघ्यं, संघातं तमसामिव ॥ ४०७ ॥

अन्यदा प्रेक्ष्य मातङ्गीं, युवतीं रूपशालिनीम् ।
तस्यामध्युपपन्नोऽभूदसावकलितायतिः ॥ ४०८ ॥

ततश्चैनं बहिश्चक्रुर्बहिरङ्गजना अपि ।
त्यज्यते ह्यङ्गजातोऽपि, मलवन्मलिनो जनः ॥ ४०९ ॥

राज्याद् दुष्पालितात् कर्मपरिणामेन दारुणाम् ।
ततो दशां निकृष्टस्य, नीतोऽसौ पापिपञ्जरे ॥ ४१० ॥

जातो विमध्यमो राजा, वत्सरेऽथ तृतीयके ।
महामोहं जगौ मन्त्री, डिण्डिमोद्घोषणे श्रुते ॥ ४११ ॥

निम्नदेशे जलस्येव, गतिः सैन्येऽस्य नः सदा ।
चारित्रधर्मसैन्येऽपि, स्यादूर्ध्वं च प्रयोगतः ॥ ४१२ ॥

दृढादरोऽसौ सैन्ये नः, परस्य शिथिलादरः ।
ऐहिकार्थरतो मध्ये, परलोकमपीक्षते ॥ ४१३ ॥

सदैव प्रतिबद्धोऽसौ, भावतो धनकामयोः ।
कदाचिद्धर्मकार्येऽपि, भवत्यार्यमतिः परम् ॥ ४१४ ॥

भद्रकः स्तुतिकृत् प्राज्ञः, सर्वदेवतपस्विनाम् ।
दानशीलपरः पूतः, सच्छास्त्रार्थाविदूषकः ॥ ४१५ ॥

अस्माकं नातिहितकृत्, तदसौ देव ! भूपतिः ।
प्रवेशनीयो नो राज्ये, धर्तव्योऽधमवद् बहिः ॥ ४१६ ॥

तथाऽस्त्विति नृपेणोक्ते, सर्वैर्दृष्टिपुरःसरैः ।
असौ बहिर्द्धृतश्चौरैस्तद्राज्यं च वशीकृतम् ॥ ४१७ ॥

नात्यन्तं पीडितः कर्मपरिणामाज्ञया पुनः ।
अपेक्षाऽकारि चारित्रधर्मसैन्ये च काचन ॥ ४१८ ॥

बहिर्भूतोऽप्यसौ राज्यं, पालयत्यन्तराऽन्तरा ।
तेन चारित्रधर्माद्या, मनाग् यान्ति प्रसन्नताम् ॥ ४१९ ॥

प्रवर्तते यथाकालं, त्रिवर्गेऽपि विभज्य सः ।
भवत्यधमवत् तेन, नैकान्तासुखभाजनम् ॥ ४२० ॥

स्थिताः स्वस्वसदाचारे, ये हि सामान्यधर्मिणः ।
राजानो ब्राह्मणाद्याश्च, तेषां रूपं भजत्यसौ ॥ ४२१ ॥

कर्मणाऽसौ गतस्तेनोचितेन श्लाघ्यतां जने ।
तस्योपरि ततस्तुष्टः, स कर्मपरिणामराट् ॥ ४२२ ॥

कदाचित् पशुसंस्थाने, सुखहेतौ नयत्यमुम् ।
कदाचिन्मानवावासे, कदाचिद् विबुधालये ॥ ४२३ ॥

तुर्ये वर्षेऽथ राजाऽभून्मध्यमो घोषणे कृते ।
महामोहमहीन्द्राय, सचिवोऽभिदधे गिरम् ॥ ४२४ ॥

धर्मार्थकाममोक्षेषु, राजाऽयं सततोद्यतः ।
तथाऽपि मन्यते मोक्षं, पारमार्थिकमर्थवित् ॥ ४२५ ॥

सक्तस्तद्धेतुधर्मे च, न प्रसक्तोऽर्थकामयोः ।
चिन्तयन्नपि तद्दोषांस्तद्वृत्तिः कर्मनोदनात् ॥ ४२६ ॥

जिहासुरपि नो भावबन्धनं विजहात्यसौ ।
धनपुत्रकलत्रादिभवपाशेन यन्त्रितः ॥ ४२७ ॥

अस्माभिर्नापराध्योऽसौ, तेन सिंहो मृगैरिव ।
सेव्य एव परं स्वामिन्नित्युक्त्वा विरराम सः ॥ ४२८ ॥

शुद्धं परिचिनोति स्म, सिद्धान्तमथ मध्यमः ।
तस्करान् पीडयामास, मनाक् चित्ताटवीगतान् ॥ ४२९ ॥

सेवका इव तस्यासन्, महामोहादयस्ततः ।
देशोद्देशेन राज्यं स्वं, मध्यमेनाथ लक्षितम् ॥ ४३० ॥

सैन्ये चारित्रधर्मस्य, बन्धुभावमबुध्यत ।
सिद्धान्तस्यायमादेशान्मोहादीनां च चौरताम् ॥ ४३१ ॥

वीर्योल्लासात् स्वराज्यस्य, मध्यमः क्रमतस्ततः ।
मध्यभागे स्थितो भूमिमाक्रम्य कियतीमपि ॥ ४३२ ॥

तेन चारित्रधर्माद्या, मनागाह्लादिता नृपाः ।
महामोहादयश्चौराः, कृताः कम्पितमानसाः ॥ ४३३ ॥

योगिन्यपि न तस्याभूद्, दृष्टिरत्यन्तबाधिका ।
आत्मीयं यापयन् राज्यं, लोकेऽसौ श्लाघ्यतां गतः ॥ ४३४ ॥

स देशविरतो जातो, रतो जैनेन्द्रशासने ।
अन्वतिष्ठच्च स श्राद्धानुष्ठानं शुद्धलेश्यया ॥ ४३५ ॥

ततस्तुष्टिभृता कर्मपरिणामेन भूभुजा ।
असंख्यसुखसम्पूर्णे, नीतोऽसौ विबुधालये ॥ ४३६ ॥

चतुर्णां भूभुजां प्रेक्ष्य, तेषां चरितमीदृशम् ।
अहं सकौतुको जातः, पञ्चमः किं करिष्यति ॥ ४३७ ॥

तावदत्रोत्तमो राजा, महाराज्ये विजृम्भते ।
इति ग्रामादिषु महान्, प्रसृतो डिण्डिमध्वनिः ॥ ४३८ ॥

व्याकुला घोषणां श्रुत्वा, जातास्तामान्तरा नृपाः ।
जगौ चारित्रधर्मं च, सद्बोधः स्वस्थताकृते ॥ ४३९ ॥

अयमस्माकमत्यन्तहितकारी नराधिपः ।
न भेतव्यमितः स्वामिन्नयं वेत्ति निजां स्थितिम् ॥ ४४० ॥

अस्मांश्च लक्षयत्येष, बन्धुभूतानसंशयम् ।
महामोहादिकान् क्रूरांस्तथा स्वपरिपन्थिनः ॥ ४४१ ॥

वर्द्धकोऽस्मद्बलस्यायं, महामोहादिनाशकः ।
अस्मदीयमिदं राज्यं, तदस्य परमार्थतः ॥ ४४२ ॥

प्रीताश्चारित्रधर्माद्याः, श्रुत्वा तां मन्त्रिणो गिरम् ।
चक्रुर्वर्धनकं लोकाः, प्रवृत्ता गातुमुच्चकैः ॥ ४४३ ॥

अहो उत्तमराज्येऽस्मिन्, परिमोषिगतिक्षतिः ।
भविष्यति क्रमेणेदं, सतामानन्दकारणम् ॥ ४४४ ॥

स्थितिमुत्तमराज्यस्य, तामाकर्ण्य महोदयाम् ।
महामोहादयो भीता, मुक्तप्राणा इव स्थिताः ॥ ४४५ ॥

अथ राज्यं समासाद्य, पिंतुरुत्तमभूपतिः ।
तदा पप्रच्छ सिद्धान्तं, सर्वां राज्यस्थितिं निजाम् ॥ ४४६ ॥

कथं तत्र प्रवेक्ष्यामि, महाराज्येऽतिदुर्गमे ।
चौरान् कथं हनिष्यामि, का नीतिः श्रेयसी मम ॥ ४४७ ॥

स्फोरणीयं मया स्थाने, पौरुषं कुत्र कीदृशम् ।
तत् सर्वं वद वेत्ताऽस्ति, सर्वोपायविधेर्भवान् ॥ ४४८ ॥

पृष्टः सन्नुत्तमेनैवं, सिद्धान्तः समभाषत ।
वत्स ! राज्यस्य योग्योऽसि, नात्रार्थे कोऽपि संशयः ॥ ४४९ ॥

उद्दिश्य मोक्षं तनुषे, धर्मं संसारभीतिभाग् ।
यशः सुखं च ते तत्र, बाधकं नानुषङ्गिकम् ॥ ४५० ॥

पित्रा राज्यं प्रदत्तं यत्, तद् ज्ञातं तत्त्वतस्त्वया ।
प्रवेशोपायमेनं च, तत्र विद्धि नरोत्तम ! ॥ ४५१ ॥

प्रष्टव्या गुरवः पूर्वं, राज्ये प्रविशताऽऽन्तरे ।
अध्येतव्यं तदादिष्टं, धर्मशास्त्रं प्रयत्नतः ॥ ४५२ ॥

विभाव्यस्तस्य भावार्थः कार्या तद्विहितक्रिया ।
सन्तः सेव्यास्तथाऽसन्तस्त्याज्या धार्या दया हृदि ॥ ४५३ ॥

वचः सत्यं मितं वाच्यं, नादत्तं ग्राह्यमण्वपि ।
कामिन्यो विषवद् ज्ञेया, मोच्यः सर्वपरिग्रहः ॥ ४५४ ॥

धार्यो व्रतोचितो वेषो, विहर्तव्यमसङ्गिना ।
आहारोपधिशय्यादिशुद्ध्या कार्याऽङ्गयापना ॥ ४५५ ॥

देयो नैवावकाशश्च, निद्राऽऽलस्यादिविद्विषाम् ।
जातु नाध्युपपत्तव्यं, हृद्येषु विषयेषु च ॥ ४५६ ॥

जुगुप्सनीया न पुनः, कुरूपाद्यर्थसन्ततिः ।
क्षालनीयः सदैवात्मा, निर्मलैर्भावनाजलैः ॥ ४५७ ॥

धार्याः समितिसन्तोषतपःस्वाध्यायमुक्तयः ।
तितिक्षितव्यास्त्रिविधोपसर्गाश्च परीषहाः ॥ ४५८ ॥

यतितव्यमसम्पन्नयोगेषु धृतिधीजुषा ।
तत्रेत्थं कुर्वतो राज्ये, प्रवेशो नृपतेर्भवेत् ॥ ४५९ ॥

तत्र राज्ये प्रवेष्टव्यं, तत् त्वयाऽप्यनया दिशा ।
स्वाङ्गिकश्च ग्रहीतव्योऽभ्यासनामा सहायकः ॥ ४६० ॥

सैन्याच्चारित्रधर्मस्य, परो वैराग्यनामकः ।
समेष्यति सहायस्ते, ताभ्यां सिद्धिः करे तव ॥ ४६१ ॥

ताभ्यां युक्तेन भवता, रोद्धव्याऽन्तर्द्विषां गतिः ।
तत्सैनिका निहन्तव्या, स्थिरीकार्या सुहृच्चमूः ॥ ४६२ ॥

पूर्वद्वारे प्रवेष्टव्यं, तत्र राज्ये त्वया ततः ।
सन्ति तद्वामदिग्भागे, पूर्ग्रामादीनि विद्विषाम् ॥ ४६३ ॥

सुहृदां दक्षिणे भागे, चित्तवृत्तिमहाटवी ।
सर्वाधारा पुनस्तेषां, तदन्ते निर्वृतिः पुरी ॥ ४६४ ॥

अस्ति पश्चिमदिग्भागे, स्थिताऽतीत्य महाटवीम् ।
तव राज्यफलं पूर्णं, तां प्राप्तस्य भविष्यति ॥ ४६५ ॥

तस्यामेव त्वयाऽन्यत्र, गन्तव्यमविलम्बिना ।
औदासीन्याभिधमहाराजमार्गममुञ्चता ॥ ४६६ ॥

आयान्ति विविधास्तत्राशयस्थानजलाश्रयाः ।
तद्भाववारि कलुषं, न पेयं रोगवृद्धिकृत् ॥ ४६७ ॥

मैत्रीप्रमोदकारुण्यमाध्यस्थैर्निर्मलीकृतम् ।
पेयं च तद् यथा तापः, श्रमस्तृष्णा च हीयते ॥ ४६८ ॥

नद्यायाति विवेकाद्रेर्बहुमध्येऽस्य धारणा ।
प्राप्तव्या शासनस्थैर्याव्याक्षेपबलतस्त्वया ॥ ४६९ ॥

तत्रोत्थास्यन्ति ये चौरा, महाव्युत्थानगर्ततः ।
भवता भञ्जनीयास्ते, भावनाऽशनिनाऽखिलाः ॥ ४७० ॥

द्रक्ष्यसि प्रगुणं धर्मध्यानदण्डोलकं ततः ।
गन्तव्यं तेन गत्वाऽसौ, महामार्गे पतिष्यति ॥ ४७१ ॥

सबीजयोगसंज्ञाने, गच्छतस्तत्र भावि ते ।
प्राबल्यं धर्मसैन्यस्य, मोहप्रलयपूर्वकम् ॥ ४७२ ॥

रजस्तमोलयाच्छुभ्रा, भवित्री राज्यभूरपि ।
लप्स्यसेऽवहितः शुक्लध्यानदण्डोलकं ततः ॥ ४७३ ॥

विमलः केवलालोको, भावी तत् तेन गच्छतः ।
ततो निर्बीजयोगाख्ये, बृहन्मार्गे पतिष्यति ॥ ४७४ ॥

समुद्घातः केवलिना, विधेयस्तत्र च त्वया ।
विषमारीन् समीकर्तुं, हन्तव्या योगराक्षसाः ॥ ४७५ ॥

स्फुटीभविष्यति ततः, शैलेशी नाम वर्तनी ।
निर्वृतिं नगरीं सा त्वां, प्रापयिष्यति निश्चितम् ॥ ४७६ ॥

भावी व्यतिकरस्तेऽयमौदासीन्यममुञ्चतः ।
सर्वोऽन्यच्च त्वया ग्राह्या, समतायोगनालिका ॥ ४७७ ॥

पातनीया निजा दृष्टिस्तस्यामनुभवस्ततः ।
सर्वार्थविषयो भावी, तेन युक्तं करिष्यसि ॥ ४७८ ॥

व्यापारः सर्वशास्त्राणां, दिक्प्रदर्शन एव हि ।
पारं तु प्रापयत्येकोऽनुभवो भववारिधेः ॥ ४७९ ॥

केषां न कल्पनादर्व्वी, शास्त्रक्षीरान्नगाहिनी ।
विरलास्तद्रसास्वादविदोऽनुभवजिह्वया ॥ ४८० ॥

पश्यतु ब्रह्म निर्द्वन्द्वं, निर्द्वन्द्वानुभवं विना ।
कथं लिपिमयी दृष्टिर्वाङ्मयी वा मनोमयी ॥ ४८१ ॥

ततोऽनुभवसंसिद्धेरक्षरातीतमार्गगः ।
अक्षरातीतपदवीं, निर्वृतिं लप्स्यसे सुखम् ॥ ४८२ ॥

तत्रान्तरङ्गराज्यस्य, फलभोक्ता भविष्यसि ।
सर्वकर्मोज्झितः सिद्धः सिद्धानन्तचतुष्टयः ॥ ४८३ ॥

राज्यप्रवेशादारभ्य, वर्धमाना विभूतयः ।
भविष्यन्ति न कर्तव्यस्तासु सङ्गस्त्वयाऽनघ ! ॥ ४८४ ॥

पाल्याश्चारित्रधर्माद्याः, स्मर्तव्यं वचनं मम ।
पदं क्रमेण दातव्यं, नौत्सुक्येन विना क्रमम् ॥ ४८५ ॥

एवं ते भाविनी सिद्धिर्गच्छ राज्यं कुरुष्व तत् ।
परिश्रमो मे सफलः, प्राप्ते राज्यफले त्वया ॥ ४८६ ॥

यथा सिद्धान्तवचनमन्वतिष्ठदथोत्तमः ।
निघ्नन् मोहचमूं सर्वां, स्वराज्ये प्रविवेश च ॥ ४८७ ॥

औदासिन्याभिधं मार्गममुञ्चन्निर्वृतिं पुरीम् ।
गत्वा भुङ्क्ते स राज्यं स्वं, शक्रचक्रधरस्तुतः ॥ ४८८ ॥

चित्तवृत्तिमहाराज्यमेवमुत्तमभूभुजा ।
यत् कर्मपरिणामेन, प्रदत्तं तत् सुपालितम् ॥ ४८९ ॥

ततस्तमपि जित्वाऽसौ, संप्राप्तो निर्वृतिं पुरीम् ।
स्वार्थमात्रप्रसक्तानां, स्नेहो न प्रतिबन्धकः ॥ ४९० ॥

अथोत्तमोत्तमो राज्ये, षष्ठवर्षे नियोजितः ।
विहितं घोषणं देशे, डिण्डिमेन यथाक्रमम् ॥ ४९१ ॥

महामोहादयश्चौरास्ततो जाता मृता इव ।
चारित्रधर्मसैन्यं च, पर्यालोचे दधौ मुदम् ॥ ४९२ ॥

महावर्धनकं जातं, तद्देशेषु च भूरिषु ।
उत्तमस्येव सम्पन्नो, वृत्तान्तोऽस्यापि चाखिलः ॥ ४९३ ॥

केवलं तेन नो पृष्टः, सिद्धान्तो राज्यसाधनम् ।
सर्वा राज्यस्थितिस्तस्य, विदिता स्वत एव हि ॥ ४९४ ॥

सौराज्यभाजा तेनोक्तः, सिद्धान्तो गणधारिणाम् ।
उपकारीति तैरङ्गोपाङ्गरूपेण निर्मितः ॥ ४९५ ॥

अस्योपदेशः सिद्धान्तस्तेनायं नोपदेशकः ।
येनाध्वना स्वयं याति, तमेवोपदिशत्यसौ ॥ ४९६ ॥

तं मार्गदेशकं सर्वे, सेवन्ते नृसुरासुराः ।
अतिशेतेऽस्य बाह्याऽपि, समृद्धिर्विश्वसम्पदम् ॥ ४९७ ॥

सौवर्णो राजतो रत्नश्चेत्येते तस्य निर्मलाः ।
भान्ति क्रीडाद्रयः सालास्त्रैलोक्यप्रभुताश्रियाम् ॥ ४९८ ॥

अशोकपादपो भाति, पुरस्तस्य स्फुरद्द्युतिः ।
उद्गिरन् सन्ततं रागं, हृन्निवेशः सतामिव ॥ ४९९ ॥

पुष्पवृष्टिः पतत्युच्चैः, पुरस्तस्य प्रसारिणी ।
तारालिरिव तद्वक्त्रचन्द्राराधनहेतवे ॥ ५०० ॥

व्याप्नोति तद्ध्वनिर्दिव्यो, भुवं योजनसम्मिताम् ।
विश्वरागजयोद्भूतविख्यातिस्फातिभागिव ॥ ५०१ ॥

राजते चामरश्रेणी, तस्य विस्तारितेजसः ।
प्लवमाना प्रभापूरे, हंसालिरिव निर्मला ॥ ५०२ ॥

सिंहासनानि राजन्ते, चत्वारि चतुराकृतेः ।
प्रभोः कषायसिंहानां, चतुर्णां दर्पहारिणः ॥ ५०३ ॥

मूर्ध्नि भामण्डलं तस्य, ध्वस्तध्वान्तं विराजते ।
उदयाद्रौ प्रचण्डस्य, मार्तण्डस्येव मण्डलम् ॥ ५०४ ॥

पुरस्तस्य ध्वनन् व्योम्नि, दुन्दुभिर्देवताडितः ।
विधत्ते विश्वधर्मार्थिजनाह्वायकचेष्टितम् ॥ ५०५ ॥

तस्य च्छत्रत्रयं भाति, तापत्रयनिवारणात् ।
कीर्त्तित्रयमिवोद्भूतं विश्वत्रयहितैषिणः ॥ ५०६ ॥

प्रातिहार्यैरहार्यश्रीरसावित्येवमादिभिः ।
विभ्राजते महाभागः, श्रेयःसागरचन्द्रमाः ॥ ५०७ ॥

निःस्वेदो निर्मलो देहस्तस्य हृद्यो निरामयः ।
रक्तं मांसं च गोक्षीरहारतारकसन्निभम् ॥ ५०८ ॥

न दृश्याऽऽहारनिर्हारचेष्टा चर्मदृशां नृणाम् ।
अम्भोजसुरभिः श्वासः, सहजेयं गुणावली ॥ ५०९ ॥

कोटीकोट्योऽपि मान्त्यस्य, क्षेत्रे योजनमात्रके ।
भाषा च भाति सर्वेषामेकाऽपि स्वस्वभाषया ॥ ५१० ॥

भाति भामण्डलं मूर्ध्नि, मारिवैररुगीतयः ।
पूर्वोत्पन्नाः प्रशाम्यन्ति, नान्याः स्युस्तत्प्रभावतः ॥ ५११ ॥

योजनानां शते न स्याद्, दुर्भिक्षं तद्विहारतः ।
स्तेनादिभीरवृष्टिश्चातिवृष्टिश्च कदाचन ॥ ५१२ ॥

मोहक्षयोद्भवा एते, गुणास्तस्येन्दुनिर्मलाः ।
चारुरेष ध्वजच्छत्रसच्चक्रासनचामरैः ॥ ५१३ ॥

दधते काञ्चनाब्जानि, पदन्यासेऽस्य निर्जराः ।
वप्रत्रयेऽशोकतले, शोभतेऽसौ चतुर्मुखः ॥ ५१४ ॥

अधोमुखाः कण्टकाः स्युस्तस्मिन् विहरति क्षितौ ।
द्रुमा नमन्ति तस्याग्रे, दुन्दुभिर्दध्वनीति च ॥ ५१५ ॥

भवत्यवस्थितं तस्य, केशरोमनखादिकम् ।
ऋतवश्चेन्द्रियार्थाश्चानुकूलास्तस्य सर्वदा ॥ ५१६ ॥

भूमिर्गन्धोदकैः सिक्ता, पुष्पवृष्टिश्च जायते ।
पक्षिणोऽपि च कुर्वन्ति, तद्विहारे प्रदक्षिणाम् ॥ ५१७ ॥

वाति वातः सदा तस्यानुकूलो याति जातुचित् ।
देवकोटिर्न तत्पार्श्वादेते देवकृता गुणाः ॥ ५१८ ॥

इत्युत्तमोत्तमस्येयं, भूतिर्वाग्गोचरातिगा ।
इमामनुभवन्नेष, नृपोऽगान्निर्वृतिं पुरीम् ॥ ५१९ ॥

त्वदादेशं विधायेत्थं, राज्यषट्कनिरीक्षणात् ।
आगतोऽहं त्वदभ्यर्णे, यथा दृष्टं भाषितम् ॥ ५२० ॥

वितर्कवाचं श्रुत्वैतामप्रबुद्धो व्यचिन्तयत् ।
सिद्धान्तेन यथोक्तं मे, तथैवेदमभूदहो ॥ ५२१ ॥

पालनापालनाद् राज्यं, कारणं सुखदुःखयोः ।
तेनोक्तं तद् वितर्केणापीत्थमेव समर्थितम् ॥ ५२२ ॥

निकृष्टाधमयोर्जातं, दुःखस्यैवैककारणम् ।
तद्राज्यं सर्वथा तेन, ताभ्यां दुष्पालितं कृतम् ॥ ५२३ ॥

विमध्यमस्य सम्पन्नं, तत् स्वल्पसुखकारणम् ।
बहिर्भूतेन तेनेदं, यत् कृतं मन्दपालितम् ॥ ५२४ ॥

मध्यमस्य पुनर्जातं, तद्भूरिसुखकारणम् ।
प्रविश्य तेन यदिदं, पालितं मध्यमादरात् ॥ ५२५ ॥

द्वयोश्चरमयोर्जातं, निःशेषसुखकारणम् ।
तद्राज्यं पालितं येन, ताभ्यां सर्वोचितादरात् ॥ ५२६ ॥

राज्यषट्कमिदं ज्ञात्वा, सर्वं ज्ञातं मया किल ।
ईदृग्विवर्तभृद् विश्वं, तथा चाहुर्मनीषिणः ॥ ५२७ ॥

येन संवत्सरो दृष्टः, सकृत् कामश्च सेवितः ।
तेन सर्वमिदं दृष्टं, पुनरावर्तकं जगत् ॥ ५२८ ॥

ततो जातः प्रबुद्धोऽसौ, नष्टा सर्वाऽप्रबुद्धता ।
इदं प्रसङ्गतः प्रोक्तं, मया तुभ्यं नरेश्वर ! ॥ ५२९ ॥

कथं दोषोऽन्यदोषेण, स्यादिति प्रस्तुतं पुनः ।
निकृष्टाधमवत् तत्र, निश्चेयो दोषसंक्रमः ॥ ५३० ॥

यथा मोहादिभिश्चौरैस्तौ दृष्ट्या च प्रपीडितौ ।
तथाऽसौ मित्रदोषेण, पीड्यते धनशेखरः ॥ ५३१ ॥

हरिराह महासाधो !, नष्टोऽयं मम संशयः ।
गतेषु तेषु भूपेषु, षट्सु किं भावि तद् वद ॥ ५३२ ॥

सूरिराह महाराज !, ये केऽपि भुवि देहिनः ।
ते कर्मपरिणामस्य, पुत्राः सर्वेऽपि तत्त्वतः ॥ ५३३ ॥

आवर्तमानैस्तैः सर्वैः, षड्भेदान्तर्भविष्णुभिः ।
सा स्थितिः पाल्यतेऽन्यान्यैर्निर्लेपश्च न जायते ॥ ५३४ ॥

तिष्ठन्त्वन्ये सुतास्तस्य, विद्धि मामेव तत्सुतम् ।
स्वराज्ये यः प्रविष्टोऽहं, सिद्धान्तोक्तेन वर्त्मना ॥ ५३५ ॥

हतारिवर्गश्चारित्रसैन्यस्य परिपोषकः ।
भुञ्जानो राज्यमायातः, ख्यातकीर्तिरिहोत्तमः ॥ ५३६ ॥

स्वसंवेदनसिद्धं मे, यद् राज्ये परमं सुखम् ।
स्वप्नेऽपि नास्ति तद् राजन् ! शक्रचक्रभृतामपि ॥ ५३७ ॥

यथाऽहमुत्तमः कर्मपरिणामस्य नन्दनः ।
निकृष्टाद्यास्तथान्येऽपि, सन्त्यनन्ताः प्रवाहगाः ॥ ५३८ ॥

हरिर्जगाद यद्येवं, तदाऽहं तेषु कीदृशः ।
सूरिः प्राह नरेन्द्र ! त्वं, मध्यमः प्रतिभासि मे ॥ ५३९ ॥

त्रिवर्गमाराधयसि, यद् विभज्य दिवाऽनिशम् ।
इदं मध्यमराज्यस्य, लक्षणं च प्रकीर्तितम् ॥ ५४० ॥

हरिर्मोहकरिध्वंसहरिमाह ततो गुरुम् ।
अलं मध्यमराज्येन, ममानेनागरीयसा ॥ ५४१ ॥

आत्मीयमुत्तमं राज्यं, भदन्त ! मम दाप्यताम् ।
सूरिराह महाराज, त्वया चारु विचारितम् ॥ ५४२ ॥

महान्तो नैव तुष्यन्ति, स्वल्पेन विपुलाशयाः ।
मृगवत् किं मृगारातिस्तृणग्रासेन तृप्यति ॥ ५४३ ॥

आपातरम्यं तुच्छं च, त्यजन् वैषयिकं सुखम् ।
मुक्तावुत्तिष्ठते भव्यो, भवं स्वप्नोपमं विंदन् ॥ ५४४ ॥

यदि त्वमौत्तमं राज्यमादातुमभिकाङ्क्षसि ।
तदा भागवतीं दीक्षां, गृहाण भवनाशिनीम् ॥ ५४५ ॥

इदं सूरेर्वचः श्रुत्वा हृष्टो हरिनरेश्वरः ।
पुत्रं शार्दूलनामानं, राज्ये संस्थाप्य चारुधीः ॥ ५४६ ॥

दिनान्यष्ट जिनेन्द्राणां, कृत्वा पूजामहोत्सवम् ।
दत्त्वा दानं तथाऽर्थिभ्यो, गुरून् सत्कृत्य भावतः ॥ ५४७ ॥

समं मयूरमञ्जर्याऽनेकैश्च नृपपुङ्गवैः ।
तस्योत्तमगुरोः पार्श्वे, निष्क्रान्तः शान्तशात्रवः ॥ ५४८ ॥

ततः प्राप्यौत्तमं राज्यं, विज्ञानानन्दमेदुरः ।
विजहार महोदारमानसः पृथिवीतले ॥ ५४९ ॥

राज्ये परिणते तस्य, पर्यायात् समवर्धत ।
शुक्लस्य शुक्लजात्यस्य, स्वभावजनितं सुखम् ॥ ५५० ॥

इतश्च मैथुनेनाहं, सागरेण च नाटितः ।
भ्रान्तो भूरिषु देशेषु, सोढवान् क्लेशसन्ततिम् ॥ ५५१ ॥

अथान्यदा महारण्ये, पतितोऽत्यन्तभीषणे ।
स्वेदक्लिन्नतनुः श्रान्तः, स्थितो बिल्वद्रुमान्तिके ॥ ५५२ ॥

प्ररोहं भूमिगं दृष्ट्वा, तच्छाखानिर्गतं ततः ।
ज्ञात्वा निधानं तद्भूमिः, खाता लुब्धधिया या ॥ ५५३ ॥

ततो दृष्ट्वा महाकुम्भमुद्धर्तुं रत्नपूरितम् ।
अधोगतं भाग्यमिव, प्रवृत्तः सागराज्ञया ॥ ५५४ ॥

स्फोटयन्निव दिग्भागांस्तावद् भीषणनादतः ।
कालः करालवदनः, क्रोधज्वलितलोचनः ॥ ५५५ ॥

अभाग्येन समाहूतः, कृतान्त इव मूर्तिमान् ।
उद्भूतस्तत्र वेतालो, दीर्घदंष्ट्रः सुदारुणः ॥ ५५६ ॥

तेनाहमारटन्नुच्चैः, क्षिप्त्वा वदनकोटरे ।
पातितोऽत्रान्तरे जीर्णा, गुटिका मे पुरातनी ॥ ५५७ ॥

ततस्तामपरां दत्त्वा, भवितव्यतया तया ।
नीतः पापिष्ठवासायां, पुर्यां सप्तमपाटके ॥ ५५८ ॥

तत्रानुभूय दुःखानि, सर्वस्थानेष्वनन्तशः ।
भ्रान्तोऽनन्तं पुनः कालमन्यान्यगुटिकाबलात् ॥ ५५९ ॥

प्रोक्तोऽहं कृतसत्कर्मा, भवितव्यतयाऽन्यदा ।
आर्यपुत्र ! त्वया स्थेयं; गत्वा साह्लादपत्तने ॥ ५६० ॥

तथेत्युक्तवतो दत्तस्तया पुण्योदयः सखा ।
गुटिका च ममान्याऽथ, प्रस्थितोऽहं वरानने ! ॥ ५६१ ॥

इति मैथुनलोभदुष्टदृक्-फलधारामवधृत्य कृत्यवित् ।
विरतौ स्थिरतामुपैति यो, लभतेऽसौ सुयशःश्रियं शुचिम् ॥ ५६२ ॥

॥ अष्टमः स्तबकः ॥

अथास्ति नाम्ना साह्लादं, पुरं शक्रपुरोपमम् ।
महारत्नमयोत्तुङ्गसौधकान्तिमनोहरम् ॥ १ ॥

तत्रोल्लासितभूमित्रमयूरानन्दकारकः ।
नाम्ना च परिणामेन, जीमूतो राजते नृपः ॥ २ ॥

अस्ति तस्य महादेवी, लीला लीलेव मूर्तिभृत् ।
तस्याः कुक्षावहं, नीतो, भवितव्यतया, तया ॥ ३ ॥

पूर्णे काले प्रसूतोऽहं, माता तोषमुपागता ।
तया तदैव जातोऽपि, दृष्टः पुण्योदयस्तु न ॥ ४ ॥

सुतजन्म प्रियकर्या, जीमूताय निवेदितम् ।
दत्तं तेन महादानं, कारितं बन्दिमोचनम् ॥ ५ ॥

आनन्दपूर्णचित्तेन, समयेऽथ ममोचिते ।
घनवाहन इत्युच्चैर्नाम पित्रा प्रतिष्ठितम् ॥ ६ ॥

इतश्चास्ति लघुर्भ्राता, जीमूतस्य महीपतेः ।
नीरदाख्यो महादेवी, पद्माऽऽख्या तस्य विश्रुता ॥ ७ ॥

मज्जन्मावसरे साऽपि, पूतं प्रासूत दारकम् ।
अकलङ्क इति व्यक्तं, नाम तस्य प्रतिष्ठितम् ॥ ८ ॥

बाल्ये धूल्यादिना सार्धं, क्रीडिताववियोगिनौ ।
प्रवृद्धौ सुखसन्दोहैरहं च स च लालितौ ॥ ९ ॥

मैत्री तेनाकलङ्केन, कौमारेऽजनि मे सह ।
कदापि न पृथग् भूतं तया स्यूतं मनो द्वयोः ॥ १० ॥

अधीतवन्तावेकस्मादाचार्यात् सकलाः कलाः ।
क्रमेण यौवनं प्राप्तावुभौ मदनकाननम् ॥ ११ ॥

स चाकलङ्को बाल्येऽपि, कौमारेऽपि च यौवने ।
न निन्द्यचेष्टितैः स्पृष्टः, केसरीव श्वलक्षणैः ॥ १२ ॥

शान्तो विनीतः पुण्यात्मा, सत्यगीर्देवपूजकः ।
स्थिरस्तनुकषायश्च, प्रकृत्या स्वच्छमानसः ॥ १३ ॥

सोऽज्ञातपरमार्थोऽपि, तत्त्वज्ञानीव भासते ।
जात्यस्याघटितस्यापि रत्नस्य श्रीः परैव हि ॥ १४ ॥

जातः सुसाधुसम्पर्काद्, दक्षोऽथासौ जिनागमे ।
प्रज्ञापनीयः श्रद्धावान्, शुद्धमार्गानुसारिधीः ॥ १५ ॥

स्नेहं मयि न तत्याज, सोऽकलङ्कस्तथाऽपि हि ।
प्राप्तश्रीरपि मेघोऽब्धेः, केकिमैत्रीं जहाति किम् ॥ १६ ॥

अन्योन्यस्नेहमधुरैः, स वैदग्ध्याविजृम्भितैः ।
कृतस्मरमधुव्रीडां, क्रीडां सह मयाऽकरोत् ॥ १७ ॥

मयोद्यानेऽन्यदा नीतो, लीलार्थं बुधनन्दने ।
ममोपरोधात् तत्रासौ, क्रीडित्वा प्रहरद्वयम् ॥ १८ ॥

मध्याह्ने प्रस्थितो गन्तुं, गृहमुक्तं मया तदा ।
क्षणं विश्रम्य यास्यावो, वयस्यात्र वनान्तरे ॥ १९ ॥

अकलङ्को वचः श्रुत्वा, तन्मदीयमुदारधीः ।
उद्यानभागमध्यस्थमविशज्जिनमन्दिरम् ॥ २० ॥

तत्रार्हन्तमभिष्टूय, पुराणं पुरुषोत्तमम् ।
तेन दृष्टा मया सार्धं, निर्गतेन सुसाधवः ॥ २१ ॥

ते च तत्राष्टमीं मत्वा, समायाता उपोषिताः ।
नत्वाऽर्हन्तं बहिः सूत्रं, गणयन्तः पृथक् पृथक् ॥ २२ ॥

निर्मलच्छवयो दीप्ताः, स्थिरा दूरे स्थिता मिथः ।
रत्ना दीपा इव बहिर्द्वीपेन्दव इवाथवा ॥ २३ ॥

अकलङ्कस्ततः प्राह, कुमार घनवाहन ! ।
पश्येमे मुनयः सूर्या इव तेजोविराजिताः ॥ २४ ॥

मन्मथा इव रूपेण, गाम्भीर्येणेव सागराः ।
स्थैर्येण मेरव इव, श्रिया कल्पद्रुमा इव ॥ २५ ॥

अदृष्टसृष्टिवैषम्यापवादापनिनीषया ।
एकरूपाः कृता एते, धात्रा किं शक्तिपाटवात् ॥ २६ ॥

एषां लावण्यपुञ्जानां, राज्योचितमहोभृताम् ।
को दीक्षाग्रहणे हेतुरिति मे हृदि कौतुकम् ॥ २७ ॥

तदेहि तावत् पृच्छावः, प्रत्येकं मुनिपुङ्गवान् ।
अमून् किं कस्य वैराग्ये, कारणं समभूदिति ॥ २८ ॥

मयेत्थमस्त्विति प्रोक्ते, पार्श्वमेकमुनेर्गतौ ।
अकलङ्केन पृष्टोऽसौ, किं ते वैराग्यकारणम् ॥ २९ ॥

मुनिः प्राह शृणु ग्रामे, वास्तव्योऽहं कुटुम्बिकः ।
लोकोदरे तत्र निशि, प्रदीपनकमुत्थितम् ॥ ३० ॥

प्रससर्प महाधूमो, ज्वालाजालमवर्द्धत ।
वंशस्फोटरवः सर्वैः, श्रुतो लोकाः समुत्थिताः ॥ ३१ ॥

रुदन्ति डिम्भरूपाणि, नार्यो धावन्ति विह्वलाः ।
रटन्त्यन्धाः कलकले, जाते क्रोशन्ति पङ्गवः ॥ ३२ ॥

षिङ्गाः किलकिलायन्ते, मुष्णन्ति परिमोषिणः ।
सर्वस्वाणि(नि) च दह्यन्ते, शोचन्ति कृपणा भृशम् ॥ ३३ ॥

अमातापितृकं सर्वं, संजातमसमञ्जसम् ।
कश्चित् प्रदीपने तत्र, विबुद्धो मन्त्रविन्महान् ॥ ३४ ॥

उत्थाय ग्राममध्यस्थे, स च गोचन्द्रके स्थितः ।
तेनात्मकवचं कृत्वा, रेखयाऽकारि मण्डलम् ॥ ३५ ॥

शब्देन तेन महताऽऽहूता ग्रामेयका जनाः ।
मण्डले मे प्रविशत, यूयमागच्छतात्र भोः ॥ ३६ ॥

न सर्वस्वाणि(नि) चाङ्गानि, दह्यन्ते भवतां यथा ।
तच्छ्रुत्वा प्राविशंस्तत्र, लोकाः स्वल्पतमाः किल ॥ ३७ ॥

ग्रहिला इव शेषास्तु, प्रदीपनकतस्ततः ।
दह्यमानेषु गेहेषु, तृणकाष्ठादि चिक्षिपुः ॥ ३८ ॥

तस्य विध्यापनं कर्तुमीषुर्घृतभृतैर्घटैः ।
मण्डलस्था जगुर्वह्निशमोपायोऽस्य नैष वः(च) ॥ ३९ ॥

जलेन विध्यापयत, वह्निं प्रविशतात्र च ।
मण्डले यूयमस्माकमिव स्याद् वो यथा सुखम् ॥ ४० ॥

तत् तेषां न वचः केचित्, कर्णे नाकर्णयन्त्यपि ।
केचिद्धसन्ति निन्दन्ति, केऽपि रुष्यन्ति केचन ॥ ४१ ॥

मण्डलस्थास्ततो लोकास्तस्थुर्मौनावलम्बिनः ।
कैश्चित्तु वचनं तेषामादृतं पुण्यभाजनैः ॥ ४२ ॥

ममापि प्रतिभातं तद्, भवितव्यतया वचः ।
प्रविष्टो द्रुतमुत्प्लुत्य, ततोऽहं तत्र मण्डले ॥ ४३ ॥

ते ग्रामीणा मया दृष्टाः, प्राप्य प्रबलमारुतम् ।
प्रदीपनेन दीप्तेन, दह्यमाना हताशयाः ॥ ४४ ॥

मण्डलस्थेषु लोकेषु, प्रव्रजत्सु कियत्स्वथ ।
अहं प्रव्रजितो भद्र !, वैराग्ये हेतुरेष मे ॥ ४५ ॥

इमां मुनेर्गिरं श्रुत्वाऽकलङ्को मुदितो हृदि ।
चलितोऽन्यमुनेः पार्श्वे, न बुद्धोऽर्थो मया परम् ॥ ४६ ॥

अकलङ्को मया पृष्टस्ततः किमयमाह ते ।
कं भावमाकलय्य त्वं, हृष्टोऽस्यथ जगाद सः ॥ ४७ ॥

योऽयं लोकोदरो ग्रामः, स्ववासार्हो निवेदितः ।
मुनिना विद्धि संसारं, तं मित्र घनवाहन ! ॥ ४८ ॥

रात्रिस्तत्र सदाऽविद्या, लग्नं तस्यां प्रदीपनम् ।
रागद्वेषाग्निना धूमस्तामसो भाव उत्थितः ॥ ४९ ॥

ज्वालौघो राजसो भावो, वंशस्फोटरवोपमाः ।
कलहास्तत्र भावाग्नेरुत्तिष्ठन्ति च जन्तवः ॥ ५० ॥

रुदन्ति डिम्भरूपाभाः, कषाया हृदयग्रहाः ।
अशुद्धलेश्या संज्ञाश्च, नार्यो धावन्ति विह्वलाः ॥ ५१ ॥

भवकोलाहले मूर्खा, रटन्त्यन्धा इवातुराः ।
ज्ञानिनोऽपि क्रियाशून्या, जनाः क्रोशन्ति पङ्गवः ॥ ५२ ॥

उच्चैः किलकिलायन्ते, नास्तिकाः षिङ्गसन्निभाः ।
मुष्णन्तीन्द्रियचौराश्च, धर्मसर्वस्वमङ्गिनाम् ॥ ५३ ॥

रागाग्निना च दह्यन्ते, सर्वस्वानि शरीरिणाम् ।
किं कुर्म इति शोचन्ति, तद् दृष्ट्वा कृपणाः परे ॥ ५४ ॥

भवप्रदीपनं रौद्रं, वर्णितं मुनिनेदृशम् ।
अमातापितृकं चैतदुक्तं त्रातुरभावतः ॥ ५५ ॥

विबुद्धो मन्त्रवित् तत्र, सर्वज्ञः परमेश्वरः ।
तेन चोत्थाय विहितं, विशालं तीर्थमण्डलम् ॥ ५६ ॥

गोचन्द्रकाकृतौ तच्च, मध्यलोके प्रकाशितम् ।
धृत्वा धर्मात्मकवचं, सूत्रमन्त्रस्य रेखया ॥ ५७ ॥

तेन देशनयाऽऽह्वानं, समुत्साह्याङ्गिनां कृतम् ।
प्राविशन्मण्डले स्तोका, भवस्थानन्तभागगाः ॥ ५८ ॥

कुर्वन्त्यन्ये च नार्यादिपाशस्था धनसंचयम् ।
क्षेपोऽयं तृणकाष्ठादेर्ज्ञेयो जन्मप्रदीपने ॥ ५९ ॥

क्षेपोऽत्र घृतकुम्भानां, कषायोद्दीपनं मुहुः ।
तिष्ठन्ति वारितास्ते च, न मूढा मण्डलस्थितैः ॥ ६० ॥

शमाम्बुना न कुर्वन्ति, शान्तिं न प्रविशन्ति च ।
मण्डले नैव शृण्वन्ति हितं हासादि कुर्वते ॥ ६१ ॥

केचिदेव प्रबुध्यन्ते, यथाऽसौ बुद्धिमान् मुनिः ।
प्रतिबुद्धो गिरा तेषां, प्रविष्टस्तीर्थमण्डले ॥ ६२ ॥

दृष्टाश्चानेन ते लोकाः, संसारग्रामवासिनः ।
रागद्वेषाग्निनाऽत्यन्तं, दह्यमानाः प्रसर्पता ॥ ६३ ॥

अशुद्धभावपवनप्रेरितोऽसौ महानलः ।
दहत्यतिभरीभूतो, जीवान् ग्रामेयकानिव ॥ ६४ ॥

दृष्ट्वाऽसौ तांस्तथाभूतान्, भीतो यत् प्राव्रजद् भवात् ।
तत् तीर्थमुख्यसाधुत्वं, शिश्रायेति विनिश्चिनु ॥ ६५ ॥

मुनिमध्यस्थितश्चैष, न संसारप्रदीपने ।
दह्यते धर्ममेघेन, विध्यापयति तत् परम् ॥ ६६ ॥

प्रदीपनकमुद्दिष्टं, तदिदं मुनिनाऽऽवयोः ।
प्रतिबोधाय तद्भावबोधात् प्रीतिमहं गतः ॥ ६७ ॥

भावश्चायं मुनेरत्र, युवयोर्दह्यमानयोः ।
प्रदीपने ध्रुवं युक्तः, प्रवेशस्तीर्थमण्डले ॥ ६८ ॥

भावोऽयं रोचते मह्यं, तुभ्यं किं रोचते न वा ।
इति श्रुत्वाऽकलङ्कस्य, वचोऽहं मौनमास्थितः ॥ ६९ ॥

द्वितीयस्य मुनेः पार्श्वमकलङ्को मया सह ।
गत्वा नत्वाऽथ तं भक्त्याऽपृच्छद् वैराग्यकारणम् ॥ ७० ॥

स प्राह गृहवासो मे, वैराग्यायनघाभवत् ।
तथाहि गृहमेकत्र, ग्रामे जीर्णमभून्मम ॥ ७१ ॥

निशि चौराः समागत्य, खनन्ति तदनारतम् ।
मुष्णन्ति यदि पश्यन्ति, धनं क्वचन किञ्चन ॥ ७२ ॥

क्रूराः पतन्ति मार्जारास्तत्र निर्यान्ति पन्नगाः ।
वृश्चिकाः संचरन्त्युच्चैर्दुःखयन्ति च मूषकाः ॥ ७३ ॥

भग्नाऽभूत् तत्र शय्या मे, वासः शटितमेव च ।
चौरैर्मुषितवित्तस्य, प्राणवृत्तिश्च भिक्षया ॥ ७४ ॥

कुरूपा दन्तुरा काणा नित्यं कलहकारिगी ।
भार्या च बह्वपत्यानां, जनयित्री ममाभवत् ॥ ७५ ॥

मलमूत्रैरपत्यानां, नासावशुचि लिम्पति ।
गृहं तनोति नातिथ्यमतिथेरागतस्य च ॥ ७६ ॥

पुञ्जं च तृणधूलीनां, गृहान्नापनयत्यसौ ।
तमोमय्यां न शर्वर्यां, दीपमुद्दीपयत्यपि ॥ ७७ ॥

गृहपार्श्वे ममाभूवंश्चाण्डालाः प्रातिवेश्मिकाः ।
व्याधाश्च मैनिका म्लेच्छा, मद्यपाश्च सहस्रशः ॥ ७८ ॥

अस्थिभिस्तद्विनिक्षिप्तैरन्यैश्चाशुचिसञ्चयैः ।
नाभूद् गृहविभागो मे, तद्गृहेभ्यः कदाचन ॥ ७९ ॥

सर्वोऽपि मादृशः प्रायस्तद्ग्रामस्थो जनो यतः ।
तत्र केनाप्यहं तत्र, निषिद्धो नापि निन्दितः ॥ ८० ॥

दुरवस्थां गतस्यापि तादृशीं कुरुते रतिम् ।
विड् गर्ताशूकरस्येव, गृहवासः स मे सदा ॥ ८१ ॥

गृहस्थानन्यदाऽद्राक्षमेकत्राहं गतः पुरे ।
महासौधस्थितान् पूतांस्तैरहं प्रतिबोधितः ॥ ८२ ॥

तद्ग्रामगृहवासस्य, स्वरूपं तैर्निवेदितम् ।
संहृता मोहमाया च स्वतुल्यस्तैरहं कृतः ॥ ८३ ॥

ततः कुर्वे कृपां दृष्ट्वा, तद्ग्रामगृहवासिनः ।
तदयं गृहवासो मे, जातो वैराग्यकारणम् ॥ ८४ ॥

तदाकर्ण्य प्रवृत्तोहो, जातिस्मृतिमवाप्नुवन् ।
अकलङ्कः स्मृताभ्यस्तश्रुतो भावमलक्षयत् ॥ ८५ ॥

तं नत्वा चलितः सोऽथ, तृतीयमुनिसम्मुखम् ।
किमनेनोक्तमित्युच्चैर्मया पृष्टो जगाविदम् ॥ ८६ ॥

ग्रामो भवप्रवाहाख्यः, प्रोक्तोऽनेन महात्मना ।
गृहं चानादिचैतन्यं, जीर्णं पर्यायहानितः ॥ ८७ ॥

खनन्ति तदविद्यायां, रात्रौ विषयतस्कराः ।
मुष्णन्ति शुभसंकल्पं, धनं पश्यन्ति ते यदि ॥ ८८ ॥

पतन्तीन्द्रियमार्जाराः, शममूषकभक्षिणः ।
मदानामुदयस्तत्र, व्यालनिर्गमसन्निभः ॥ ८९ ॥

वृश्चिकानां च संचारो, दैन्योद्दीपनलक्षणः ।
संकल्पा मूषका ध्यानसारग्रन्थिच्छिदाऽर्तिदाः ॥ ९० ॥

भङ्गश्च सुखशय्यायास्तत्र दुःखप्रहारतः ।
वसतस्तत्र तुच्छाशावासः शटितमिष्यते ॥ ९१ ॥

भिक्षया प्राणवृत्तिश्च, वासवादेरपीष्यते ।
भवस्थस्य पराधीनपुद्गलादानलक्षणा ॥ ९२ ॥

भार्या च ममतादोषदन्तोच्चत्वेन दन्तुरा ।
परलोकेक्षणाभावात् काणा कार्ष्ण्यात् कुरूपिणी ॥ ९३ ॥

कुरुतेऽसावभिमतालाभेन कलहं सदा ।
सूतेऽनन्तान्यपत्यानि, रागादीनि पुनः पुनः ॥ ९४ ॥

विकारैर्मृदुतीव्रैश्च, तन्मूत्रमलसन्निभैः ।
सन्तोषगोमयरसैर्गृहं नाशुचि लिम्पति ॥ ९५ ॥

अतिथेः कुलधर्मादिप्रसङ्गादागतस्य सा ।
आतिथेयीं वितनुते, न नाम परमात्मनः ॥ ९६ ॥

स्वचैतन्यगृहात् कर्मफलसंवित्तिलक्षणम् ।
नोत्सारयति सा हन्त, तृणधूलिकदम्बकम् ॥ ९७ ॥

सत्सङ्गाख्यमविद्यायां, रात्रौ दीपं तनोति न ।
भार्यारूपेण तदसौ, संपन्ना गृहभङ्गकृत् ॥ ९८ ॥

अनेन घातिकर्माणि, चाण्डालाः प्रातिवेश्मिकाः ।
खलसङ्गा मता व्याधा, गुणौघमृगघातिनः ॥ ९९ ॥

मैनिका मूर्खतोन्मादा, मेधामीननिबर्हणाः ।
मिथ्यात्वसञ्ज्ञया म्लेच्छा, भाषादेशार्यताभिदः ॥ १०० ॥

मद्यपाः कुमनोरूपा, व्यत्यासमदघूर्णिताः ।
अविवेकास्थिविक्षेपाशुचीनि प्रक्षिपन्ति ते ॥ १०१ ॥

ततोऽस्य गृहपार्थक्यं, न सतां लक्ष्यतां गतम् ।
न निन्द्यतां च तादृक्षसर्वतद्ग्रामवासिनाम् ॥ १०२ ॥

अन्यदा च महात्माऽसौ, पुरे जैनाभिधे गतः ।
तत्र सत्साधवो दृष्टाः, समताभार्यया युताः ॥ १०३ ॥

स्थिता ज्ञानमहासौधे, भावरत्नकृते नवे ।
तेजस्विनो महावीर्याः, सर्वदोषविवर्जिताः ॥ १०४ ॥

युताः सत्यादिभिः पुत्रैः, शोभनप्रातिवेश्मिकाः ।
तात्त्विकीं श्रेयसां भूमिं, कलयन्तो गृहस्थताम् ॥ १०५ ॥

तैः सम्यक्त्वौषधीं दत्त्वा, मोहमायाऽस्य संहृता ।
उद्विग्नोऽसौ ततो ज्ञात्वा, स्वीयगार्हस्थ्यदुःस्थताम् ॥ १०६ ॥

गार्हस्थ्यमुररीचक्रे, तां विहायैष तात्त्विकम् ।
भवग्रामगृहस्थेषु, जाताऽस्याथ महाकृपा ॥ १०७ ॥

प्रदर्शयन्नयं स्वीयगृहवासस्य दुःस्थताम् ।
वैराग्योद्दीपनात् स्वान्तमाक्षिपत्यावयोरपि ॥ १०८ ॥

यादृशो गृहवासोऽस्य, निन्द्यो दुःखैककारणम् ।
छन्नोऽप्यज्ञानसंमोहादावयोरपि तादृशः ॥ १०९ ॥

त्यागार्होऽयं न तन्मित्र, किं तवाप्यवभासते ।
वाचमित्यकलङ्कस्य, श्रुत्वाऽहं मौनमास्थितः ॥ ११० ॥

मुनेरथ तृतीयस्य, सोऽकलङ्को मयाऽन्वितः ।
गतोऽन्तिकमपृच्छत् तं, कुतोऽभूस्त्वं विरागवान् ॥ १११ ॥

तेन प्रोक्तं मया भद्र, मद्यापानकमीक्षितम् ।
तदेव मम संपन्नं, भववैराग्यकारणम् ॥ ११२ ॥

आसं तत्र मदोन्मत्तो, बोधितो ब्राह्मणैस्ततः ।
अकलङ्को बभाषे तं, यादृगापानके स्थितः ॥ ११३ ॥

बोधितो ब्राह्मणैर्यैश्च, तत्सर्वं वक्तुमर्हसि ।
मुनिः प्राह ततः स्वीयमापानकविचेष्टितम् ॥ ११४ ॥

चित्रासवसुरापूर्णं राजितं शितिनीरजैः ।
लोकैश्च चारुचषकसरकैर्मदघूर्णितैः ॥ ११५ ॥

नानाविधविलासाढ्यं, कृततालमहारवम् ।
मत्तकान्तजनाकीर्णं, प्रौढस्त्रीकृतविभ्रमम् ॥ ११६ ॥

वीणामर्दलकांस्यादिनादवर्धितसंमदम् ।
सेवितं सर्वसामग्रीयुक्तमापानकं मया ॥ ११७ ॥

तत्रानन्ता न चेष्टन्ते, न भाषन्ते च घूर्णिताः ।
मदेन व्यवहारं च, नैव कुर्वन्ति लौकिकम् ॥ ११८ ॥

अन्येऽप्यनन्तास्तद्रूपाः, सन्ति तत्र जनाः परम् ।
कार्यं लोकव्यवहृतेस्ते कुर्वन्त्यन्तराऽन्तरा ॥ ११९ ॥

तादृशास्तत्र सन्त्यन्येऽप्यसंख्याः पार्थिवादयः ।
परे पुनरसंख्याता, निर्भरं मद्यपायिनः ॥ १२० ॥

न जिघ्रन्ति न पश्यन्ति, नापि शृण्वन्ति किञ्चन ।
लिहन्ति जिह्वया किञ्चित्, किन्त्वाराटिमुचो भृशम् ॥ १२१ ॥

न शृण्वन्ति न पश्यन्ति, संख्यातीताः परे पुनः ।
जिघ्रन्ति केवलं किञ्चित्, परे संख्याऽतिगाः पुनः ॥ १२२ ॥

नाकर्णयन्ति किन्त्वक्ष्णा, पश्यन्ति पुरतः स्थितम् ।
तत्रासंख्याः परे मद्याद्, दधते चित्तशून्यताम् ॥ १२३ ॥

अन्ये पुनरसंख्याता, दृष्टा विस्पष्टचेतनाः ।
दुर्मद्यमत्तता तेषु, किन्त्वाकालमवस्थिता ॥ १२४ ॥

पाट्यन्ते ते च भिद्यन्ते, छिद्यन्ते रिपुभिर्भृशम् ।
मदोद्धताश्च कुर्वन्ति, तीव्रां ते वेदनां मिथः ॥ १२५ ॥

भ्राम्यन्ति मदिरोद्भ्रान्तास्तत्रासंख्याः परेऽपि च ।
अज्ञा अव्यक्तघोषास्ते, गच्छन्ति जननीमपि ॥ १२६ ॥

अन्येऽपि तत्र विद्यन्ते, संख्याऽतीता मनुष्यकाः ।
गाढमत्तास्तथाऽन्ये च, ते पुनर्द्विविधाः स्मृताः ॥ १२७ ॥

तत्र ये गाढमत्तास्ते, विलुठन्तो भुवस्तले ।
वान्तं पित्तं मलं मूत्रं, भक्षयन्ति मुहुर्मुहुः ॥ १२८ ॥

इतरे भद्र ! संख्यातास्ते पुनर्मदिरामदात् ।
गायन्ति परिनृत्यन्ति, युध्यन्ते च हसन्ति च ॥ १२९ ॥

भूयो लुठन्ति धावन्ति, वल्गन्ति च परस्परम् ।
चुम्बन्ति वक्त्रनेत्राणि, बालानां योषितां तथा ॥ १३० ॥

कुर्वन्तेऽनार्यकार्याणि, सहन्ते तीव्रवेदनाः ।
न तु मद्याद् विरज्यन्ते, राजभिर्दण्डिता अपि ॥ १३१ ॥

अन्ये सन्ति मदाध्माताश्चतुर्वृन्दव्यवस्थिताः ।
सदा केलिप्रियाः संख्याऽतीता नृत्यादिनिर्भराः ॥ १३२ ॥

आपानकस्था मध्यस्थाः, संख्याताः सन्ति चापरे ।
अमद्यपा मद्यपैस्ते, ब्राह्मणा ईर्ष्ययोदिताः ॥ १३३ ॥

स्थिता अनन्ता मोदन्ते, परे त्वापानकाद् बहिः ।
आपानकस्य वैषम्यं, पश्यन्तो मदवर्जिताः ॥ १३४ ॥

आद्येषु तत्र लोकेषु, स्थित्वाऽहं मदविह्वलः ।
गतो दैवाद् द्वितीयेषु तृतीयेषु ततः पुनः ॥ १३५ ॥

इत्थं चैतेषु भेदेषु, त्रयोदशसु हिण्डितः ।
अनन्तशो विमुच्याहं, भेदमाद्यं तथाऽन्तिमौ ॥ १३६ ॥

पुनर्न दृष्टो मुक्तः स, आद्यभेदः कथञ्चन ।
भूयो भूयो गतः पापाद्, दशभेदेष्वहं पुनः ॥ १३७ ॥

विण्मूत्रश्लेष्मजम्बालवान्तपित्ताशुचिस्थले ।
क्वचिल्लुठन् क्वचिद् रिङ्खन्, दुर्मद्यात् क्वचिदारटन् ॥ १३८ ॥

उत्तिष्ठन् निपतन् धावन्, हसन् नृत्यन् रणं सृजन् ।
कुट्यमानो जनैर्दुःखधोरणीरनुभूतवान् ॥ १३९ ॥

ब्राह्मणैरन्यदा दृष्टस्तैरापानकमध्यगैः ।
कृतः कृपालुभिर्मद्यत्याजनाय मयि श्रमः ॥ १४० ॥

वचः पूत्कुर्वतां तेषामहं तु मदघूर्णितः ।
न किञ्चिद् ज्ञातवान् भ्रान्तस्ततस्तत्र पुनः पुनः ॥ १४१ ॥

अथान्यदा क्वचित् तेषां, वचने हुङ् कृतं मया ।
यतितं तैश्च यावन्मे, मद्यघस्मरको गतः ॥ १४२ ॥

तैर्मद्यदोषाः कथिता, मयि संलब्धचेतने ।
कारितो मद्यविरतिं, जातोऽहं ब्राह्मणस्ततः ॥ १४३ ॥

तेषु प्रव्रजितश्चाहं, यदद्यापि न जीर्यति ।
मद्यं तज्जारयिष्यामि, भावप्रव्रज्ययाऽखिलम् ॥ १४४ ॥

इदं मुनिवचः श्रुत्वा, भावज्ञानान्मुदं श्रयन् ।
अकलङ्को मया पृष्टो, व्याजहाराशयं मुनेः ॥ १४५ ॥

आपानकतया भद्र, भवमेव जगौ मुनिः ।
जीवा अनन्ताः सन्त्यत्र, मद्यपाः कर्म मद्यति ॥ १४६ ॥

विशिष्य चासवायन्ते, कषाया घातिकर्मणाम् ।
पटलानि सुरायन्ते, भाजनन्त्यायुरालयः ॥ १४७ ॥

चषकन्ति तदाधारतया गात्राणि जन्मिनाम् ।
कर्ममद्योपयोगित्वान्नीलाब्जन्तीन्द्रियाणि च ॥ १४८ ॥

घूर्णन्ते कर्ममद्येन, मत्ताः सर्वेऽपि जन्तवः ।
विलासहासबिब्बोककोलाहलपरायणाः ॥ १४९ ॥

कलहा मर्दलायन्ते, खलानामत्र संकथाः ।
लसत्कंसालकायन्ते, दैन्यं वीणायतेऽर्थिनाम् ॥ १५० ॥

वंशवाद्यायते लोकशोकाक्रन्दितसन्ततिः ।
मुखवाद्यायते गाढमग्नमूर्खविचेष्टितम् ॥ १५१ ॥

मत्तकान्तजनायन्ते, सदानन्दा इहामराः ।
उदारविभ्रमाः प्रौढकान्तायन्तेऽप्सरोगणाः ॥ १५२ ॥

संसारापानकमिदं, लोकाकाशप्रतिष्ठितम् ।
लोल्याय जडबुद्धीनां, वैराग्याय विवेकिनाम् ॥ १५३ ॥

लोकानां मुनिनोद्दिष्टा, भेदा ये च त्रयोदश ।
कीर्तितः प्रथमो राशिस्तत्रासांव्यवहारिकः ॥ १५४ ॥

वनस्पतय आख्यातास्ततः सांव्यवहारिकाः ।
क्षित्यम्बुवह्निपवनाः, कथितास्तदनन्तरम् ॥ १५५ ॥

ततो द्व्यक्षास्ततस्त्र्यक्षास्ततश्च चतुरिन्द्रियाः ।
ततश्चासंज्ञिपञ्चाक्षाः, कीर्तिता नारकास्ततः ॥ १५६ ॥

ततः पञ्चाक्षतिर्यञ्चस्ततः संमूर्च्छगर्भजाः ।
नराश्चतुर्विधा देवाः, संगीतास्तदनन्तरम् ॥ १५७ ॥

वाचोयुक्त्या ततः प्रोक्ताः, ब्राह्मणा इति संयताः ।
मुक्तात्मानस्ततो गीता, भवापानकनिर्गताः ॥ १५८ ॥

एतेषु स्थानदशके, भ्रान्तिं स्वस्य पुनः पुनः ।
वदन्नदीपयदसौ, भवापानकदुःस्थताम् ॥ १५९ ॥

यत्तु तैर्ब्राह्मणैः पश्चाद्, दृष्टो यत्नेन बोधितः ।
अहमित्यादि कथितं, युक्त्या तद् युज्यतेऽखिलम् ॥ १६० ॥

अनादिभव्यभावेन, प्राप्ता घर्षणघोलनात् ।
उत्कृष्टादिस्थितिह्रासे, द्रव्यश्रुतिरनन्तशः ॥ १६१ ॥

तथाऽपि यन्न लभते, सद्ज्ञानं न च दर्शनम् ।
न चारित्रं च जीवोऽसौ, कर्मघस्मरकः स्मृतः ॥ १६२ ॥

भ्रान्तचित्तः स तेनैव, बम्भ्रमीति भवोदधौ ।
सद्दर्शनमवाप्नोति कदाचित् कश्चिदेव हि ॥ १६३ ॥

कालादियोगतो भित्त्वा, कर्मग्रन्थिं शुभाशयात् ।
ततः साधुवचोबोधो, योऽसौ हुङ्कार उच्यते ॥ १६४ ॥

दर्शनं मुक्तिबीजं च, सम्यक्त्वं तत्त्ववेदनम् ।
दुःखान्तकृत् सुखारम्भः, पर्यायास्तस्य कीर्तिताः ॥ १६५ ॥

सति चास्मिन्नधन्यात्मा, रमते भववारिधौ ।
रूपं निरूपयत्यस्य, स्पष्टं नष्टाक्षिरोगवत् ॥ १६६ ॥

तद् दृष्ट्वा चिन्तयत्येवमहो भीमो भवोदधिः ।
दुःखाय जन्ममरणव्याधिशोकैरुपद्रुतः ॥ १६७ ॥

सुखाय केवलं मोक्षः, सकलक्लेशवर्जितः ।
तस्य हेतुरहिंसादिर्हिंसादिर्भवकारणम् ॥ १६८ ॥

बुध्द्वैवं भवनैर्गुण्यं, मुक्तेश्च गुणरूपताम् ।
मोक्षोपाये प्रयतते, यथागममुदारधीः ॥ १६९ ॥

शमारोग्यलवं प्राप्य, संसारव्याधिपीडितः ।
निःशेषतत्क्षयोपाये, दुष्करेऽपि प्रवर्तते ॥ १७० ॥

सदुपायफलप्राप्तेश्चारित्रोत्साहितः क्रमात् ।
भूत्वा स सर्ववित् क्षीणकर्मा याति शिवालयम् ॥ १७१ ॥

सुसाधुगुरुसम्पर्कजन्येयं श्रेयसां ततिः ।
युक्तमुक्तमतस्तेन, बोधितो ब्राह्मणैरहम् ॥ १७२ ॥

सर्वे ह्यविरता जीवाः, कर्ममद्यरताः किल ।
स्थिता अपि भवापाने, साधवस्तत्पराङ्मुखाः ॥ १७३ ॥

प्रव्राजितोऽसौ तैरेव कर्ममद्यान्निवारितः ।
जरयित्वा व्रतैर्गन्ता, तदजीर्णं भवाद् बहिः ॥ १७४ ॥

तद् भवापानके स्थातुमीदृशे नावयोरपि ।
युक्तमित्यकलङ्कस्य, गीर्नाद्यापि मयाऽऽदृता ॥ १७५ ॥

स्थितोऽहं मौनमाधाय, शून्यारण्ये यथा मुनिः ।
अकलङ्को ययौ तुर्यमुनेः पार्श्वं मयाऽन्वितः ॥ १७६ ॥

सोऽपि नत्वाऽकलङ्केन, पृष्टो वैराग्यकारणम् ।
तेनोक्तमरघट्टो मे, जातो वैराग्यकारणम् ॥ १७७ ॥

नित्यायुक्तो मया दृष्टोऽरघट्टो भवनामकः ।
रागद्वेषार्त्तरौद्राख्याश्चत्वारस्तत्र कर्षकाः ॥ १७८ ॥

सर्वशीरपतिस्तत्र, महामोहः प्रकीर्तितः ।
कषायसंज्ञका दृसा, बलिवर्दास्तु षोडश ॥ १७९ ॥

कर्मकाराः स्मृतास्तत्र, हास्यशोकभयादयः ।
जुगुप्साऽरत्यरत्याद्यास्तेषां च परिचारिकाः ॥ १८० ॥

मिथ्यात्वं च प्रमादश्च, तत्र तुम्बद्वयं महत् ।
विलासविभ्रमोल्लासरूपास्तत्रारकाः स्मृताः ॥ १८१ ॥

असंयमाभिधः कूपस्तत्र दृष्टो भयङ्करः ।
अनन्तदुःखपानीयभृतोऽदृष्टतलः सदा ॥ १८२ ॥

जीवलोको घटीयन्त्रं, तेन पूरितरेचितम् ।
मरणाख्यैर्वहन्नित्यं, षाट्कारैरेष लक्ष्यते ॥ १८३ ॥

आत्मा ज्ञानेन रहितो, ज्ञेयस्तत्र प्रतीच्छकः ।
मिथ्याभिमानसंज्ञं च, तस्य वार्घटिकं दृढम् ॥ १८४ ॥

तत्र निर्वहणी क्लिष्टचित्तताभोगलोलता ।
कुल्या दीर्घाऽन्यान्यजन्मगणाः केदारका मताः ॥ १८५ ॥

बीजं च कर्मजालाख्यं, वापकस्तत्र कीर्तितः ।
तज्जीवपरिणामाख्यो, विकाराः सस्यसम्पदः ॥ १८६ ॥

पानान्तिकोऽस्त्यसद्बोधः, कर्मक्षेत्रस्य सेचने ।
मोहादिष्टः सदोद्युक्तोऽरघट्टपरिपालकः ॥ १८७ ॥

भवारघट्टे तत्राहं, प्रसुप्तः सततभ्रमे ।
बोधितोऽनेन गुरुणा, ध्यानस्थेन महात्मना ॥ १८८ ॥

उक्तं चानेन भोक्ताऽस्ति, क्षेत्रस्यास्य फलं भवान् ।
जन्तो ! भवारघट्टस्य, स्वरूपं किं न वेत्सि भोः ॥ १८९ ॥

अयं भवारघट्टस्ते, दुःखानामेककारणम् ।
परित्यज तदेनं चेत्, सुखेन स्थातुमिच्छसि ॥ १९० ॥

मया प्रोक्तं यथा त्यक्तो, भवत्येष तथा वद ।
मुनिराह महाभाग !, भावदीक्षां गृहाण तत् ॥ १९१ ॥

भवारघट्टस्तैस्त्यक्तो, भावतो ये हि साधवः ।
ततस्तदाज्ञां स्वीकृत्य, प्रव्रज्येयं मयाऽऽदृता ॥ १९२ ॥

अयं वैराग्यहेतुर्मे, श्रुत्वेति मुनिभाषितम् ।
अकलङ्कस्त्वया सुष्ठु, बुद्धमित्यन्वमोदत ॥ १९३ ॥

ततस्तं साधुमानम्य, सोऽकलङ्को मया सह ।
पञ्चमस्य मुनेः पार्श्वं, ययौ तं प्रणनाम च ॥ १९४ ॥

सोऽपि तेन महाभागो, मम बोधविधित्सया ।
वैराग्यकारणं पृष्टः, स्पष्टमाचष्ट शुद्धधीः ॥ १९५ ॥

नानारूपा वयं चट्टास्तिष्ठामः स्म क्वचिन्मठे ।
तत्र चायातमस्माकं, भृशं भक्तं कुटुम्बकम् ॥ १९६ ॥

अनेकमानुषोपेतं, पञ्चमानुषतन्त्रितम् ।
तदस्माभिर्हितं बुद्धं, शत्रुभूतमपि स्फुटम् ॥ १९७ ॥

कृतं च भोजनं तत्र, चित्रं तेनाथ भक्षितम् ।
छात्रैरज्ञातसद्भावैस्तैस्तद्भोजनलोलुपैः ॥ १९८ ॥

केषाञ्चित् सन्निपाताय, तदभून्मन्त्रयोगजम् ।
उन्मादकृच्च केषाञ्चिच्छात्राणां बहुभक्षिणाम् ॥ १९९ ॥

ततो मिलितकण्ठास्ते, स्तब्धजिह्वाः सुविह्वलाः ।
क्वचित् तप्ताः क्वचिच्छीताः, क्वचिदुद्भ्रान्तमानसाः ॥ २०० ॥

भृशं घुरघुरायन्तो, लोलमाना भुवस्तले ।
क्वचिज्झगझगायन्तश्छात्राः शोच्यां दशां गताः ॥ २०१ ॥

ये तून्मत्ताः समापन्नास्ते देवगुरुनिन्दिनः ।
लपन्ति विपरीतानि, पशुवन्नष्टधर्मकाः ॥ २०२ ॥

इतश्च योऽसौ स्वाध्यायलीनः साधुपुरन्दरः ।
महावैद्यकनिष्णातो, दृष्टस्तेनाहमातुरः ॥ २०३ ॥

सन्निपातहतस्तेषां, चट्टानां मध्यगो जडः ।
स्वौषधैः सन्निपातं मे, कृपयाऽपनिनाय सः ॥ २०४ ॥

ततो जातो मनाक् स्पष्टचेतनोऽहमथाहरत् ।
उन्मार्गं छात्रसंसर्गजनितं यत्नतः स मे ॥ २०५ ॥

महाशयस्ततश्चायं, स्वस्थचित्तं निरीक्ष्य माम् ।
उन्मत्तान् संनिपातार्त्तांश्चट्टान् सर्वानदर्शयत् ॥ २०६ ॥

दृष्टाश्च ते मया छात्राः, क्रन्दन्तो व्याधिविह्वलाः ।
मुनीश्वरो बभाषे मां, गाढजातभयं ततः ॥ २०७ ॥

भद्र ! भोजनदोषेण, प्रागभूस्त्वमपीदृशः ।
मत्कृतोपायतो जातः, साम्प्रतं स्वस्थमानसः ॥ २०८ ॥

अस्त्यद्यापि तवाजीर्णं, किञ्चिद् देहे ततो न चेत् ।
करिष्यसि मदुक्तं तत्, पुनरीदृग् भविष्यसि ॥ २०९ ॥

भयात् प्रत्ययलाभाच्च, ततस्तेनोदिता मया ।
प्रव्रज्या स्वीकृतेयं तद्भोजनाजीर्णनाशिनी ॥ २१० ॥

यां यामुपदिशत्येष, क्रियां तां तां करोम्यहम् ।
अधुना विधिना मेऽभूदिदं वैराग्यकारणम् ॥ २११ ॥

अकलङ्कस्तदाकर्ण्य, मुदितोऽन्यमुनिं प्रति ।
ययौ कोऽस्यार्थ इत्युच्चैर्मया पृष्टो जगाविदम् ॥ २१२ ॥

अनेनापि भवो मित्र !, प्रोक्तश्चट्टमठोपमः ।
परस्परमसम्बद्धाश्चट्टाभास्तत्र जन्तवः ॥ २१३ ॥

माता पिता च नामीषां, तत्त्वत्तोऽस्ति न वा धनम् ।
न बान्धवाश्च मिलिताः, सर्वे भिन्ना हि जन्तवः ॥ २१४ ॥

तेषां च जीवचट्टानां, संसारमठवर्तिनाम् ।
बन्धहेत्वभिधं भक्तमायात्येव कुटुम्बकम् ॥ २१५ ॥

बहवः सन्ति तच्छ्लोकाः, पञ्च संग्राहकाः परम् ।
प्रमादो योगमिथ्यात्वे, कषायाविरती तथा ॥ २१६ ॥

अनादिसंसारवशाद्, बन्धहेतुकुटुम्बकम् ।
इदं च जीवचट्टानां, हितकृत् प्रतिभासते ॥ २१७ ॥

छात्रभोजनतुल्यं तत्, कर्म सम्पादयत्यलम् ।
भुञ्जन्ते जीवचट्टास्तन्मोहमन्त्रेण संस्कृतम् ॥ २१८ ॥

अनायतिज्ञास्ते तेन, पूरयन्त्युदरं निजम् ।
तद्विपाकाद् यदज्ञानं, प्राप्नुवन्ति सुदारुणम् ॥ २१९ ॥

अनभिग्रहमिथ्यात्वसन्निपातोऽयमिष्यते ।
अनेनैकेन्द्रियत्वे स्युः, काष्ठवन्नष्टचेतनाः ॥ २२० ॥

भृशं घुरघुरायन्ते, द्वीन्द्रियत्वे च जन्तवः ।
त्रीन्द्रियत्वे च लोलन्ते, भुक्तदोषादितस्ततः ॥ २२१ ॥

चतुरक्षासंज्ञिपञ्चेन्द्रियत्वे च वितन्वते ।
तामेव चेष्टामधिकां, भृशं झगझगायितम् ॥ २२२ ॥

गर्भजत्वे वितन्वन्ति, तेऽपर्याप्ता भवन्ति च ।
रुद्धकण्ठाः स्तब्धजिह्वा, भूरिदुःखौघविह्वलाः ॥ २२३ ॥

बाध्यन्ते तापशीताद्यैर्गताश्च नरकेषु ते ।
आपन्नाः पशुभावं च, चेतयन्ते न किञ्चन ॥ २२४ ॥

मनुष्यत्वे च मुह्यन्ति, देवत्वे शेरते भृशम् ।
दारुणा जीवचट्टानां, दशेयं सन्निपातजाः ॥ २२५ ॥

ये तु स्वाभिनिवेशेन, विपरीतं जिनागमात् ।
एकान्तक्षणिकाद्यर्थं, मन्यन्ते कुनयाश्रिताः ॥ २२६ ॥

आभिग्रहिकमिथ्यात्वोन्मादस्तेषामसौ स्मृतः ।
सन्मार्गदूषणात् ते हि, प्रलपन्तीव विह्वलाः ॥ २२७ ॥

हसन्तीव तपःसत्यचारित्रगुणनिह्नवात् ।
वल्गन्तीव विना हेतुं, नास्त्यात्मेत्यादिवादतः ॥ २२८ ॥

सर्वज्ञमतनिष्णातै रुदन्तीव निराकृताः ।
यथेष्टचेष्टाकरणान्नृत्यन्तीव लसत्कराः ॥ २२९ ॥

गायन्तीव पठन्तश्च, तर्कदण्डोलकान्निजान् ।
एवं कर्मविषोन्मादाद्, भवन्ति ग्रहिला जनाः ॥ २३० ॥

यच्चोक्तं मुनिना तेन, मोचितोऽहं कृपालुना ।
महावैद्यकदक्षेण, सन्निपातात् सुदारुणात् ॥ २३१ ॥

तद् युक्तमेव यदमी, भवन्त्येव कृतश्रमाः ।
सिद्धान्ते वैद्यकाकारे, मुनयः शुद्धबुद्धयः ॥ २३२ ॥

लक्षयन्ति स्वरूपं च, ते सर्वभववर्तिनाम् ।
दयां च कुरुते कर्मभोजनात् सन्निपन्नके ॥ २३३ ॥

अत एव सुसाधूनामाक्रोशादिपरा अपि ।
न रुषां विषयाः किन्तु, कृपाया भवजन्तवः ॥ २३४ ॥

सन्निपातात् तथोन्मादात्, कर्मणां ये प्रपीडिताः ।
आक्रोशादिपरायत्ताः, कुर्वते तेषु किं रुषा ॥ २३५ ॥

कोपो न युज्यते तेषु, क्षारक्षेप इव क्षते ।
कथमेषामयं दोषो नश्येदिति कृपोचिता ॥ २३६ ॥

कर्मवेष्टितजन्तूनां, चेष्टितानि विवेकिनाम् ।
शाणत्वं यान्ति वैराग्यशस्त्रोत्तेजनहेतवे ॥ २३७ ॥

लब्ध्वापि नृभवं जन्तूनुन्मत्तान् सन्निपन्नकान् ।
दृष्ट्वा जिनमतज्ञः को, रज्येत भवचारके ॥ २३८ ॥

ततोऽयं करुणाढ्येन, गुरुणा सन्निपन्नकः ।
स्वस्थीकृतः सुवैद्येन, च्छात्राभो वचनौषधैः ॥ २३९ ॥

यच्चोक्तं छात्रसंसर्गादुन्मादोऽपि ममोदितः ।
नाशितोऽनेन गुरुणा, तदेवमवबुध्यताम् ॥ २४० ॥

गुरुणा सन्निपाताभे, मिथ्यात्वेऽस्यानभिग्रहे ।
हते तदाभिग्रहिकमभूत् तीर्थिकसन्निभः ॥ २४१ ॥

निरस्तं गुरुणा यत्नात्, तदप्युन्मादसन्निभम् ।
ततश्चट्टमठाकारः, संसारोऽस्य प्रदर्शितः ॥ २४२ ॥

ततो भवमठे दृष्टा, जीवाश्चट्टा इवामुना ।
उन्मत्ताः सन्निपातार्त्ता, दुःखभाजः प्रलापिनः ॥ २४३ ॥

ततः संजातभीरेष, प्राच्यां स्वस्येदृशीं दशाम् ।
गुरुणोक्तां समाकर्ण्य, तदुक्तां कुरुते क्रियाम् ॥ २४४ ॥

तत्कर्म भोजनाजीर्णं, जरयत्येष नोदितः ।
अयं स्ववैराग्यहेतुर्मुनिना मित्र ! भाषितः ॥ २४५ ॥

न केवलं मुनिरसौ, तेनाजीर्णेन बाधितः ।
आवामपि तथाभूतौ, युक्ता दीक्षाऽऽवयोरपि ॥ २४६ ॥

कर्मान्नाजीर्णहरणी, लातुमारोग्यकारिणी ।
प्रयाति न फलाढ्यत्वमन्यथा नृभवद्रुमः ॥ २४७ ॥

तादृगप्यकलङ्कस्य, वचस्तन्न मयाऽऽदृतम् ।
मदन्वितो गतः सोऽथ, साधोः षष्ठस्य सन्निधौ ॥ २४८ ॥

पृष्टं तस्यापि वन्दित्वा, तेन वैराग्यकारणम् ।
स प्राह मम वैराग्ये, हेतुरेकं कथानकम् ॥ २४९ ॥

गुरुणोक्तमिदं भद्र !, तत् ते संकीर्तयाम्यहम् ।
वसन्ताख्ये पुरेऽभूवंश्चत्वारः केऽपि वाणिजाः ॥ २५० ॥

चारुर्योग्यो हितज्ञश्च, मूढश्चेत्यभिधानतः ।
परस्परं वयस्यास्ते, रौद्रमुल्लङ्घ्य वारिधिम् ॥ २५१ ॥

रत्नद्वीपं गता रत्नसमूहार्जनकाम्यया ।
चकार रत्नवाणिज्यं, तत्र चारुरनन्यधीः ॥ २५२ ॥

रत्नद्वीपेऽपि नाप्यन्ते, रत्नान्युद्यममन्तरा ।
पूर्णेऽपि हि तटाके कः, पिबन्त्यम्बु विनाऽञ्जलिम् ॥ २५३ ॥

इत्यावर्जयता लोकान् नानोपायकृताऽमुना ।
पूरितं मङ्क्षु बोहित्थमर्जितै रत्नराशिभिः ॥ २५४ ॥

रत्नानां गुणदोषज्ञः, काननादौ न कौतुकी ।
इत्येष सत्क्रियो ज्ञानी, तत्र स्वार्थमसाधयत् ॥ २५५ ॥

योग्योऽपि, कुरुते किञ्चिद्, रत्नानां गुणदोषवित् ।
अर्जनं तस्य किं त्वस्ति, कौतुकं काननादिषु ॥ २५६ ॥

तेन रत्नार्जनं तस्य, राजवेष्टिसमं भवेत् ।
कौतुकेन वृथा यान्ति, वासराः काननादिषु ॥ २५७ ॥

मिलितानि बहोः कालात्, तथाऽप्यस्य कियन्त्यपि ।
रत्नानि किं त्वनेनेह, स्वल्पेन बहु हारितम् ॥ २५८ ॥

हितज्ञस्तु स्वयं वेत्ति, रत्नानि न परीक्षितुम् ।
परोपदेशतस्तानि, लक्षयत्येष केवलम् ॥ २५९ ॥

विहारारामचित्रादिविलोकनकुतूहलात् ।
करोति रत्नवाणिज्यं, नासौ तीव्रप्रमादभाग् ॥ २६० ॥

रत्नबुद्ध्यैव गृह्णाति, काचशङ्खकपर्दकान् ।
रत्नद्वीपेऽपि संप्राप्तो, धूर्तलोकैः स वञ्चितः ॥ २६१ ॥

मूढस्तु न स्वयं वेत्ति, रत्नराशीन् परीक्षितुम् ।
उपदेशं परस्यापि, श्रद्धत्ते नैव मोहतः ॥ २६२ ॥

अत्यन्तकौतुकी चासौ, चित्रोद्यानादिदर्शने ।
गृह्णाति सत्यरत्नद्विट्, काचादीन् धूर्तहस्ततः ॥ २६३ ॥

स्वस्थानं भृतबोहित्थो, यियासुश्चारुरित्यथ ।
व्यचिन्तयद् मदीयानां, मित्राणां का व्यवस्थितिः ॥ २६४ ॥

इति ध्यात्वा गतो योग्यसमीपं स जगौ गृहम् ।
यास्याम्यहं प्रवृत्तिः का, तव योग्यस्ततोऽब्रवीत् ॥ २६५ ॥

बोहित्थं पूर्यतेऽद्यापि, न ममार्जितवानहम् ।
स्वल्परत्नान्यथ प्राह, चारुः किमियदन्तरम् ॥ २६६ ॥

ततो योग्यो जगौ सर्वं, स्वप्रमादविजृम्भितम् ।
चारुणोक्तं तवायुक्तमात्मवञ्चनमीदृशम् ॥ २६७ ॥

जानीषे सुखहेतुत्वं, रत्नानां त्वमशङ्कितः ।
तथाऽपि तानि नादत्से, काननादिकुतूहलात् ॥ २६८ ॥

धृतिस्ते कौतुकादस्मान्न चिरादपि भाविनी ।
तद् वरं स्वार्थसम्पत्तिः, स्वार्थभ्रंशो हि मूर्खता ॥ २६९ ॥

जिह्रेषि किं न रत्नानां, रत्नद्वीपेऽप्यनर्जनात् ।
अतः प्रमादं संत्यज्य, कुरु रत्नार्जनं दृढम् ॥ २७० ॥

अन्यथाऽहं प्रयास्यामि, मम सिद्धं प्रयोजनम् ।
इत्थं विचेष्टमानस्त्वं, भ्रष्टः स्वार्थाद् भविष्यसि ॥ २७१ ॥

इदं चारुवचः श्रुत्वा, ह्रीणो योग्यो भृशं हृदि ।
सर्वं कुतूहलं मुक्त्वा, जातो रत्नार्जनोद्यतः ॥ २७२ ॥

अथ चारुर्हितज्ञस्य, गत्वा पार्श्वमवोचत ।
अहं स्थाने गमिष्यामि, तव किं मित्र ! वर्तते ॥ २७३ ॥

ततश्चारोर्हितज्ञेन, काचादि स्वार्जितं धनम् ।
दर्शितं स्नेहसारेण, कथितं चात्मचेष्टितम् ॥ २७४ ॥

ततश्चारुः कृपापूर्णो, हितज्ञं प्रत्यभाषत ।
मित्र ! त्वं विप्रलब्धोऽसि, धूर्तै रत्नापरीक्षकैः ॥ २७५ ॥

रत्नद्वीपमुपेतस्य, तव कर्तुं न युज्यते ।
कौतुकं काननादौ च, स्वार्थसंसिद्धिमिच्छतः ॥ २७६ ॥

निशम्य तद्वचश्चारोर्हितज्ञः स्वहितार्थिताम् ।
विदंस्तस्य तदादेशात्, त्यक्त्वा सर्वं कुतूहलम् ॥ २७७ ॥

तत्प्रसादेन जानानः, सर्वरत्नगुणागुणान् ।
संगृह्णंश्चारुरत्नानि, काचादीनि परित्यजन् ॥ २७८ ॥

स्वयं परीक्षको जातः, स्वार्थसिद्धिपरायणः ।
अथ चारुर्जगादैवं, गतो मूढस्य सन्निधौ ॥ २७९ ॥

अहं गृहे व्रजिष्यामि, प्रवृत्तिस्तव मित्र ! का ।
मूढः प्राह गृहे गत्वा, किं भवान् साधयिष्यति ॥ २८० ॥

वापीकूपमहारामपुष्पराजिविराजिते ।
द्वीपेऽत्र सुचिरं भोक्तुं, सुखं युक्तं मनोरमे ॥ २८१ ॥

स्थित्वाऽत्र सुचिरं पश्चाद्, गमिष्यामो निजालये ।
भृतं मयाऽपि बोहित्थं, वर्तते रत्नराशिभिः ॥ २८२ ॥

इत्युक्त्वा दर्शितं चारोः, शङ्खकाचाक्षपूरितम् ।
बोहित्थं तेन तद् दृष्ट्वा, चारुश्चित्ते व्यचिन्तयत् ॥ २८३ ॥

अहो मूढोऽयमुन्मत्तः, कौतुकग्रस्तमानसः ।
वञ्चितो धूर्तलोकेन, शिक्षयामि तथाऽप्यमुम् ॥ २८४ ॥

इति ध्यात्वा स तं प्राह, न युक्तं तव कौतुकम् ।
इदं हि रत्नवाणिज्यबाधकं स्वात्मवञ्चनम् ॥ २८५ ॥

अरत्नानि गृहीतानि, रत्नबुद्ध्या परित्यज ।
इमानि धूर्तदत्तानि, सुरत्नानि गृहाण च ॥ २८६ ॥

इदं च लक्षणं तेषां, सम्यक् चित्तेऽवधारय ।
इति यावत् कथयति, चारुस्तावत् क्रुधा ज्वलन् ॥ २८७ ॥

मूढः प्राह व्रज त्वं भो, नागमिष्याम्यहं पुनः ।
वचसाऽनेन भवतः स्फुटीभूता वयस्यता ॥ २८८ ॥

ममैकं मुत्कलाचारं, यन्निराकुरुते भवान् ।
द्वितीयं दूषयत्युच्चैर्मामकं रत्नसञ्चयम् ॥ २८९ ॥

यद्येतानि न रत्नानि, भास्वराणि भवन्ति मे ।
तदा श्रद्धाधिकै रत्नैः, पर्याप्तं तावकैः परैः ॥ २९० ॥

ततश्चारुः पुनर्वक्तुकामस्तेन निराकृतः ।
तमशक्यप्रतीकारं, मत्वा मौनमशिश्रियत् ॥ २९१ ॥

स्वाश्रयत्वार्जितार्थाभ्यां, मूढं त्यक्त्वाऽथ शुद्धधीः ।
सार्द्धं योग्यहितज्ञाभ्यां, चारुः स्थानं निजं ययौ ॥ २९२ ॥

प्रापुस्त्रयः सुखं तत्र, ते रत्नविनियोगतः ।
भाजनं भूरिदुःखानां, मूढस्तु समजायत ॥ २९३ ॥

केनचित् क्रुद्धभूपेन, द्वीपान्निष्काशितस्ततः ।
अगाधे विषमावर्ते, क्षिप्तो भीमे महोदधौ ॥ २९४ ॥

इदं वैराग्यकृज्जातं, गुरूक्तं मे कथानकम् ।
तच्छ्रुत्वा लब्धभावार्थः, सोऽकलङ्को मुदं दधौ ॥ २९५ ॥

मदन्वितः प्रवृत्तोऽथ, तं नत्वाऽन्यमुनिं प्रति ।
मयोक्तं किमनेनोक्तं, मुनिनेदमसङ्गतम् ॥ २९६ ॥

अकलङ्कोऽवदन्नेदमबद्धं घनवाहन ! ।
भावार्थं कीर्तयाम्यस्य, व्यक्तं शृणु तमादृतः ॥ २९७ ॥

वसन्तपुरतुल्योऽत्र, राशिरव्यवहारिकः ।
चतुर्विधा वाणिजकास्ततो जीवा विनिर्गताः ॥ २९८ ॥

समुद्रोऽत्र पुनर्जन्मजरामृतिपयोभृतः ।
पतन्मोहमहावर्तो, दुःखयादःसमाकुलः ॥ २९९ ॥

मूर्च्छन् कषायपातालकुम्भोत्थाश्रवमारुतैः ।
पापाविरतिगम्भीरो, भवविस्तार एव हि ॥ ३०० ॥

रत्नद्वीपस्य तु स्थाने, ज्ञेयो मानुष्यको भवः ।
कुतूहलं च विषयाभिलाषः काननादिषु ॥ ३०१ ॥

शङ्खाक्षकाचशकलस्थाने धर्माः परोदिताः ।
धूर्ताः कुतीर्थिका ज्ञेया, बोहित्थं जीवलक्षणम् ॥ ३०२ ॥

स्वस्थानगमनं मोक्षावाप्तिः शुद्धनयस्थितैः ।
मूढस्योपरि यः क्रुद्धो, नृपोऽसौ कर्मनामकः ॥ ३०३ ॥

क्षेपः समुद्रमध्येऽस्य, दुरन्तभवमज्जनम् ।
परीक्षकस्य यच्चारोः, प्रयतस्यार्थसाधनम् ॥ ३०४ ॥

तद् भवत्येव चारित्रप्राप्तेः साधोर्महात्मनः ।
सम्यक् तत्त्वार्थबोधेनाविप्रलभ्यस्य तीर्थिकैः ॥ ३०५ ॥

अव्याक्षिप्तस्य विषयेष्वनित्यत्वादिभावनात् ।
क्षान्त्यादिभावरत्नानामविलम्बेन संग्रहात् ॥ ३०६ ॥

योग्यस्य जानतोऽप्युक्तं, कौतुकं यच्च बाधकम् ।
श्राद्धेषु युक्तं तत्सर्वं, भावरत्नविदो हि ते ॥ ३०७ ॥

सद्गुणग्रहवाणिज्यं, कुर्वन्ति कियदप्यमी ।
गमयन्ति परं कालं, व्यर्थं विषयकौतुकात् ॥ ३०८ ॥

तथाऽपि बहुकालेन, मीलयन्ति कियन्त्यपि ।
गुणरत्नानि न पुनः, साधुयोग्यगुणोच्चयम् ॥ ३०९ ॥

ज्ञानादिभावरत्नौघैः, पूर्णश्चारुमुनीश्वरः ।
मोक्षे यियासुः स्वस्थाने, वदत्येवेति तान् प्रति ॥ ३१० ॥

भो भद्राः ! किं मनुष्यत्वे, स्वाधीने सद्गुणार्जने ।
परिपूर्णगुणा यूयं, न सम्पन्ना यथा वयम् ॥ ३११ ॥

आत्मप्रतारणमिदं, विषयव्यसनं हि नः ।
जीवितं घर्मसंततप्तपतत्त्रिगलचञ्चलम् ॥ ३१२ ॥

सन्ध्याभ्ररागसदृशं, तारुण्यं स्वजनाश्रयः ।
स्नेहो विद्युद्विलसितं, योषितो दोषभूमयः ॥ ३१३ ॥

ज्ञानं दीपः सुमार्गस्य, दुर्गतिध्वंसि दर्शनम् ।
चित्तोत्सवानां चारित्रमर्पकं शोधकं तपः ॥ ३१४ ॥

संयमोऽनागतानां च, कर्मणां विनिवारकः ।
त्याज्यो हेतुर्भवस्येति, मोक्षस्यादेय एव च ॥ ३१५ ॥

युष्माकं विषयात्यागे, मानुष्यं निष्फलं ततः ।
भगवद्दर्शनप्राप्तिरप्यकिञ्चित्करी हहा ॥ ३१६ ॥

त्यक्त्वाऽस्मत्सन्निधौ भोगपङ्कं गृह्णीत तद् व्रतम् ।
अस्मत्सन्निध्यभावे तु, स्वार्थभ्रष्टा भविष्यथ ॥ ३१७ ॥

इदमाकर्ण्य वचनं, मुनीनां देशसंयताः ।
लज्जमानाः प्रपद्यन्ते, संयमं पारमेश्वरम् ॥ ३१८ ॥

पूरयन्त्यात्मबोहित्थं, गुणरत्नैरनारतम् ।
सेयं चारुगिरा योग्यकार्यसिद्धिगतिः स्फुटा ॥ ३१९ ॥

हितज्ञं प्रति यत् साधोः, स्वाभिप्रायनिवेदनम् ।
भद्रकानामभिमुखीकरणं तन्महात्मनः ॥ ३२० ॥

साधुभिर्भद्रका धर्मदेशनाऽऽमन्त्रणे कृते ।
वदन्ति वयमप्युच्चैर्धर्मं स्नानादि कुर्महे ॥ ३२१ ॥

विलसामो वरैर्भोगैर्विचरामो निजेच्छया ।
उल्लासयामः स्वां कीर्तिं, जन्मसारमवाप्नुमः ॥ ३२२ ॥

काचादिकूटरत्नानां, वनादेः कौतुकस्य च ।
तदिदं पुरतश्चारोर्हितज्ञस्य निवेदनम् ॥ ३२३ ॥

ततो वदन्ति मुनयो, भव्यमिथ्यादृशः प्रति ।
सत्यमात्मधिया धर्मं, यूयं कुरुथ सादराः ॥ ३२४ ॥

विशेषं वित्थ नो किन्तु, विप्रलब्धाः कुतीर्थिकैः ।
स्नानादिर्हिंस्रकर्माणि, यान्ति नो धर्महेतुताम् ॥ ३२५ ॥

सर्वभूतदयासारो, धर्मः खलु जगद्धितः ।
स्नानादीनि च कर्माणि, तद्विरोधीनि सर्वदा ॥ ३२६ ॥

यत्पुनर्ब्रूथ जनुषो, वयं सारं लभामहे ।
भोगाद्यैः प्राज्ञलोकानां, हास्यं तद् वो विजृम्भितम् ॥ ३२७ ॥

काये सन्निहितापाये, रोगौघे परिवल्गति ।
जरायां त्वरमाणायां, वियोगे चित्तदाहिनि ॥ ३२८ ॥

प्रत्यवस्थातरि यमे, शीर्यमाणे शरीरके ।
गत्वरे यौवनेऽयोगविप्रिये प्रियसंगमे ॥ ३२९ ॥

पुद्गलस्कन्धसम्बन्धतुच्छेषु विषयेषु यः ।
नृणां सुखविपर्यासो, विभ्रमः स हि कर्मजः ॥ ३३० ॥

अनन्तभवसन्तानहेतुरेष ततोऽनघाः ! ।
प्राप्तायां धर्मसामग्र्यामस्मासूपदिशत्सु च ॥ ३३१ ॥

ज्ञानश्रद्धाक्रियायत्ते, मोक्षलाभे स्ववञ्चनम् ।
कर्तुं न युक्तं भवतामीदृशैर्मोहचेष्टितैः ॥ ३३२ ॥

साधुवाक्यं तदाकर्ण्य, भद्रकाः शुद्धवासमाः ।
सद्धर्मोपार्जनोपायं, पृच्छन्ति विनयान्विताः ॥ ३३३ ॥

ग्राहयन्ति ततस्तेषां, साधवस्तं महाशयाः ।
यथैतदादौ कर्तव्यमिच्छद्भिर्धर्मयोग्यताम् ॥ ३३४ ॥

सेव्या दयालुता कोपो, मोक्तव्यः खलसंगमः ।
त्याज्यो गुणानुरागश्चाभ्यसनीयो निरन्तरम् ॥ ३३५ ॥

अब्रह्मासत्यगर्वाणां, त्यागः कार्यः प्रयत्नतः ।
मान्याश्च देवगुरवः, सत्कर्तव्यः परिच्छदः ॥ ३३६ ॥

पूरणीयाः प्रणयिनोऽनुविधेयः सुहृद्गणः ।
परनिन्दा न कर्तव्या, ग्राह्याः परगुणाः सदा ॥ ३३७ ॥

संभाष्याः प्रथमं शिष्टाः, स्वगुणानां विकत्थने ।
लज्जनीयमणीयोऽपि, स्मार्यं परकृतं हितम् ॥ ३३८ ॥

भाव्यं सुवेषचरितैरनुमोद्याश्च धार्मिकाः ।
यतितव्यं परार्थे च, मानसे धार्यमार्जवम् ॥ ३३९ ॥

भवतामीदृशाचारचारुभावाद् भविष्यति ।
सर्वज्ञोपज्ञसद्धर्मानुष्ठाने खलु योग्यता ॥ ३४० ॥

योगोऽकल्याणमित्राणां, संत्याज्यों गृहिभिस्ततः ।
कल्याणमित्रसेवा च, कार्या पाल्योचितस्थितिः ॥ ३४१ ॥

अपेक्षितव्यो लोकाध्वा, मान्या च गुरुसंहतिः ।
एतत्तन्त्रैः सदा भाव्यं, धार्या दानादिवासना ॥ ३४२ ॥

सारपूजाऽर्हतां कार्या, निरूप्यं साधुलक्षणम् ।
श्रोतव्यं विधिना धर्मशास्त्रं निभृतभावनम् ॥ ३४३ ॥

अनुष्ठेयस्तदर्थश्चावष्टब्धव्या च धीरता ।
पर्यालोच्याऽऽयतिर्भाव्यं परलोकाविरोधिभिः ॥ ३४४ ॥

सेव्यो गुरुजनः कार्यं, सद्योगपटदर्शनम् ।
तद्रूपादि हृदि स्थाप्यं, धर्तव्या चारुधारणा ॥ ३४५ ॥

विक्षेपमार्गो हातव्यः, सोत्साहैर्योगसिद्धये ।
अर्हद्बिम्बादि संपाद्यं, लेखनीयो जिनागमः ॥ ३४६ ॥

कर्तव्यो मङ्गलजपश्चतुःशरणसंयुतः ।
अनुमोद्यं च सुकृतं, निन्द्या दुष्कृतसन्ततिः ॥ ३४७ ॥

सच्चेष्टितं च श्रोतव्यं, पूज्याः सन्मन्त्रदेवताः ।
उदारैरुत्तमज्ञाने, वर्तितव्यमशङ्कितैः ॥ ३४८ ॥

ततो वो भविता शुद्धसाधुधर्मस्य योग्यता ।
विहाय सङ्गं ग्रहणा(ण)शिक्षा सेव्योचिता ततः ॥ ३४९ ॥

विधेया तत्त्वजिज्ञासा, स्वपरागमगोचरा ।
यथार्थगुरुसंयोगात्, कार्यस्तद्विनयो दृढम् ॥ ३५० ॥

भवितव्यं विधिपरैर्मण्डल्यादिप्रयत्नतः ।
ज्येष्ठक्रमः पालनीयो, सेव्या युक्ताऽशनक्रिया ॥ ३५१ ॥

संत्याज्यो विकथाक्षेपो, धार्या शुद्धोपयोगता ।
शिक्षणीयः श्रुतिविधिर्भाव्यं सत्प्रत्ययस्थिरैः ॥ ३५२ ॥

स्मयो न कार्यो ज्ञानर्द्धेर्हसनीयाश्च नाबुधाः ।
त्याज्यो विवादोऽबुद्धानां, न कार्यं बुद्धिभेदनम् ॥ ३५३ ॥

कार्यः कुपात्रे न न्यासः, पात्रतैवं भविष्यति ।
भवतां विग्रहवती, शमश्रीर्भावजन्मभूः ॥ ३५४ ॥

ततः सिद्धान्तसाराणि, दास्यन्ति गुरवो मुदा ।
स्पष्टमष्ट ततो वृद्धिमुपयास्यन्ति धीगुणाः ॥ ३५५ ॥

शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा ।
ऊहोऽपोहोऽर्थविज्ञानं, तत्त्वव्यवसितिश्च ते ॥ ३५६ ॥

सेव्याऽथासेवना शिक्षा, भजनीया प्रमार्जना ।
प्रत्युपेक्षणमानेयं, भिक्षाचर्या च सात्मताम् ॥ ३५७ ॥

दातव्याऽऽलोचना सम्यक्, शिक्ष्या निर्दोषभोजिता ।
परिकर्मबिधिः पात्रगतो ग्राह्यो यथाऽऽगमम् ॥ ३५८ ॥

विचारचर्याऽनुष्ठेया, प्रेक्ष्याः, स्थण्डिलभूमयः ।
शुद्धमावश्यकं कार्यं, कालग्रहविधिस्तथा ॥ ३५९ ॥

स्वाध्यायनिरतैर्भाव्यं, कार्या प्रतिदिनक्रिया ।
पञ्चाचाराः पालनीयाः, स्थातव्यं चाप्रमद्वरैः ॥ ३६० ॥

भावी ततो वो निर्वाणप्रगुणो गुणसञ्चयः ।
एवं गुणार्जनोपायं, दर्शयन्ति महाधियः ॥ ३६१ ॥

भवन्ति भावरत्नानां, भद्रकास्ते परीक्षकाः ।
ततस्तदुक्तक्रियया, जायन्ते स्वार्थसाधकाः ॥ ३६२ ॥

अयं ज्ञेयो हितज्ञस्य, चारूक्तवरशिक्षया ।
रत्नौघैर्निजबोहित्थभरणस्योद्यमक्रमः ॥ ३६३ ॥

मूढेन च न चारूक्तं, प्रतिपन्नं विचेष्टितम् ।
प्रत्युत प्रतिकूलं, यत्, तत्रेयं मित्र ! भावना ॥ ३६४ ॥

मूढानभिमुखीकर्तुं, यतन्ते मुनयो यदा ।
दूरभव्यानभव्यान् वा, तदेत्थं ते प्रचक्षते ॥ ३६५ ॥

श्रमणा ! भवदिष्टेन, कार्यं मोक्षेण नास्ति नः ।
भवतामपि तत्रालं, गमनेन सुखोज्झिते ॥ ३६६ ॥

न तत्र खाद्यं नो पेयं, न गीतं हसितं च न ।
न तत्र कान्ता मदिरा, मदघूर्णितलोचनाः ॥ ३६७ ॥

न तत्र प्रियसंयोगा, न स्निग्धाऽऽलापपद्धतिः ।
लीलाविलासविस्तारा, न तत्रेन्द्रियशर्मदाः ॥ ३६८ ॥

अयं संसारविस्तारो, रम्यो नः प्रतिभासते ।
यथेष्टमनुभूयन्ते, यत्र लीलाविभूतयः ॥ ३६९ ॥

कृतं तन्मोक्षवादेन, संसारः सुखकारणम् ।
भुक्त्वाऽत्र विपुलं सौख्यं, पश्चान्मुक्तौ गमिष्यथ ॥ ३७० ॥

भवन्तो धर्मवादेन, येन सन्ति च गर्विताः ।
अस्माकमपि सोऽस्त्येव, देवातिथिमुदावहः ॥ ३७१ ॥

कुर्महे चण्डिकादीनां, तृप्तिं छागादिशोणितैः ।
गवाश्वमनुजच्छागैस्तथा यागं चतुर्विधम् ॥ ३७२ ॥

निहत्य दुःखितान् दुःखं, मोचयामः कृपालवः ।
पापर्द्ध्याऽवारितं सत्रं, मांसैर्दद्मो यथेच्छया ॥ ३७३ ॥

तदाकर्ण्य प्रभाषन्ते मुनयो भवतामसौ ।
नैव युक्तौ भवासङ्गः, सुखं नास्त्यत्र तात्त्विकम् ॥ ३७४ ॥

भोगा भोगग्र इवाहेयाः, भीषणा क्लेशवर्द्धनाः ।
मायाकरण्डिका नार्यो, विलासाश्च विडम्बनाः ॥ ३७५ ॥

मोक्षस्त्वात्मव्यवस्थानं, व्याधिक्षयसमं सुखम् ।
तस्मात् तमुत्सृज्य भवव्यासङ्गो वः स्ववैरिता ॥ ३७६ ॥

धर्मानुष्ठानबुद्ध्या च, यदिदं जन्तुघातनम् ।
तदप्यनन्तसंसारवर्द्धनं पापकारणम् ॥ ३७७ ॥

मा कुरुध्वमतो धर्ममीदृशं धूर्तवञ्चिताः ।
कुरुध्वं सुमुनिप्रोक्तं, तमर्हिंसादिलक्षणम् ॥ ३७८ ॥

मूढा वितन्वते द्वेषं, श्रुत्वेदं मुनिभाषितम् ।
वदन्ति यात यूयं भोः, शिक्षणीया वयं तु न ॥ ३७९ ॥

नियन्त्रयथ नो भोगैर्निषिद्धैर्निन्दथाऽधमाः ! ।
अस्माकं धर्मरत्नानि, तद् यूयं नो महारयः ॥ ३८० ॥

यदि वो रोचते नान्तः, सद्धर्मोऽस्माकमीदृशः ।
ततोऽलं भवदीयेन, धर्मेण पुरुषाधमाः ! ॥ ३८१ ॥

इदमाकर्ण्य मुनयो, ब्रूयुर्यावत् कृपापराः ।
भूयो धर्मगतिं तावत्, कुपिताः प्रहरन्ति ते ॥ ३८२ ॥

मुनयस्तानुपेक्षन्ते, निश्चित्यासाध्यतां ततः ।
न दोहने भवेद् भावो, गोर्वन्ध्यात्वे हि निश्चिते ॥ ३८३ ॥

श्राद्धानां भद्रकाणां च, भव्यमिथ्यादृशां ततः ।
भवेत् कृतार्थता नूनं, दिशा साधूपदिष्टया ॥ ३८४ ॥

मूढास्तु सरुषा कर्मपरिणामेन भूभुजा ।
रत्नद्वीपान्नरभवान्निष्काश्यन्ते तमोभृताः ॥ ३८५ ॥

पात्यन्ते भवपाथोधौ, लभन्ते दुःखसन्ततिम् ।
इमं कथानकस्यार्थं, बुद्ध्वाऽसौ विरतो मुनिः ॥ ३८६ ॥

हेतावीदृग्विवेकस्य, कर्मवज्रविभेदने ।
श्रुते कथानके ह्यस्मिन्, को वा न विरतिं श्रयेत् ॥ ३८७ ॥

को वा भृत्वाऽऽत्मबोहित्थं, भावरत्नैः शिवालयम् ।
न गच्छेन्नृभवं प्राप्य, रत्नद्वीपसमं कृती ॥ ३८८ ॥

भद्रेऽगृहीतसंकेते !, ततस्तच्छृण्वतो मम ।
अकलङ्कवचो ह्रासं, बह्वी कर्मस्थितिर्गता ॥ ३८९ ॥

भद्रकत्वमभूत् तन्मे, वचः किञ्चित् सुखायितम् ।
स्थितस्तथाऽप्यहं तूष्णीमकलङ्को मदन्वितः ॥ ३९० ॥

सप्तमस्य मुनेः पार्श्वं, गतस्तं प्रणनाम च ।
प्रस्तावे सोऽपि वैराग्यहेतुं पृष्टो जगाद तम् ॥ ३९१ ॥

संसृतिर्नाम नगरी, विद्यतेऽनादिरक्षया ।
हट्टमार्गस्तदीयो मे, जातो वैराग्यकारणम् ॥ ३९२ ॥

योऽयं ध्यानस्थितः साधुस्तेन मेऽसौ प्रदर्शितः ।
दीर्घस्थित्यापणश्रेणिर्जन्मसन्ताननामकः ॥ ३९३ ॥

सुखदुःखाभिधैः पण्यैः, पूरितस्वार्थतत्परैः ।
आश्रितः सञ्चयोद्युक्तैर्जीववाणिजकैः सदा ॥ ३९४ ॥

मूल्यैः पण्यानि लभ्यन्ते, जघन्योत्कृष्टमध्यमैः ।
भावैस्तदनुरूपाणि, तत्रोद्घाटापणे सदा ॥ ३९५ ॥

तत्र नाम्ना महामोहो, बलाधिकृत उच्यते ।
कामादयश्च तद्भृत्या, रोरा निष्पुण्यका जनाः ॥ ३९६ ॥

तत्र जीवाधमर्णानां, धनिकैः कर्मनामकैः ।
विधीयते धरणकं, दुर्मोचं खेदकारणम् ॥ ३९७ ॥

मत्ताः कलकलायन्ते, कषायास्तत्र डिम्भकाः ।
भ्रमन्ति च प्रमादाख्याः, षिङ्गाश्चित्रविलोकिनः ॥ ३९८ ॥

अञ्जिते मुनिना ज्ञानाञ्जनेनात्र स्थितस्य मे ।
अनेनाक्ष्णि ततोऽत्रस्था, दृष्टाः सर्वेऽपि दुःखिताः ॥ ३९९ ॥

ज्ञानाञ्जनस्य माहात्म्याद्, दृष्टो दूरे स्थितो मया ।
हट्टवीथिमतिक्रम्य, शिवसद्माभिधो मठः ॥ ४०० ॥

तत्र दृष्टा मयाऽनन्ताः, सिद्धा व्याधिविवर्जिताः ।
सर्वातिशयितानन्दा, उपयोगस्वलक्षणाः ॥ ४०१ ॥

ततो हट्टाध्वनो मेऽभून्निर्वेदो मठरागतः ।
उक्तश्चायं महाभागो, मया साधुः कृपाम्बुधिः ॥ ४०२ ॥

जायते क्षणमप्यत्र, हट्टमार्गे रतिर्न मे ।
त्यक्त्वैनं तत् त्वया सार्द्धं, मठे यामि शिवालये ॥ ४०३ ॥

मुनिनोक्तं यियासुश्चेन्मठे दीक्षां गृहाण तत् ।
मयोक्तं दीयतां नाथ !, तेन दत्ता प्रसेदुषा ॥ ४०४ ॥

उपदिष्टा मठप्राप्तेरितिकर्तव्यता च मे ।
तिष्ठामि तामहं कुर्वन्नकलङ्कस्ततोऽभ्यधात् ॥ ४०५ ॥

कीदृशी गुरुणोक्ता ते, मठस्य प्रापिका क्रिया ।
मुनिराह महाभाग !, गुरुरित्थं ममादिशत् ॥ ४०६ ॥

परिग्रहेऽस्ति ते सौम्य ! वासापवरकः किल ।
कायाभिधानः पञ्चाक्षगवाक्षकृतविभ्रमः ॥ ४०७ ॥

तत्र कार्मणतन्वाख्यमस्ति गर्भगृहं बृहत् ।
गवाक्षाभिमुखानेकक्षयोपशमरन्ध्रभृत् ॥ ४०८ ॥

तत्रास्ति कपिरूपं च, चित्ताख्यमतिचञ्चलम् ।
सहैव तेन भवता, दीक्षा ग्राह्या सुखेच्छुना ॥ ४०९ ॥

नाकाण्डे शक्यते त्यक्तुं, तत् कर्तव्यं सुरक्षितम् ।
विद्यते गर्भगृहके, भूयांसोऽस्य ह्युपद्रवाः ॥ ४१० ॥

तत्रेदं भक्ष्यते दीनं, कषायैर्दुष्टमूषकैः ।
वृश्चिकैर्नोकषायैश्च, दशद्भिः परिपीड्यते ॥ ४११ ॥

मोहमार्जारदुःसंज्ञामार्जारीभिश्च खाद्यते ।
रागद्वेषाभिधश्यामोन्दुराभ्यां च विलुप्यते ॥ ४१२ ॥

ताप्यते दंशमशकैरुपसर्गपरीषहैः ।
विह्वलीक्रियते वज्रतुण्डैर्दुर्बोधमत्कुणैः ॥ ४१३ ॥

पीड्यतेऽलीकचिन्ताभिर्गृहगोधाभिरन्वहम् ।
कृकलासैः प्रमादाख्यैर्दारुणैरभिभूयते ॥ ४१४ ॥

त्रोट्यते षट्पदीजालैरविरत्यभिधैः सदा ।
मिथ्यादर्शननाम्ना च, तमसा परिभूयते ॥ ४१५ ॥

ततः पतति तद्भूरिवेदनाभरनिःसहम् ।
रौद्रध्यानमहागर्ते, दुष्टव्यालचतुष्टये ॥ ४१६ ॥

अप्रमत्तेन तदिदं, रक्षणीयं त्वया सदा ।
तस्यायं रक्षणोपायः, श्रूयतां शुद्धचेतसा ॥ ४१७ ॥

सन्ति तत्रापवरकगवाक्षद्वारपञ्चके ।
विस्तारभाजः पञ्चैव, विषया विषपादपाः ॥ ४१८ ॥

दारुणास्ते स्वरूपेण, नाम्नाऽपि व्यथयन्त्यदः ।
घूर्णयन्त्यपि गन्धेन, चलयन्त्यपि दर्शनात् ॥ ४१९ ॥

निघ्नन्ति स्मरणेनापि, स्पर्शनास्वादनोद्यतम् ।
निपातयन्ति यदिदं, तत्राश्चर्यं किमुच्यते ॥ ४२० ॥

ते चास्योपद्रवार्त्तस्य, भान्ति हृद्याम्रका इव ।
तानभ्येति गवाक्षैस्तैस्ततो गाढाभिलाषतः ॥ ४२१ ॥

रज्यते सुन्दरत्वेन, केषुचित् तत्फलेषु तत् ।
विद्वेष्ट्यसुन्दराणीति, क्वानिचित् तत्फलानि च ॥ ४२२ ॥

तच्छाखासु भ्रमत्युच्चैर्लोलुठीत्यर्थसञ्चये ।
तदधःपतिते पत्रफलपुष्परजोभरे ॥ ४२३ ॥

गुण्ड्यते कर्मसंज्ञेन, तत्पुष्पफलरेणुना ।
भोगस्नेहाभिधेनार्द्रीक्रियते च रसेन तत् ॥ ४२४ ॥

चिन्तितं मयका चित्ते, भावार्थग्राहिणा ततः ।
सामान्यरूपाः शब्दाद्या, अभिप्रेता बिषद्रुमाः ॥ ४२५ ॥

तद्विशेषाश्च कुसुमान्यस्फुटाः प्रकटाः पुनः ।
फलानि शाखाः स्थानानि, 'तदाधारस्य वस्तुनः ॥ ४२६ ॥

लोकोपचाराद् गदिता, तेषु चित्तकपेर्गतिः ।
वदन्ति हि जना व्यक्तं, मनोऽगादमुकत्र मे ॥ ४२७ ॥

सोत्साहेनेति बुद्ध्वोच्चैर्मया प्रोक्तं गुरुं प्रति ।
अयं भावो मया बुद्धो, भाषितव्यमतः परम् ॥ ४२८ ॥

गुरुराह ततश्चास्य, विषवृक्षरजःस्पृशः ।
महाक्षतानि जायन्ते, देहो दाहेन दह्यते ॥ ४२९ ॥

ततः क्वचिच्छरीरेऽस्य, जायते कृष्णरूपता ।
क्वचिच्च रक्तता गर्भगृहोक्तोपद्रवास्ततः ॥ ४३० ॥

तदप्रमादसंज्ञोग्रवज्रदण्डभृता त्वया ।
आस्फोट्य वीर्यहस्तेन, वारणीयं प्रसह्य तत् ॥ ४३१ ॥

बहिर्गवाक्षैर्निर्गच्छेत् फलानां भक्षणेच्छया ।
द्रुमेषु विषयाख्येषु, लौल्योद्रेकात् पुनः पुनः ॥ ४३२ ॥

बहिःप्रचारहीनस्य, ततोऽस्यानभिलाषिणः ।
शोषं यास्यति देहस्य, भोगस्नेहकृताऽऽर्द्रता ॥ ४३३ ॥

शटिष्यति ततो रौक्ष्यात्, तद्रजश्च प्रतिक्षणम् ।
क्षतान्यपि च रोक्ष्यन्ति, दाहोऽपि शममेष्यति ॥ ४३४ ॥

भविष्यति न कृष्णत्वं, रक्तता च विनङ्क्ष्यति ।
आविर्भविष्यति श्वैत्यं, स्थैर्यं च रमणीयता ॥ ४३५ ॥

तेऽप्यप्रमाददण्डेन, निष्पेष्या मूषकादयः ।
ततो गर्भगृहस्थायि, निर्बाधं तद् भविष्यति ॥ ४३६ ॥

तदयं रक्षणोपायस्तस्य ते कीर्तितो मया ।
मयोक्तं रक्षितेनार्थः, कस्तेन भगवन् ! मम ॥ ४३७ ॥

गुरुराह शिवप्राप्तिः, स्यादित्थं रक्षितात् ततः ।
अरक्षितस्य तस्य स्याच्चक्रकाद् भ्रमणं भवे ॥ ४३८ ॥

तत् तैरुपद्रवैर्गाढं, मूषकाद्यैः प्रपीडितम् ।
मूषकाद्याः प्रगल्भन्ते, भक्षणादेव तस्य ते ॥ ४३९ ॥

भूयश्च पीड्यमानं तैराम्रकेष्वेव धावति ।
पुनर्गुण्डनमेवास्य, स्नेहेन पुनरार्द्रता ॥ ४४० ॥

पुनश्च क्षतसम्पत्तिः, पुनः सर्वेऽप्युपद्रवाः ।
अस्य वानररूपस्य, चक्रकं दुस्तरं ह्यदः ॥ ४४१ ॥

विधेयश्चक्रकोच्छेदो, रक्षता तददस्त्वया ।
उपायेन मदुक्तेन, शुद्धमार्गेण गच्छता ॥ ४४२ ॥

ततो भावार्थविदुषा, मयेदं परिचिन्तितम् ।
रागाद्युपद्रुतं चित्तं, विषयेषु प्रवर्तते ॥ ४४३ ॥

प्रवृत्तस्य च तेष्वस्य, जायते कर्मगुण्डनम् ।
ततस्तस्यार्द्रतां या स्यात्, सा भोगस्नेहवासना ॥ ४४४ ॥

ततो भवन्ति संसीरसंस्काराश्च क्षतोपमाः ।
व्यथयन्ति ततश्चित्तं, सर्वे रागाद्युपद्रवाः ॥ ४४५ ॥

मूषकाद्याः प्रगल्भन्ते, ततः सर्वे प्रतिक्षणम् ।
धावति प्रेर्यमाणं तैर्भूयश्च विषयेषु तत् ॥ ४४६ ॥

पुनः कर्म पुनः स्नेहः पुनः सर्वेऽप्युपद्रवाः ।
तदस्मिन् चक्रके मग्नं, चित्तमेतन्न मुच्यते ॥ ४४७ ॥

रक्षको वज्रदण्डोस्य, गुरुणा मेऽभ्यधायि यः ।
तमप्रमादमादाय, वारयिष्यामि तद् दृढम् ॥ ४४८ ॥

भावयिष्यामि संसारविलासं स्वप्नसन्निभम् ।
निवर्त्स्यते ततश्चित्तबन्धो मे भवजालतः ॥ ४४९ ॥

अनाद्यभ्यासतस्तच्च, बहिर्गच्छत् पुनः पुनः ।
आत्मन्येव समाधाय, स्थापयिष्यामि यत्नतः ॥ ४५० ॥

तथेदं शिक्षयिष्यामि, बहिर्निर्यासि चित्त ! किम् ।
स्वरूपे तिष्ठ निभृतं, यथाऽऽनन्दे निमज्जसि ॥ ४५१ ॥

किं बहिर्निधये स्वान्त !, भ्रान्त्वा भ्रान्त्वा विषीदसि ।
निधिं स्वसन्निधावेव, स्थिरता दर्शयिष्यति ॥ ४५२ ॥

ज्ञानदुग्धं विनश्येत, लोभविक्षोभकूर्चकैः ।
अम्लद्रव्यादिवास्थैर्यादिति मत्वा स्थिरो भव ॥ ४५३ ॥

त्वयाऽन्तःस्थं महाशल्यमस्थैर्यं यदि नोद्धृतम् ।
क्रियौषधस्य को दोषस्तदा गुणमयच्छतः ॥ ४५४ ॥

स्थैर्यरत्नप्रदीपश्चेद्, दीप्रः संकल्पदीपजैः ।
तत्कुतर्करलं धूमैरलंधूमैस्तथाऽऽश्रवैः ॥ ४५५ ॥

उदीरयिष्यसि स्वान्त ! यद्यस्थैर्यमहाऽनिलम् ।
समाधेर्धर्ममेघस्य, घटां विघट्टयिष्यसि ॥ ४५६ ॥

हित्वा बहिर्भ्रमं चित्त !, तदात्मन्येव संचर ।
तवात्मचारो निर्वाणं, बहिश्चारो भवोदधिः ॥ ४५७ ॥

सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् ।
बहिश्च परवत्ता ते, सुखं स्वाधीनमात्मनि ॥ ४५८ ॥

दंदह्यमानं भोगाग्नौ, बहिर्भ्रमसि संभ्रमात् ।
धृतं शमामृतभृते, किं चित्तात्मनि ताम्यसि ॥ ४५९ ॥

तिष्ठात्मन्येव तच्चित्त !, गुणपूर्णे निराकुलम् ।
अत्र स्थितस्य ते भोगस्नेहशोषाद् रजःक्षतिः ॥ ४६० ॥

दुर्वासनाव्रणौघस्य, रोहणं च भविष्यति ।
ततस्ते व्याधिहीनस्य, भोगरागो विनङ्क्ष्यति ॥ ४६१ ॥

ये मुहूर्तं सुखाभासा, भुक्ताः स्युः क्षतवर्द्धनाः ।
न सेव्यास्ते त्वया भोगाः, कण्डूकण्डूयनोपमाः ॥ ४६२ ॥

संक्लिष्टवासनाध्यानदारुणक्षतकारकान् ।
हित्वा भोगान् निराबाधमध्यात्मपदमाश्रय ॥ ४६३ ॥

शिक्षयित्वेदमित्येवं, चित्तं तद्रक्षणोद्यमम् ।
करिष्ये धारयिष्यामि, धारणापञ्जरे च तत् ॥ ४६४ ॥

तत्पीडकान् कषायाद्यान्, हनिष्याम्यप्रमादतः ।
भावीदमित्थं विक्षिप्तयातायातदशोर्ध्वगम् ॥ ४६५ ॥

श्लिष्टं भूत्वा ततः स्थाष्णुस्वरूपे स्वास्थ्यमाप्स्यति ।
यास्यन्ति प्रलयं सर्वे, ततो रागाद्युपद्रवाः ॥ ४६६ ॥

विद्योदयेन ध्यानेन, प्रतिपक्षनिषेवया ।
उपद्रवेषु लीनेषु, सुलीनं तद् भविष्यति ॥ ४६७ ॥

विमुक्तविषयग्राममात्माराममिदं ततः ।
घटिष्यते शिवायैव, शान्तरागाद्युपद्रवम् ॥ ४६८ ॥

तिष्ठामीत्याकलय्याहँ, तथा कुर्वन्निहाधुना ।
अकलङ्कोऽवदद् बुद्धं, त्वया साधु गुरोर्वचः ॥ ४६९ ॥

प्रारब्धं तदनुष्ठानं, शोभनं च मयाऽप्यदः ।
भदन्त ! चक्रकं श्रुत्वा, कल्पितं चक्रकान्तरम् ॥ ४७० ॥

तत् किं युक्तमयुक्तं वा, मुनिराह निवेदय ।
अकलङ्कोऽवदच्चित्तं द्रव्यभावतया द्विधा ॥ ४७१ ॥

आद्यं पर्याप्तिमज्जीवगृहीतं पुद्गलात्मकम् ।
गीयते भावचित्तं च जीवस्तदुपयोगवान् ॥ ४७२ ॥

तद् भावचित्तं नियमाज्जीवो जीवश्च तन्न वा ।
येन केवलिनो भावचित्तहीनाः प्रकीर्तिताः ॥ ४७३ ॥

इत्थं च कार्मणस्यैतद्-विपर्यासविजृम्भितात् ।
आसक्तिमनिशं धत्ते, जीवो रागादिवस्तुषु ॥ ४७४ ॥

स्नेहतन्तुभिरादत्ते, ततः कर्माणुसंचयम् ।
जन्मान्तरं प्रारभते, ततस्तेन वशीकृतः ॥ ४७५ ॥

पुनस्तत्र विपर्यासः, पुना रागादिसन्ततिः ।
पुनश्च विषयाकाङ्क्षा, पुनस्ते स्नेहतन्तवः ॥ ४७६ ॥

पुनः कर्मसमादानं, पुनर्जन्मोद्भवस्ततः ।
पुनस्तत्र विपर्यासः, पुना रागादिकः क्रमः ॥ ४७७ ॥

भवानिष्ठाकरमिदं, विपर्यासादि चक्रकम् ।
मयाऽभ्यूहितमत्रार्थे, संवादो मृग्यते तु वः ॥ ४७८ ॥

मुनिराह महाभाग !, सत्यमेतन्न संशयः ।
शास्त्रार्थमार्गं नात्येति, मतिर्मार्गानुसारिणी ॥ ४७९ ॥

मयाऽप्यभ्यूहितं ह्येतच्चक्रके गुरुभाषिते ।
समर्थितं च गुरुभिस्तदुक्तार्थानतिक्रमात् ॥ ४८० ॥

अनिष्ठितभवे हेतुर्विपर्यासादिचक्रकम् ।
अत एव समुच्छेद्यो, विपर्यासो मुमुक्षुणा ॥ ४८१ ॥

काष्ठेयं तत्त्वबोधस्य, विवेकोऽयमनुत्तरः ।
अयं निराश्रवो धर्मो, यद् विपर्यासवर्जनम् ॥ ४८२ ॥

अविपर्यस्तविज्ञातुरप्रमत्तस्य पश्यतः ।
स्वस्माद् भिन्नान् मनोभावान्, मोहशक्तिः प्रलीयते ॥ ४८३ ॥

अयं ममेति मन्त्रोऽयं, मोहस्य जगदान्ध्यकृत् ।
अयमेव च नञ्पूर्वः, प्रतिमन्त्रोऽपि मोहजित् ॥ ४८४ ॥

यश्चिद्दर्पणविन्यस्तसमस्ताचारचारुधीः ।
क्व नाम स परद्रव्येऽनुपयोगिनि मुह्यति ॥ ४८५ ॥

अमूढस्य च न द्वेषो, दुःखे नापि सुखे स्पृहा ।
संचिनोति न कर्माणि, रागद्वेषोज्झितः पुनः ॥ ४८६ ॥

ततोऽसौ बीजविरहान्नारभेत भवान्तरम् ।
ततश्च चक्रकोच्छेदो, जायतेऽनुद्भवात्मकः ॥ ४८७ ॥

द्वयोश्चक्रकयोर्वेत्ति, प्रवर्तननिवर्तनम् ।
योऽनयोस्तस्य संसारे, कथं स्याच्चित्तनिर्वृतिः ॥ ४८८ ॥

भावाद् भवानिवृत्तस्तु, वेत्ति नो चक्रकद्वयम् ।
ज्ञानं सम्यक्प्रवृत्त्यैव, फलवत् ब्रुवते बुधाः ॥ ४८९ ॥

सम्यगभ्यूहितं तेन, त्वयेदं भद्र ! चक्रकम् ।
उक्तोऽस्य गुरुणा नाशश्चित्तवानररक्षणात् ॥ ४९० ॥

अकलङ्कोऽवदत् केनोपायेन स्वान्तवानरम् ।
शिवालयमठे प्रोक्तं, गुरुणा नयनक्षमम् ॥ ४९१ ॥

मुनिराह स तत्रैतां, दिशं गुरुरदर्शयत् ।
सन्ति गर्भगृहे तत्र, लेश्याः षट् परिपालिकाः ॥ ४९२ ॥

क्रमात् क्रूरतमाः क्रूरतराः क्रूराः स्वरूपतः ।
तद्वानराहिता गर्भगृहानर्थप्रपञ्चिकाः ॥ ४९३ ॥

दुःखाकुले हट्टमार्गे, तवाप्यत्रैव धारिकाः ।
निवारिका मठगतेस्तिस्रस्तत्रादिमाः स्मृताः ॥ ४९४ ॥

उपरिस्थाः पुनः शुद्धविशुद्धातिविशुद्धकाः ।
चित्तस्य हितदा गर्भगृहशुद्धिविधायिकाः ॥ ४९५ ॥

निस्सारिकास्तवाप्यस्माद्धट्टमार्गाद् विगर्हितात् ।
तिस्रोऽनुकूला वर्तन्ते, शिवालयमठे गतेः ॥ ४९६ ॥

परिणामाभिधः षड्भिरप्यमूभिश्च दर्दरः ।
कृतोऽस्ति गर्भगेहेऽस्मिन्नुपर्यारोहणार्थकः ॥ ४९७ ॥

तत्रोद्धर्वमध्यवसितिस्थानाख्याः पदिकाः कृताः ।
पृथक् पृथगसंख्याताः, स्वस्ववर्णसमत्विषः ॥ ४९८ ॥

संस्थितं तत्र पदिकास्वाद्यत्रयकृतासु तत् ।
चित्तवानरमुत्प्लुत्य, विषवृक्षेषु धावति ॥ ४९९ ॥

ततो भवत्यनर्थानां, भाजनं प्रोक्तया दिशा ।
क्वचिन्नष्टं क्वचिल्लीनं, क्वचित् तप्तं क्वचिज्जडम् ॥ ५०० ॥

आरोहणीयं तेनोर्ध्वं, ताभ्यो निस्सार्य तत् त्वया ।
आरोहतस्ततस्तुर्यपदिकासु प्रतिक्षणम् ॥ ५०१ ॥

यास्यन्त्युपद्रवाः कार्श्यं, तापः स्तोको भविष्यति ।
तस्याम्रकाभिलाषश्च, मनागल्पीभविष्यति ॥ ५०२ ॥

शोषं यास्यत्यार्द्रतेषद्, रजः किञ्चिच्छटिष्यति ।
ततो मनाक् सुखं लब्ध्वा, तद् भविष्यति भास्वरम् ॥ ५०३ ॥

कृतास्वारोहणीयं तत्, ततः पञ्चमलेश्यया ।
पदिकास्वस्य सन्तापो, भावी स्तोकतरस्तदा ॥ ५०४ ॥

उपद्रवास्तनुतरा, भविष्यन्ति तनीयसी ।
भविष्यत्याम्रवाञ्छा च, देहः शुष्कतरस्तथा ॥ ५०५ ॥

मनाक् क्षतानि रोक्ष्यन्ति, रजो भूरि पतिष्यति
प्राप्स्यत्येतन्महाह्लादं, धावल्यं धारयिष्यति ॥ ५०६ ॥

वर्धिष्यते तदङ्गेन, भविष्यति महोन्नतम् ।
आरोहणीयं तत् षष्ठपदिकासु ततस्त्वया ॥ ५०७ ॥

तासु चारोहतस्तस्य, लयं यास्यन्त्युपद्रवाः ।
दुःखासिका स्तोकतमीभविष्यति च सर्वथा ॥ ५०८ ॥

अत्यल्पतमतां यास्यत्याम्रवृक्षाभिलाषिता ।
तद्रजःपङ्कनिकरे, लुठनेच्छा त्रुटिष्यति , ॥ ५०९ ॥

कात्स्न्येंन चार्द्रता शोषं, प्रयास्यति तदङ्गतः ।
भूयिष्ठो रेणुनिचयस्ततः परिपतिष्यति ॥ ५१० ॥

भविष्यति सदानन्दं, शुद्धस्फटिकनिर्मलम् ।
आप्यायितं च तत् तत्र, धर्मध्यानेन वायुना ॥ ५११ ॥

सुखकारितया मन्दः, शीतः सन्तापनाशनात् ।
गुणाम्बुजरजःसङ्गात्, सुरभिश्च समेति सः ॥ ५१२ ॥

अस्ति वानरयूथं च, तत्रोच्चपदिकात्रये ।
संलीनं विषवृक्षेषु, सर्वथा विगतस्पृहम् ॥ ५१३ ॥

शमसन्तोषसत्याद्यैर्वानरैः परिवारितम् ।
वानरीभिर्धृतिश्रद्धाधारणाद्याभिराश्रितम् ॥ ५१४ ॥

समाधिब्रह्मशौचादिवरवानरराजितम् ।
तस्य वानरजीवस्य, तदत्यन्तहितावहम् ॥ ५१५ ॥

आरूढस्योच्चपदिकास्वाविर्भूय करिष्यति ।
शुक्लध्यानाख्यगोशीर्षचन्दनद्रवसेचनम् ॥ ५१६ ॥

ततोऽर्धमार्गेऽतिक्रान्ते, गाढानन्देन निर्भरम् ।
नात्युच्चपदिकास्वेतत्, समारोक्ष्यति निःसहम् ॥ ५१७ ॥

आत्मभूतेन तेनोच्चैर्नीतस्त्वं तावतीं भुवम् ।
निस्सहं तत्र तन्मुक्त्वा, गच्छेरूर्ध्वं समाधिमान् ॥ ५१८ ॥

पर्यन्ते पदिकामार्गमपि त्यक्त्वा स्वशक्तितः ।
पञ्चह्रस्वाक्षरोच्चारकालं स्थित्वा विहायसि ॥ ५१९ ॥

निरालम्बेन रूपेणोड्डीय गन्तव्यमुच्चकैः ।
शिवालयमठे स्थेयं, शाश्वतानन्दशालिना ॥ ५२० ॥

दिशाऽनया वानरकं, तन्मठे नयनक्षमम् ।
इति मे गुरुणा प्रोक्तं, तदाज्ञा क्रियते मया ॥ ५२१ ॥

अथाकलङ्को मौनीन्द्रवचोभावविदब्रवीत् ।
चारु चारूपदिष्टं ते, गुरुणा ज्ञानभानुना ॥ ५२२ ॥

चारु तद्वचनं कर्तुं, मुनिराज ! प्रवर्तसे ।
प्रत्यासीदति मुक्तिस्त्वां, कृतेदृशमनोजयम् ॥ ५२३ ॥

ततोऽगृहीतसंकेते !, सोऽकलङ्को महाशयः ।
आर्द्रीकर्तुं मम मनो, ववर्षेमां वचःसुधाम् ॥ ५२४ ॥

स्फुटाक्षरैरनेनेत्थं, मुनिना यन्निवेदितम् ।
तद् भद्र !, भवताऽबोधि, किं न वा घनवाहन ! ॥ ५२५ ॥

चित्तमेव समाख्यातमनेन क्लेशवर्जितम् ।
मोक्षस्य प्रापकं मुख्यं, सामग्र्यन्या तदर्थिका ॥ ५२६ ॥

लेश्यानां परिणामेन, तत् क्लेशत्याजनक्षमम् ।
शुद्धेष्वध्यवसायेषु, गच्छदेवोपपद्यते ॥ ५२७ ॥

इदं हेतुर्भवस्यापि, शिवस्यैव न केवलम् ।
यत् पूर्वपदिकारूढं, हट्टमार्गे नयत्यदः ॥ ५२८ ॥

असंख्याध्यवसायेषु, चरत् तत् चित्तवानरम् ।
विचित्रयोनिरूपस्य, संसारस्य विधायकम् ॥ ५२९ ॥

पदिकायां समारुह्य, मरणोत्प्लवनं हि तत् ।
करोति प्राणभाजस्तत्पदिकास्थभवे नयेत् ॥ ५३० ॥

सदोषं भवहेतुस्तत् निर्दोषं मोक्षदं मनः ।
अत एव परेऽपीत्थमामनन्ति मनीषिणः ॥ ५३१ ॥

चित्तमेव हि संसारो, रागादिक्लेशवासितम् ।
तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते ॥ ५३२ ॥

गुह्याद् गुह्यतरं तत्त्वं, तदिदं कथयामि ते ।
चित्तमेव हि सद्रत्नं, रक्षणीयं प्रयत्नतः ॥ ५३३ ॥

यावद्धावति चित्तं ते, जवनं पवनादपि ।
कामेषु सुखगन्धोऽपि, तावत् तव न विद्यते ॥ ५३४ ॥

यदा बहिर्भ्रमं त्यक्त्वा, स्थिरीभावं प्रपद्य च ।
निःस्पृहं भावि चित्तं ते, तदा ते परमं सुखम् ॥ ५३५ ॥

यदा ध्यानसरोमध्ये, निलीनं स्वगुणाम्बुजे ।
भविष्यत्यलिवच्चित्तं, तदा ते परमं सुखम् ॥ ५३६ ॥

अभिरामासु रामासु, श्यामासु च मषीषु ते ।
यदा समं भवेच्चित्तं, तदा ते परमं सुखम् ॥ ५३७ ॥

प्रत्यवस्थातरि क्रुद्धे, स्वान्तशुद्धे च सज्जने ।
यदा मनस्ते निर्भेदं, तदा ते परमं सुखम् ॥ ५३८ ॥

स्फुरत्कान्तिषु रत्नेषु, मृत्स्नायां च न भेदिनी ।
यदा ते स्यान्मनोवृत्तिस्तदा ते परमं सुखम् ॥ ५३९ ॥

अनभ्रानुपरागेन्दुनिर्मलं ते यदा मनः ।
रजस्तमोऽनभिभवात्, तदा ते परमं सुखम् ॥ ५४० ॥

प्रतिष्ठा शौकरी विष्ठा, राज्यं चित्ते यदा रजः ।
भोगा रोगा इवाभान्ति, तदा ते परमं सुखम् ॥ ५४१ ॥

व्याघ्रादिवान्यनिन्दायाः, परद्रोहादहेरिव ।
यदा बिभेति चित्तं ते, तदा ते परमं सुखम् ॥ ५४२ ॥

धर्मश्चित्ते परिणमेच्चन्दने गन्धवद् यदा ।
आकालमेकभावेन, तदा ते परमं सुखम् ॥ ५४३ ॥

शीततापादिभिर्भावैः, स्याच्चित्तस्यानुपद्रुता ।
सर्वंसहा यदा वृत्तिस्तदा ते परमं सुखम् ॥ ५४४ ॥

यदा न प्रेर्यते चित्तं, चिन्मात्रप्रतिबन्धतः ।
अनादिवासनावातैस्तदा ते परमं सुखम् ॥ ५४५ ॥

ज्ञाननीरैर्व्रतक्षारैर्धौतपापमलं यदा ।
चित्तवस्त्रं भवेच्छुद्धं, तदा ते परमं सुखम् ॥ ५४६ ॥

संपूर्य ब्रह्मणा सर्वं, सममुच्चावचं जगत् ।
यदा ध्यायति ते चित्तं, तदा ते परमं सुखम् ॥ ५४७ ॥

संहृत्य बुद्बुदप्रायान्, भावान् सांसारिकान् यदा ।
चित्तोदधिः स्थिरस्ते स्यात्, तदा ते परमं सुखम् ॥ ५४८ ॥

परास्यप्रेक्षितां त्यक्त्वा, दासतां लप्स्यते मनः ।
यदाऽनुभवसाम्राज्यं, तदा ते परमं सुखम् ॥ ५४९ ॥

न सुषुप्तं यदा चित्तं, न सुप्तं नापि जागरम् ।
तुर्यावस्थानुभवभृत्, तदा ते परमं सुखम् ॥ ५५० ॥

इति चित्तं विना नान्यः, सुखहेतुर्जगत्त्रये ।
चित्तवृत्तिं ततो रक्ष, लक्षयन् वास्तवीं स्थितिम् ॥ ५५१ ॥

ततोऽहमकलङ्कस्य, सिक्तस्तैर्वचनामृतैः ।
शर्मागृहीतसंकेते, मनाक् चित्तेऽनुभूतवान् ॥ ५५२ ॥

भिन्नं मे कर्मपटलं, तद्दृष्टान्तैरयोघनैः ।
अतीत्याहं स्थितिं बह्वीं, कर्मग्रन्थ्यन्तिके स्थितः ॥ ५५३ ॥

इतश्च सैन्यं चारित्रधर्मराजस्य यत् स्थितम् ।
चित्तवृत्तिमहाटव्यां, निरुद्धं मोहसेनया ॥ ५५४ ॥

तदा तत् तादृशं दृष्ट्वा, पीडितं शत्रुभिर्बलम् ।
सद्बोधमन्त्री चारित्रधर्मभूपमभाषत ॥ ५५५ ॥

कर्तव्यो देव ! नो खेदो, दृश्यते कुसुमोद्गमः ।
अस्मन्मनोरथतरोः, संसार्यस्ति यदुन्मुखः ॥ ५५६ ॥

दृष्ट्वाऽधुना मनाक् शुभ्रां, चित्तवृत्तिमहाटवीम् ।
ऊहे संसारिजीवस्यास्मद्ज्ञानाभ्यर्णवर्तिताम् ॥ ५५७ ॥

अस्य दृष्टौ च शक्तिर्नः, शत्रुघाते स्फुरिष्यति ।
मन्त्राधिष्ठायकस्येव, मन्त्रशक्तिर्महीयसी ॥ ५५८ ॥

तमापृच्छ्य ततः कर्मपरिणाममहीभुजम् ।
पार्श्वे संसारिजीवस्य, प्रेष्यतां कोऽपि मानवः ॥ ५५९ ॥

भूयसाऽनेहसा बाढं, ततस्तेनानुकूलितः ।
सतृष्णो दर्शनेऽस्माकं, स निर्मिथ्यं भविष्यति ॥ ५६० ॥

ततश्चारित्रधर्मेण, प्रोक्तं कः प्रेषणोचितः ।
सद्बोधः प्राह सर्वेषामुपकारी सदागमः ॥ ५६१ ॥

संस्तवात् सोऽस्य बहुशो, दिदृक्षुर्नो भविष्यति ।
तस्मै कर्मपरिणामस्ततोऽस्मान् ज्ञापयिष्यति ॥ ५६२ ॥

ततो वयं हनिष्यामः, शत्रून् श्रुत्वेति मन्त्रिणः ।
वाचं नृपो मदभ्यर्णे, प्रजिघाय सदागमम् ॥ ५६३ ॥

प्रत्यब्रवीच्च सचिवं, सम्यग्दर्शननामकः ।
अनेन सार्धमेषोऽपि, किं न प्रेष्यो महत्तमः ॥ ५६४ ॥

सद्बोधः प्राह भात्युच्चैर्युक्तोऽनेन सदागमः ।
प्रस्तावाभावतः किन्तु, नाधुनैष प्रहीयते ॥ ५६५ ॥

भूपः प्राह कदा मन्त्रिन् ! प्रस्तावोऽस्य भविष्यति ।
मन्त्र्याहोच्चैर्यदा गन्ता, रागमेष सदागमे ॥ ५६६ ॥

तदैव प्रेषणीयोऽयं, तस्य पार्श्वे महत्तमः ।
भूयः सदागमासङ्गाद्, योग्यता सा भविष्यति ॥ ५६७ ॥

यथा रत्ने शतक्षारपुटशोध्ये फलावहः ।
उत्तरेण श्रमः प्राच्यस्तथा ज्ञेयः सदागमे ॥ ५६८ ॥

प्राप्नोति जीवः संसारी, भूयो भूयः सदागमात् ।
वीर्यं यदाऽस्यावसरस्तदा सम्यक्त्वयोजने ॥ ५६९ ॥

प्रपन्ने मन्त्रिवचने, ततस्तेन महीभुजा ।
सदागमः सन्निधानं, क्रमान्मम समागतः ॥ ५७० ॥

ज्ञानसंवरणो नाम, महामोहनियुक्तकः ।
लीनः स्थितस्ततो दृष्ट्वा सदागमसमागमम् ॥ ५७१ ॥

अकलङ्कोऽथ संप्राप्तो, ध्यानारूढस्य सन्निधौ ।
मया सह निषण्णश्च, तं प्रणम्य महामुनिम् ॥ ५७२ ॥

धर्मलाभाशिषं दत्त्वा, पूर्णध्यानः स देशनाम् ।
अकलङ्काय दत्ते स्म, मोहमत्तेभकेसरी ॥ ५७३ ॥

तस्य पार्श्वे मया दृष्टः, स महात्मा सदागमः ।
ज्ञापितश्चाकलङ्केन, वयस्यायं सदागमः ॥ ५७४ ॥

एते हि मुनयोऽस्याज्ञां, लङ्घयन्ति न कर्हिचित् ।
सूरिरेषोऽस्य जानीते, महिमानमुदारधीः ॥ ५७५ ॥

सर्वेषां जायते ज्ञानमस्मादेव सदागमात् ।
त्वमप्येनं प्रपद्यस्व, कोविदाचार्यसेवया ॥ ५७६ ॥

मया तदनुरोधेन, प्रतिपन्नः सदागमः ।
मुदितेन ततः किञ्चिद् विरलीभूतकर्मणा ॥ ५७७ ॥

तद्‌गुणान् कोविदाचार्यो, मम कांश्चिदबोधयत् ।
भद्रकत्वं ततः किञ्चिज्जातं श्रद्धानवर्जितम् ॥ ५७८ ॥

साधुदाननमस्कारपाठार्हद्वन्दनादिकम् ।
अकलङ्कानुरोधेन, मया किञ्चित् तदा कृतम् ॥ ५७९ ॥

अकलङ्कस्तु संपृच्छ्य, मातापित्रादिकं जनम् ।
जग्राह कोविदाचार्यसन्निधौ संयमं तदा ॥ ५८० ॥

विजहार च तेनैव, सार्द्धमन्यत्र शुद्धधीः ।
नष्टाज्ञानः शिवाकाङ्क्षी, कष्टानुष्ठानकारकः ॥ ५८१ ॥

इतश्चाह महामोहं, सदागमहतच्छविम् ।
ज्ञानसंवरणं ज्ञात्वा, रागकेसरिमन्त्रिराट् ॥ ५८२ ॥

इयन्तं यद्‌बलात् कालं, वयं चिन्तोज्झिताः स्थिताः ।
ज्ञानसंवरणो भीतः, स समेतात् सदागमात् ॥ ५८३ ॥

असौ संसारिजीवस्य, तन्नोपेक्ष्यः स्थितोऽन्तिके ।
नखच्छेद्यं हि न प्राज्ञः, कुठारच्छेद्यतां नयेत् ॥ ५८४ ॥

इदं मन्त्रिवचः श्रुत्वा, महामोहसभाऽखिला ।
क्षुब्धा योधा महाक्रोधाः, सर्वे जाता रणोद्यताः ॥ ५८५ ॥

हन्तव्यः स महापापो, मया गत्वा सदागमः ।
इति प्रत्येकमुक्त्वा ते, स्थिता नृपमुखेक्षिणः ॥ ५८६ ॥

महामोहोऽवदद् वत्सा !, यूयं कर्तुमिदं क्षमाः ।
मया हतो हतो नूनं, सर्वैर्युष्माभिरेव सः ॥ ५८७ ॥

अतोऽहं यामि तं हन्तुं, यूयमत्रैव तिष्ठत ।
प्रतिजागरणं कार्यं, युष्माभिर्मेऽन्तराऽन्तरा ॥ ५८८ ॥

परिग्रहं नयाम्येकं, स्वाङ्गभूतमिमं सह !
रागकेसरिपुत्रस्य, सागरस्य वयस्यकम् ॥ ५८९ ॥

ज्ञात्वा निर्बन्धमखिलैः, प्रतिपन्नं वचोऽस्य तत् ।
ममागतौ ततः पार्श्वं, महामोहपरिग्रहौ ॥ ५९० ॥

वीक्षितौ तौ मया स्नेहः, सह ताभ्यामभून्मम ।
अनाद्यभ्यासयोगेन, दूतेन कृतनिर्भरः ॥ ५९१ ॥

इतश्चाभूद् यशःशेषो, जीमूतो भूमिवासवः ।
स्थापितोऽहं च साम्राज्ये, मन्त्रिबन्धुमहत्तमैः ॥ ५९२ ॥

जातः सीम(मा)न्तभूपालभालचुम्बितपत्कजः ।
दिनस्यार्क इवोर्जस्वी, राज्यस्य परिणामतः ॥ ५९३ ॥

तत्र पुण्योदयो हेतुर्मया मोहान्न लक्षितः ।
विषयेष्वथ मुह्यन्तं, मामाचष्टे सदागमः ॥ ५९४ ॥

बहिश्चरेषु भावेषु, तुच्छेषु घनवाहन ! ।
माकार्षीर्निःस्वभावेषु, मूर्च्छां दुःखैकधामसु ॥ ५९५ ॥

गर्जद्ज्ञानगजोत्तुङ्गरङ्गद्ध्यानतुरङ्गमाः ।
चित्ताबन्धाय युक्तास्ते, शमसाम्राज्यसम्पदः ॥ ५९६ ॥

भूतिसाम्राज्यभोगादि, महामोहस्तु मेऽखिलम् ।
वक्ति वस्तु स्थिरं पूर्णमात्मनीनं सुखात्मकम् ॥ ५९७ ॥

दत्ते हितोपदेशं च, नास्ति जीवो न निर्वृतिः ।
न पुण्यपापे न स्वर्गो, भूतमात्रमिदं जगत् ॥ ५९८ ॥

अतो यथेष्टं चेष्टस्व, भोगान् भुङ्क्ष्व दिवाऽनिशम् ।
मा मूढवचनं कृत्वा, वृथा भूः सुखवञ्चितः ॥ ५९९ ॥

परिग्रहस्तु मां ब्रूते, कुरु स्वर्णादिसंग्रहम् ।
असन्तुष्टोऽर्थलाभे हि, जायते सुखभाजनम् ॥ ६०० ॥

अहं त्वाकर्ण्य वचनं, त्रयाणामपि तादृशम् ।
चित्ते दोलायितो यावद्, वाताधूत इव द्रुमः ॥ ६०१ ॥

ज्ञानसंवरणो राजा, तावदाक्रम्य मां स्थितः ।
महामोहप्रसादार्थी, तत्सैन्यबलपोषकः ॥ ६०२ ॥

ततः सदागमप्रोक्तं, मया वाक्यं न बुध्यते ।
परिग्रहमहामोहवाक्यास्वादस्तु लभ्यते ॥ ६०३ ॥

ततो धर्मक्रियां त्यक्त्वा, जातोऽहं भोगमूर्च्छितः ।
निवार्य साधुदानादि, धनसंग्रहणे रतः ॥ ६०४ ॥

करेण पीडिता लोकास्ततो मूर्च्छाभृता मया ।
नारोचत महामोहदोषान्मह्यं सदागमः ॥ ६०५ ॥

परिग्रहस्य वीर्येण, पूर्णा तृष्णा न मे धनैः ।
सदागमो गतो दूरे, मत्वा मां तादृशं ततः ॥ ६०६ ॥

निष्कण्टकौ ततस्तुष्टौ, महामोहपरिग्रहौ ।
आगतः कोविदः सूरिरकलङ्कयुतोऽन्यदा ॥ ६०७ ॥

तस्याकलङ्कदाक्षिण्याद्, गतोऽहं नतिहेतवे ।
स सूरिरकलङ्कश्च, ससाधुर्वन्दितो मया ॥ ६०८ ॥

इतश्च दुश्चरित्रं मे, ज्ञातं कोविदसूरिणा ।
ज्ञानालोकेन लोकोक्तेरकलङ्केन चाखिलम् ॥ ६०९ ॥

ततो व्यजिज्ञपत् सूरिमकलङ्को निवेद्यताम् ।
सदागमस्य महिमा, खलसङ्गे च दूषणम् ॥ ६१० ॥

घनवाहनभूपाय, यथाऽसौ सुखमश्नुते ।
भक्तः सदागमे दुष्टसङ्गत्यागी विशेषवित् ॥ ६११ ॥

सूरिराह शृणोत्वेष, प्रह्वः श्रोतुमहं स्थितः ।
ततोऽकलङ्कदाक्षिण्यादथ सूरीन्दुरभ्यधात् ॥ ६१२ ॥

क्षमातलपुरे राजा, विद्यते मलसंचयः ।
मलपक्त्यभिधा तस्य, देवी जातौ तयोः सुतौ ॥ ६१३ ॥

कोविदो बालिशश्च द्वौ, तत्र जन्मान्तरेऽजनि ।
सार्द्धं सदागमेनोच्चैः, कोविदस्यातिसंस्तवः ॥ ६१४ ॥

ततो यावत् पुनर्दृष्टस्तावदूहादि कुर्वतः ।
जाता जातिस्मृतिस्तस्य, हितत्वेनादृतश्च सः ॥ ६१५ ॥

तेन स्वरूपं तस्योच्चैर्बालिशाय निवेदितम् ।
न तेन प्रतिपन्नं तु, समाक्रान्तेन पाप्मना ॥ ६१६ ॥

इतश्च प्रहिता कर्मपरिणामेन भूभुजा ।
स्वयंवरा श्रुतिः कन्या, प्रति कोविदबालिशौ ॥ ६१७ ॥

दासः सङ्गाभिधो वष्टस्तस्याश्च प्रहितोऽग्रगः ।
पटुः सम्बन्धघटने, तौ द्वावपि समागतौ ॥ ६१८ ॥

वृतौ तौ भ्रातरौ श्रुत्या, तयोरस्ति परिग्रहे ।
पर्वतो निजदेहाख्यो, मूर्द्धाख्यं तस्य सानु च ॥ ६१९ ॥

विद्येते सपरिक्षेपे, तस्य चोभयपार्श्वयोः ।
श्रवणाख्यापवरिके, तया ते प्रविलोकिते ॥ ६२० ॥

निवासो रुचितस्तस्यास्तयोर्भर्त्रोरनुज्ञया ।
स्थिता तयोः सा व्यलसत्, ताभ्यां सिद्धेहिता सह ॥ ६२१ ॥

अथ तां प्राप्य मुदितो, दध्यौ चेतसि बालिशः ।
धन्योऽहं यस्य सम्पन्ना, श्रुतिर्भार्या मनोहरा ॥ ६२२ ॥

ततो मत्वा श्रुतौ रक्तं, तं सङ्गः समभाषत ।
दम्पत्योर्युवयोः स्नेहः, सम्पन्नो घटमानकः ॥ ६२३ ॥

परं संवर्धनीयोऽयं, प्रियसम्पादनात् त्वया ।
बालिशोऽभिदधेऽस्याः किं, प्रियं सङ्ग ! निवेदय ॥ ६२४ ॥

सङ्गेन भाषितं नाथ !, प्रियोऽस्या मधुरध्वनिः ।
बालिशः प्राह यद्येवं, पूरयिष्यामि तं ततः ॥ ६२५ ॥

अथ तं दारकं तुष्टं, दधार हृदि बालिशः ।
श्रुतिं चालालयद् बाढं, वीणादीनां कलस्वनैः ॥ ६२६ ॥

श्रुतेः स लालने सक्तः, सङ्गदासवशंवदः ।
धर्माद् दूरे स्थितः षिङ्गो, जातो हास्यो विवेकिनाम् ॥ ६२७ ॥

इतश्च कोविदेनापि, पृष्टः शिष्टः सदागमः ।
एषा प्रिया मम हिता, किं वा नेति निगद्यताम् ॥ ६२८ ॥

सदागमोऽवदन्नेयं, ससङ्गा ते हिता प्रिया ।
इयं जगद् वशीकर्तुं, प्रहिता रागमन्त्रिणा ॥ ६२९ ॥

शुभाशुभकरः कर्मपरिणामो नृपोऽस्ति यः ।
विश्वासभूर्नृणां तस्य, भ्रातृव्यो रागकेसरी ॥ ६३० ॥

प्रसिद्धश्चरटो लोके, तस्यामात्यो विशेषतः ।
तत्पुत्रीयं श्रुतिर्भद्र, विश्ववञ्चनतत्परा ॥ ६३१ ॥

इयं चरटकन्येति, लोको मा भूदनादृतः ।
महाराजसुतात्वेन, सङ्गोऽमूं, ख्यापयत्यतः ॥ ६३२ ॥

न हितेयं यतो भार्या, भवतो भर्तृवैरिणी ।
विश्वासमस्यां मा कार्षीः, सर्पिण्यामिव सर्वथा ॥ ६३३ ॥

अकाण्डे शक्यते नेयं, त्यक्तुं त्याज्यस्तु सर्वथा ।
दासः सङ्गाभिधो येन, नेयं स्याद् दुःखकारिणी ॥ ६३४ ॥

सङ्गेनैव श्रुतिर्दुष्टा, वाटिकेव विषद्रुणा ।
तद्विहीना तु माध्यस्थात्र ते तात ! विबाधिका ॥ ६३५ ॥

त्यागमर्हति तद् दुष्टो, वष्टोऽयं सङ्गदारकः ।
सदागमस्य वचनं, प्रपन्नं कोविदेन तत् ॥ ६३६ ॥

दासस्त्यक्तः श्रुतेः सङ्गस्ततः श्लाघ्योऽभवद् भुवि ।
श्रावयन्नप्यसौ शब्दान्, श्रुतेरौत्सुक्यवर्जितः ॥ ६३७ ॥

इत्थं च ललमानौ तौ, श्रुत्या कोविदबालिशौ ।
त्यक्तसङ्गान्यथाभूतौ, जातौ लब्धसुखासुखौ ॥ ६३८ ॥

अन्यदा तौ समारूढौ, बहिरङ्गे महागिरौ ।
तुङ्गशृङ्गेऽस्ति तत्रैकं, रन्ध्रं देवविनिर्मितम् ॥ ६३९ ॥

अदृष्टमूलं मनुजैर्विशालं भूतले गतम् ।
गान्धर्वं कैन्नरं चेति, यद् गातुं तत्र यामलम् ॥ ६४० ॥

ततो द्वे विहिते रन्ध्रे, दैविके तत्परीक्षकैः ।
अथ तत्र तदाऽऽयातं, जिगीषुमिथुनद्वयम् ॥ ६४१ ॥

ताभ्यां गीतं समारब्धं, मधुरं श्रुतिसौख्यकृत् ।
परस्परेर्ष्यया ग्रामरामणीयकमूर्च्छितम् ॥ ६४२ ॥

तावद्रिशिखरारूढौ, ततः कोविदबालिशौ ।
बाढं रन्ध्रस्थमिथुनगीतश्रुत्या प्रबोधितौ ॥ ६४३ ॥

ततश्च हृदयस्थेन, सङ्गेन प्रेरितो न्यधात् ।
श्रुतिं तां बालिशो द्वारे, गीताकर्णनतत्पराम् ॥ ६४४ ॥

तथा कृतः स सङ्गेन, श्रुतिलौल्येन शून्यहृत् ।
यथा द्राट्कृत्य पतितो, रन्ध्रे शैलशिलोपमः ॥ ६४५ ॥

तदास्फोटेन कुपितैः, सर्वैर्गन्धर्वकिन्नरैः ।
चूर्णितो बालिशस्तत्र, दुःखमारेण मारितः ॥ ६४६ ॥

कोविदस्तु तदा मूर्च्छां, श्रुतियुक्तोऽपि नो ययौ ।
गीते सदागमादेशात्, तत्र सङ्गेन वर्जितः ॥ ६४७ ॥

ततस्तं बालिशं दृष्ट्वा, हन्यमानं स कोविदः ।
गिरिशृङ्गादपक्रान्तः, परं संवेगमागतः ॥ ६४८ ॥

धर्मघोषाभिधं प्राप्य, सूरिं तस्यान्तिके ललौ ।
दीक्षां तेन निजे स्थाने, क्रमाच्चासौ निवेशितः ॥ ६४९ ॥

स एषोऽहं महीपाल ! विज्ञेयः कोविदस्त्वया ।
भ्राता मे बालिशः सङ्गकुमित्रेण विनाशितः ॥ ६५० ॥

अहं सदागमेनैव, दुःखजालाद् विमोचितः ।
सम्प्रत्यपि करोम्याज्ञामतोऽस्यैव हितैषिणः ॥ ६५१ ॥

दुष्टः सङ्गस्ततस्त्याज्यो, न त्याज्यश्च सदागमः ।
हितैषिणामिदं तत्त्वं, स्वचरित्रेण दर्शितम् ॥ ६५२ ॥

आकर्ण्येदं गुरोर्वाक्यं, मयेदं परिभावितम् ।
त्याजयत्येष मां हन्त, महामोहपरिग्रहौ ॥ ६५३ ॥

सदागमेन सार्द्धं च, संस्तवं कारयत्यलम् ।
ततः किं करवाणीति, यावच्चिन्तापरः स्थितः ॥ ६५४ ॥

भावं ज्ञात्वाऽकलङ्केन, तावन्मां प्रति जल्पितम् ।
बुद्धं भागवतं वाक्यं, किं न वा घनवाहन ! ॥ ६५५ ॥

मयोक्तं सुष्ठु बुद्धं स, प्राह तत् क्रियतामिदम् ।
अकलङ्काश्रयप्रेम्णो, गाढरूढतया ततः ॥ ६५६ ॥

अचिन्त्यत्वात् प्रभावस्य, कोविदाचार्यसन्निधेः ।
कर्मग्रन्थेः पुनः प्रत्यासन्नत्वादुत्तराक्षमः ॥ ६५७ ॥

अकलङ्कस्य वचनमहं तत् प्रतिपन्नवान् ।
भूयः सदागमोऽभ्यर्णे, तदा मम समागतः ॥ ६५८ ॥

शीलिता सकला चैत्यवन्दनादिक्रिया पुनः ।
गुणितं पूर्वपठितं, नमस्कारादि किञ्चन ॥ ६५९ ॥

प्रवर्तितं च दानादि, पात्रेषु श्रमणादिषु ।
दूरीभूतौ मनाग् मत्तौ, महामोहपरिग्रहौ ॥ ६६० ॥

लज्जयेत्यकलङ्कस्य, श्राद्धोऽहं द्रव्यतोऽभवम् ।
निर्मूर्च्छ इव संसारे, सन्तुष्ट इव वैभवे ॥ ६६१ ॥

ततो मां तादृशं ज्ञात्वा, सोऽन्यत्र सह सूरिणा ।
विजहारकलङ्कोऽथ, महामोहपरिग्रहौ ॥ ६६२ ॥

मत्वा तं दूरगं पार्श्वे, मम प्रोल्लसितौ पुनः ।
गतः सदागमो दूरे, क्रिया सा शिथिलीकृता ॥ ६६३ ॥

जातोऽहं भोगमूर्च्छान्धो, धनसंग्रहतत्परः ।
कृतानि स्त्रीसहस्राणि, हेमकूपा मया भृताः ॥ ६६४ ॥

अहिरण्या कृता पृथ्वी, मयाऽन्यधनहारिणा ।
न कृतं यन्मया मोहात्, तत् पापं नास्ति भूतले ॥ ६६५ ॥

ततः पुण्योदयः क्रुद्धो, दृष्ट्वा दुश्चरितं मम ।
मृता शूलान्महादेवी, नाम्ना मदनसुन्दरी ॥ ६६६ ॥

अत्रान्तरे महामोहपार्श्वे भृत्यः समागतः ।
शोकाख्योऽवसरं ज्ञात्वा, स मामालिङ्गति स्म च ॥ ६६७ ॥

स्मृत्वा स्मृत्वा ततो देवीं, प्राणेभ्योऽप्यतिवल्लभाम् ।
मुक्तकण्ठं रुदन् दीनो, ज़ातोऽहं दुःखपूरितः ॥ ६६८ ॥

राज्यकार्यं परित्यक्तं, संस्कारश्च तनोरपि ।
ग्रहाविष्टसमानोऽहं, जातो विह्वलमानसः ॥ ६६९ ॥

श्रुत्वाऽकलङ्कस्तां वार्तां, लोकास्यान्मामुपाययौ ।
दृष्ट्वा मामतिशोकार्तं, कृपयेदमभाषत ॥ ६७० ॥

घनवाहन ! किं कर्तुमारब्धमसमञ्जसम् ।
शोकदावाग्निजलदो, विस्मृतः किं सदागमः ॥ ६७१ ॥

शोकोऽयं तव संस्मार्य, देवीं मदनसुन्दरीम् ।
स्वान्तं यद् बाधते भद्र !, तद्बीजं किं न बुद्ध्यसे ॥ ६७२ ॥

कृतान्ताहिमुखे सर्वे, पतिताः सन्ति जन्तवः ।
जीव्यते क्षणमप्येतैर्यत् तदेव महाद्भुतम् ॥ ६७३ ॥

अपेक्षते दशां नैष, प्रेमसम्बन्धबन्धुराम् ।
सर्वान्निर्दलयत्येव, जनान् सर्वंकषो यमः ॥ ६७४ ॥

मृत्युर्न भेषजैश्चित्रैर्नापनेयः सुरैरपि ।
इत्यशक्यप्रतीकारे, तत्र को विह्वलो भवेत् ॥ ६७५ ॥

अन्तं स्वकर्मणा नीतां, तां देवीं मुग्ध ! मा शुचः ।
आत्मैवान्तं त्वया शोच्यो, नेष्यमाणः स्वकर्मणा ॥ ६७६ ॥

करोत्येवमविश्रान्तः, स सुधीर्धर्मदेशनाम् ।
दृढशोकानुवृत्त्या तु, तामहं लक्षयामि न ॥ ६७७ ॥

प्रलपामि च हा बाले !, हा चार्वङ्गि ! वरानने ! ।
हा सुभ्रु ! हा विशालाक्षि !, हा रम्भोरु ! प्रियंवदे ॥ ६७८ ॥

हा भर्तृवत्सले देवि !, हा हा मदनसुन्दरि ! ।
क्व गताऽसि रुदन्तं मां, विहाय घनवाहनम् ॥ ६७९ ॥

दीयतां दर्शनं देवि !, पीयतां त्वद्वचो मया ।
लीयतां मम देहे च, त्वया शोकोऽपनीयताम् ॥ ६८० ॥

अकलङ्कस्य वचनमिति प्रलपता मया ।
नादृतं स पुनः प्राह, मां कृतार्द्रमना मुनिः ॥ ६८१ ॥

विधातुं बालचरितं, नेदं युक्तं भवादृशाम् ।
घनवाहन ! धीरत्वं, भज क्लैब्यं परित्यज ॥ ६८२ ॥

स्मरात्मानं कुरु स्वस्थं, मनो मोहमपाकुरु ।
परिग्रहेण सहितं, शोकं च शिथिलीकुरु ॥ ६८३ ॥

समाचरोपदेशं मे, सदागममनुव्रज ।
भवप्रदीपनादीन् किं, दृष्टान्तान्न स्मरस्यहो ? ॥ ६८४ ॥

व्यसनानि करस्थानि, भवस्थानां हि देहिनाम् ।
वियोगाः सुलभास्तीव्रव्याधयश्चाविदूरगाः ॥ ६८५ ॥

प्रत्यासन्नानि दुःखानि, ध्रुवा च यमयातना ।
विना विवेकं न त्राणं, पुरुषस्य किलापरम् ॥ ६८६ ॥

ततोऽगृहीतसंकेते !, शीधुमत्तो भयादिव ।
मन्त्रादिवाहिना दष्टः, सुप्तो बोधध्वनेरिव ॥ ६८७ ॥

ततोऽकलङ्कवचनाज्जातोऽहं लब्धचेतनः ।
नत्वा प्रोक्तोऽथ शोकेन, मोहो देव ! व्रजाम्यहम् ॥ ६८८ ॥

न ममात्रासितुं दत्तेऽकलङ्कः प्राह मोहराट् ।
दुष्टोऽयं भावि नो विघ्नः, किमस्मादावयोरपि ॥ ६८९ ॥

घनवाहनमेषोऽमुं, प्रतारयति तद् व्रज ।
अधुना त्वं पुनः कार्यं, प्रतिजागरणं मम ॥ ६९० ॥

तथेत्युक्त्वा गतः शोको, मया तत् स्वीकृतम् वचः ।
आकलङ्कं धृतश्चित्ते, प्रियत्वेन सदागमः ॥ ६९१ ॥

स्मारितं पूर्वपठितं, मनाग् मोहपरिग्रहौ ।
त्यक्तौ कियान् कृतोऽपूर्वश्रुतस्य ग्रहणादरः ॥ ६९२ ॥

कारिता जिनचैत्यैर्भूः, शुभ्रा यात्राः प्रवर्तिताः ।
तुष्टोऽकलङ्को जातो मे, श्रमोऽत्र फलवानिति ॥ ६९३ ॥

परिग्रहस्य मित्रस्य, विरहार्त्तेन मेऽन्तिके ।
आगन्तुं सागरेणाथ, प्रश्नितो रागकेसरी ॥ ६९४ ॥

आज्ञां तस्य ददौ सोऽपि, ततो बहुलिकाऽवदत् ।
छायेव सागरस्याहमनुगच्छामि तेन तम् ॥ ६९५ ॥

रागकेसरिणा प्रोक्तं, वत्से ! यातु भवत्यपि ।
प्राणभूता कृपणताऽप्यनुगच्छतु सागरम् ॥ ६९६ ॥

समागतानि मत्पार्श्वे, ततस्तानि तदाज्ञया ।
हृष्टौ तद्दर्शनाद् बाढं महामोहपरिग्रहौ ॥ ६९७ ॥

मामालिलिङ्ग सोत्साहमादौ कृपणता ततः ।
जाता धीः किमदृष्टार्थं, ममेयद्द्रविणव्ययैः ॥ ६९८ ॥

अकलङ्कश्च मामेष, प्रोत्साहयति सर्वदा ।
यदि भावस्तवेऽशक्तस्ततो द्रव्यस्तवं कुरु ॥ ६९९ ॥

तद्द्वारा व्ययितं भूयो, धनं किं करवाण्यथ ।
ध्यायन्तमालिलिङ्गेत्थं, स्नेहाद् बहुलिकाऽथ माम् ॥ ७०० ॥

ततः कुबुद्धिर्जाता मे, यथेतः कर्षयाम्यमुम् ।
अकलङ्कं स्निग्धगिरा, यथा न स्याद् धनव्ययः ॥ ७०१ ॥

ततोऽकलङ्कोऽभिहितो, मया यूयं समागताः ।
उपकाराय युष्माभिः, स च सम्पादितो मम ॥ ७०२ ॥

सम्पूर्णो मासकल्पो वो यूयं विहरतेत्यथ ।
सूरयो मोन्मनीभूवन्, मोपालम्भश्च भून्मम ॥ ७०३ ॥

चिन्ता न कार्या निर्देशं, करिष्ये भवतामहम् ।
अकलङ्को निशम्येदं, विहृतो गुरुमभ्यगात् ॥ ७०४ ॥

ततो निवार्य भूयोऽपि, धर्महेतोर्धनव्ययम् ।
रक्तः परिग्रहे जातः, सागरस्याहमाज्ञया ॥ ७०५ ॥

ततः परिग्रहेणोक्तः, सागरः साध्वहं त्वया ।
रक्षितः क्षीयमाणाङ्गो, वैद्येनैव रुजाऽर्दितः ॥ ७०६ ॥

त्वत्तोऽप्येषा कृपणता, प्राणदाऽभून्ममाधिका ।
हिता बहुलिकाऽप्यासीद्, यया निर्वासितो रिपुः ॥ ७०७ ॥

तच्चारु चारु विहितं, त्वयाऽऽगत्य नरोत्तम ! ।
भक्तिस्तवेयं सद्भावसौहृदद्रुममञ्जरी ॥ ७०८ ॥

एवं ब्रुवाणं प्रत्याह, महामोहः परिग्रहम् ।
साधूदितं त्वया वत्स !, सागरोऽयं ममासवः ॥ ७०९ ॥

निर्मिथ्यो मम भक्तोऽयं, न्यासस्थानं ममौजसः ।
मत्पुत्रराज्ययोग्योऽयमयं रक्षाक्षमस्तव ॥ ७१० ॥

महामोहेन तेनैव, सागरो गीतगौरवः ।
परिभूय मम स्वान्तं, बाधते स्म सदागमम् ॥ ७११ ॥

ततः स्फीतधनाकाङ्क्षो, बहिष्कृतसदागमः ।
जातोऽहं पूर्ववत् त्यक्तधर्मा विषयभिक्षुकः ॥ ७१२ ॥

ततस्तं मम वृत्तान्तमाकर्ण्य करुणोदधिः ।
सोऽकलङ्को मदभ्यर्णमागन्तुं पुनरैहत ॥ ७१३ ॥

विज्ञप्ताः कोविदाचार्यास्ततस्तेन प्रणेमुषा ।
घनवाहनबोधाय, व्रजामीत्यथ तेऽवदन् ॥ ७१४ ॥

मा गास्तदन्तिकं क्लेशस्तवायं निष्फलो यतः ।
तत्पार्श्वे जागरुकौ स्तो महामोहपरिग्रहौ ॥ ७१५ ॥

तयोः पार्श्वे समायान्ति, सागराद्याः, पुनः पुनः ।
मूर्च्छाशोषादिका दोषाः, प्रलापज्वरयोरिव ॥ ७१६ ॥

तेषामाश्रयभूतौ तावब्धिनद्याविवाम्भसाम् ।
तद्वशस्य च तस्य स्यात्, क्व सदागममीलकः ॥ ७१७ ॥

ऊषरे बीजवपनमन्धायादर्शदर्शनम् ।
उद्वर्तनं शवस्येदं, तस्य या धर्मदेशना ॥ ७१८ ॥

अत्यल्पस्तस्य संस्कारः, पूरयेत् त्वद्गिरा वपन् (भवन्) ।
न स्वाध्यायक्षतिं गुर्वीं, कूपं जलमिवाञ्जलेः ॥ ७१९ ॥

घनवाहनपार्श्वे तत्, पर्याप्तं गमनेन ते ।
विपरीतफले कार्ये, निष्फले च यतेत कः ॥ ७२० ॥

अकलङ्कस्ततः प्राह, कदैताभ्यां वियोक्ष्यते ।
घनवाहनराजोऽयमथ सूरिरभाषत ॥ ७२१ ॥

चारित्रधर्मस्य नरेश्वरस्य, महत्तमो योऽस्ति जगत्प्रसिद्धः ।
विद्याभिधानाऽस्ति तदीयकन्या, मनोभवा ज्ञातजगत्स्वभावा॥ ७२२ ॥

जगत्त्रयातीतवरेण्यपुण्य-लावण्यलीलागुणकल्पवल्लिः ।
ब्रह्मव्रतस्थैर्यभृतां पदं सा, धत्ते मुनीनामपि मानसेषु ॥ ७२३ ॥

तारुण्यमेषा विषयावभासं, व्यतीत्य बाल्यं रुचिरं बिभर्ति ।
आत्मावभासं शुचिभावकान्तिविस्तारविक्षोभितरागिवर्गम् ॥ ७२४ ॥

अस्या वपुर्भूषणतां बिभर्ति, तत्त्वावभासो विनिवृत्तिरूपः ।
बाह्यं पुरो यस्य सुवर्णरत्नविभूषणं भाति सतां न किञ्चित् ॥ ७२५ ॥

इमं जगत्क्षेमवनाम्बुधारा, धर्मान्तरायद्रुमपर्शुधारा ।
आनन्दसन्दोहकरी बुधानां, विश्रामभूमिर्मनसां पवित्रा ॥ ७२६ ॥

भिन्नो महाभाग्यभृतः किलास्याः, प्राप्नोति नेच्छन्नपि चाटुशर्म ।
भृङ्गं विनाऽन्यो न वसन्तफुल्लवासन्तिकासौरभभोगयोग्यः॥ ७२७ ॥

यदा वदान्यः परिणेष्यतीमां, कन्यां नरेन्द्रो घनवाहनोऽयम् ।
अस्मात् तदा यास्यति मोहदोषो, मलः सुवर्णादिव शुद्धिभाजः॥ ७२८ ॥

बिभर्ति मोहेन समं विरोधं, छायेव सा यद् ध्रुवमातपेन ।
दवाग्निनेवाम्बुदवारिधारा, दौर्गत्यदुःखेन सहेव लक्ष्मीः ॥ ७२९ ॥

चारित्रधर्मस्य तथाऽस्ति कन्या, निरीहता नाम निधिर्गुणानाम् ।
भ्रात्रोरभीष्टा विरतेश्च कुक्षि-समुद्भवा राज्यविवृद्धिकर्त्री ॥ ७३० ॥

प्रवर्द्धिता मन्त्रिमहत्तमाभ्यां, सन्तोषनाम्नाऽपि च तन्त्रपेन ।
उदारभावार्णवपूर्णिमेन्दु-ज्योत्स्ना जगदुःखलताकृपाणी ॥ ७३१ ॥

स्वभावरम्या न हि वाञ्छतीयं, रत्नादिसाध्यानि विभूषणानि ।
दूष्याणि भूष्याण्यपि तानि नास्याः, कुतस्तरां भूषणताऽस्तु तेषु ॥ ७३२ ॥

स्वर्णैर्न रूप्यैर्न न रत्नपूगैः, कदाऽपि सा लोभयितुं च शक्या ।
एकं विना भाग्यमिहैव साधोः, स्वर्गापवर्गोचितशर्मदायि ॥ ७३३ ॥

सहस्रशः सन्त्यधिभूमि कन्याः, सा रत्नभूर्ग्रावभुवस्तदन्याः ।
न कास्तटिन्यः कलुषं वहन्ति, जगत् पुनीते सुरसिन्धुरेका ॥ ७३४ ॥

कलत्रमेषा यदि नाम लब्धा, राज्येन किं भूरिधनेन किं वा ।
कलत्रमेषा यदि नैव लब्धा, राज्येन किं भूरिधनेन किं वा ॥ ७३५ ॥

अस्या नरेन्द्रो घनवाहनोऽसौ, यदा विवाहाद् भविता कृतार्थः ।
परिग्रहस्त्यक्ष्यति पार्श्वमस्य, तदैव दैवव्यतिवृत्तिभीतः ॥ ७३६ ॥

अकलङ्कोऽवदन्नाथ, कदा ते परिणेष्यति ।
अयं कन्ये गुरुः प्राह, कालेनाद्यापि भूयसा ॥ ७३७ ॥

प्रत्यूचेऽथाकलङ्कस्तं, ते कन्ये लम्भयाम्यहम् ।
गुरुराहाधिकारोऽत्र, नाद्याप्यस्ति भवादृशाम् ॥ ७३८ ॥

दापयिष्यति ते कर्मपरिणामो महीपतिः ।
तस्मै कन्ये परः कोऽपि, तयोरस्ति न दायकः ॥ ७३९ ॥

दापनायोद्यते तस्मिन्, सति युष्मादृशा अपि ।
हेतुभावं व्रजन्त्येव, तदत्रास्यैव निर्भरः ॥ ७४० ॥

तत् त्यक्त्वा वस्तुनिर्बन्धं, तिष्ठ त्वं स्वस्थमानसः ।
ततोऽकलङ्कः स्वीकृत्य, तत् तथेति स्थितः सुखम् ॥ ७४१ ॥

अहं पुनर्महामोहपरिग्रहसमाश्रितः ।
तद्भृत्यैः पीडितोऽनेकैर्भूयो भूयो गतागतैः ॥ ७४२ ॥

एके गच्छन्ति तद्भृत्याः, प्रत्यागच्छन्ति चापरे ।
सामुद्रा इव कल्लोला, वनवत् प्लावयन्ति माम् ॥ ७४३ ॥

तदा मम महामोहे, पार्श्वस्थे सर्वनायके ।
नास्थात् तत्सैनिकः कोऽपि, येन नाहं समाश्रितः ॥ ७४४ ॥

मूर्च्छितो बाह्यभावेषु, महामूढतया कृतः ।
मिथ्यादर्शनसंज्ञेन, त्याजितोऽहं सदागमम् ॥ ७४५ ॥

पापानि धर्मबुद्ध्याऽहं, कारितस्तन्महेलया ।
कुदृष्ट्या विषयेष्वास्था, रागकेसरिणा कृता ॥ ७४६ ॥

तद्भार्यया मूढतया, हृता मे भवदोषधीः ।
तथा द्वेषगजेन्द्रोऽन्तस्तापं कुर्वन् व्यजृम्भत ॥ ७४७ ॥

तस्याविवेकिता भार्या, विवेकं संजहार मे ।
प्रवर्तितोऽहं भोगेषु, रागकेसरिमन्त्रिणा ॥ ७४८ ॥

विडम्बितः पुनस्तस्य, भार्यया भोगतृष्णया ।
भोगानां मूर्च्छयाऽऽप्तानामनाप्तानां च काङ्क्षया ॥ ७४९ ॥

हासेन हासितोऽनर्थं, गाम्भीर्यं नाशितं च मे ।
गात्रेषु रमितो रत्या, मलपूर्णेषु योषिताम् ॥ ७५० ॥

अरत्याऽपि कृतो भद्रे !, सन्तापोद्वेगविह्वलः ।
नाटितश्च भयेनाहं, राज्यभ्रंशादिशङ्कया ॥ ७५१ ॥

शोकेनाप्यभिभूतोऽहं, धननाशादिहेतुना ।
जुगुप्सयाऽपि दलिता, तत्त्वमार्गमतिर्मम ॥ ७५२ ॥

सुतैर्द्वेषगजेन्द्रस्य, रागकेसरिणस्तथा ।
विहितं यत् कषायैर्मे, तत्तु वक्तुं न पार्यते ॥ ७५३ ॥

ज्ञानसंवरणेनापि, हृतो ज्ञानलवोऽपि मे ।
दर्शनावरणेनाहं, स्वापितो गाढनिद्रया ॥ ७५४ ॥

क्वचिदाह्लादितः क्वापि, वेदनीयेन तापितः ।
घनवाहनरूपेण, धारितश्चायुषा तदा ॥ ७५५ ॥

नामनाम्ना स्ववीर्यं च, शरीरे मम दर्शितम् ।
तथा गोत्रान्तरायाभ्यां, स्वस्वकार्यैर्विनाटितः ॥ ७५६ ॥

रौद्रार्त्तध्यानकलुषः; कृतो दुष्टाभिसन्धिना ।
अन्यैरपि बलं मोहभटैः स्वं स्वं प्रदर्शितम् ॥ ७५७ ॥

अथायातो नितान्तं मां, कदर्थयितुमन्यदा ।
महामोहमहीशक्रसमीपे मकरध्वजः ॥ ७५८ ॥

तुष्टो मोहः समायातं, तं दृष्ट्वा सपरिच्छदम् ।
सोऽपि तद्दर्शनात् तुष्टः, शिखीव घनदर्शनात् ॥ ७५९ ॥

गन्धेभ इव सन्नद्धो, महामोहस्तदन्वितः ।
विधाय विषयैरन्धं, मामत्यन्तमपीडयत् ॥ ७६० ॥

मग्नो भोगपुरीषेऽहं, ततो रात्रिंदिवं स्थितः ।
भूयसाऽपि न कालेन, तृप्तिर्मे समपद्यत ॥ ७६१ ॥

भोगेनैव च भोगानां, वृद्धा मे भोगतृष्णिका ।
तस्यामौर्वानले साधूपदेशोऽम्भ इवाभवत् ॥ ७६२ ॥

ततः सदागमो नष्टः, सिद्ध्यन्ति च मनोरथाः ।
मम पुण्योदयस्तत्र, हेतुर्बुद्धो मया न सः ॥ ७६३ ॥

ततो विधूय निखिलं, राज्यकार्यं दिवानिशम् ।
स्त्रैणमन्तःपुरगतं, भुञ्जानोऽहं मुदा स्थितः ॥ ७६४ ॥

तथा या या मया दृष्टा, कुलजाऽकुलजाऽथवा ।
सुरूपा स्त्री समाकृष्य, सा सा स्वान्तःपुरे धृता ॥ ७६५ ॥

गणितं न मया पापं, कलङ्कं ददता कुले ।
निवारकाणां वचनं, मन्त्रिणामप्युपेक्षितम् ॥ ७६६ ॥

ततो मे बान्धवा ह्रीणा, मद्दुश्चरितवीक्षिणः ।
विरक्ताः सर्वसामन्ता, निर्विण्णं चाखिलं पुरम् ॥ ७६७ ॥

भृत्या अपि निनिन्दुर्मां, गुणाः पूज्या न संस्तवः ।
मया तु लोकगर्हा सा, नादृता भोगभिक्षुणा ॥ ७६८ ॥

अथासीन्मे कनिष्ठो यो, भ्राता नीरदवाहनः ।
पराक्रमी त्रपाशीलो, विनीतो नीतिपारगः ॥ ७६९ ॥

सर्वैर्विरक्तैर्मत्तोऽसौ, पौरमन्त्रिमहत्तमैः ।
एकवाक्यैश्च सामन्तैर्भाषितो रहसि स्थितः ॥ ७७० ॥

अगम्यगामी मूढात्मा, निर्लज्जो धर्मवर्जितः ।
श्वेव राज्यश्रियो नायं, योग्योऽस्ति घनवाहनः ॥ ७७१ ॥

अयं स्ववंशदाहाय, समुत्पन्नो दवानलः ।
विध्यापयितुमर्हस्तत्, त्वद्राज्यस्नात्रवारिभिः ॥ ७७२ ॥

यावन्न प्रतिराज्येषु, वृत्तान्तोऽयं प्रसर्पति ।
विचार्य कार्यं राजा त्वं, तावद् भवितुमर्हसि ॥ ७७३ ॥

नो चेत् तवैष न भ्राता, न राज्यं न विभूतयः ।
न वयं न यशः शुभ्रं, पुरं नेदं भविष्यति ॥ ७७४ ॥

यथोक्तचेष्टं तं दृष्ट्वा, पर्यालोचं चकार सः ।
नष्टो मम दुराचीर्णोद्विग्नः पुण्योदयस्तदा ॥ ७७५ ॥

पापमत्यर्गलीभूतं, वृद्धं भावद्विषां बलम् ।
स्थितिर्द्राघीयसी चाभूत्, सर्वेषां कर्मणां पुनः ॥ ७७६ ॥

ततस्तद्वचनं लग्नं, भ्रातुश्चेतसि संगतम् ।
एवमस्त्विति तेनोक्ते, क्षीवो बद्धो जनैरहम् ॥ ७७७ ॥

मध्ये मत्परिवारस्य, निषेद्धा कोऽपि नोत्थितः ।
क्षिप्तोऽहं चारके क्रूरैस्ततो मन्त्रिमहत्तमैः ॥ ७७८ ॥

राज्ये च स्थापितो हर्षपूर्णैर्नीरदवाहनः ।
तुष्टाः कुस्वामिनाशेन, लोकाः सुस्वामिनो गुणैः ॥ ७७९ ॥

चारकेऽहं स्थितस्तत्र, पङ्कविण्मूत्रपिच्छले ।
तृषितः क्षुधितो बद्धस्ताडितो बालकैरपि ॥ ७८० ॥

राज्यभ्रंशसमुत्थेन, महादैन्येन पीडितः ।
प्राप्तो नारकवत् तापं, शारीरं मानसं तथा ॥ ७८१ ॥

तथाऽपि मोहदोषेण, निर्विण्णो न भवादहम् ।
सुचिरं चारके तत्र, दुःखान्यनुभवन् भृशम् ॥ ७८२ ॥

क्रोधान्धः सर्वलोकेषु, नानासंकल्पकीलितः ।
रौद्रध्यानशिलाक्रान्तो, भूरिकालमहं स्थितः ॥ ७८३ ॥

अथ गुटिका जीर्णा सा, प्राक्तनी भवितव्यता ।
दत्त्वाऽपरां तां पापिष्ठवासपुर्यां निनाय माम् ॥ ७८४ ॥

सप्तमे पाटके तत्राप्रतिष्ठानगृहे स्थितः ।
सागराणि त्रयस्त्रिंशन्निर्भिन्नो वज्रकण्टकैः ॥ ७८५ ॥

पञ्चाक्षपशुसंस्थाने, ततश्च शफरोऽभवम् ।
पुनर्गतोऽप्रतिष्ठानं, शार्दूलोऽहं ततोऽभवम् ॥ ७८६ ॥

ततः पापिष्ठवासायां, गतोऽहं तुर्यपाटके ।
ततो मार्जारतां प्राप्तः, सोढं दुःखं मयाऽतुलम् ॥ ७८७ ॥

मुक्त्वाऽसंव्यवहाराख्यं, नगरं भवितव्यता ।
इत्थं स्थानेषु सर्वेषु, पर्भ्रिमयति स्म माम् ॥ ७८८ ॥

भोजयन्त्या महामोहपरिग्रहफलान्यहम् ।
तयाऽगृहीतसंकेते !, योनौ योनौ विडम्बितः ॥ ७८९ ॥

भ्रमतोऽनन्तकालं मे, तुष्टाऽथ भवितव्यता ।
श्रान्ता इव तनूभूता, मोहाद्या अपि विद्विषः ॥ ७९० ॥

पुनर्ग्रन्थिसमीपस्था, जाता मे कर्मणः स्थितिः ।
नीतोऽहं भरतक्षेत्रे, भवितव्यतया ततः ॥ ७९१ ॥

साकेतनगरे नन्दवणिजो जनितः सुतः ।
भार्याया धनसुन्दर्या, गुटिकादानयोगतः ॥ ७९२ ॥

अमृतोदर इत्याख्या, मम पित्रा प्रतिष्ठिता ।
प्राप्तोऽहं यौवनं हृद्यं, स्मरसिंहगुहोपमम् ॥ ७९३ ॥

दृष्टः सुदर्शनः साधुर्मयोद्याने दिदेश सः ।
धर्मं तदा तदभ्यर्णे, भूयो दृष्टः सदागमः ॥ ७९४ ॥

किञ्चिद् भद्रकभावेन, नमस्कारादिपाठकृत् ।
द्रव्यश्राद्धस्ततो जातो, गतो मृत्वा सुरालये ॥ ७९५ ॥

स्थितो भवनवासित्वे, सार्द्धपल्योपमस्थितिः ।
सुखानि तत्र भुञ्जानो, विस्मृत्यैव सदागमम् ॥ ७९६ ॥

भार्यया पुनरानीतः, पुरेऽहं मानवालये ।
बन्धुदत्तवणिग्भार्या, तत्रासीत् प्रियदर्शना ॥ ७९७ ॥

तस्यास्तनयभावेन, कृतोऽहं बन्धुनामकः ।
संप्राप्तयौवनोऽद्राक्षं, सुसाधुं सुन्दराभिधम् ॥ ७९८ ॥

मया तस्य समीपस्थो, दृष्टो भूयः सदागमः ।
पुनरप्यस्य सम्बन्धि, ज्ञानमल्पं च शिक्षितम् ॥ ७९९ ॥

ततोऽहं श्रमणो जातो, द्रव्यतस्तत्प्रभावतः ।
महर्द्धिर्व्यन्तरो देवो, जातोऽहं विबुधालये ॥ ८०० ॥

विस्मृतत्वेन नो नीतो, मया तत्र सदागमः ।
पुनश्च मानवावासे, गतेन प्रविलोकितः ॥ ८०१ ॥

इत्थं चानन्तशः कालमनन्तं भ्रमता भवे ।
मया सदागमो दृष्टो, विस्मृतश्च पुनः पुनः ॥ ८०२ ॥

विस्मृतेऽस्मिन् मया भ्रान्तं, भवचक्रं निरन्तरम् ।
द्रव्यश्राद्धयतित्वेन, पुनर्दैवादलम्भि सः ॥ ८०३ ॥

क्वचिद् दीर्घा क्वचिद् ह्रस्वा, भ्रमतो भवचक्रके ।
जाता कर्मस्थितिर्जाताः, क्वचिन्मे प्रबला द्विषः ॥ ८०४ ॥

क्वचित् सदागमो जातः, प्रबलस्तन्निवारकः ।
इत्थं चानन्तकालीनोऽभ्यासो जातः सदागमे ॥ ८०५ ॥

ततश्च निर्मलां दृष्ट्वा, चित्तवृत्तिमहाटवीम् ।
सद्बोधमवदत् सम्यग्दर्शनाख्यो महत्तमः ॥ ८०६ ॥

आर्य ! विज्ञप्यतां देवः, प्रस्तावो गमनस्य मे ।
पार्श्वे संसारिजीवस्य, त्वदुक्तो वर्ततेऽधुना ॥ ८०७ ॥

सद्बोधेनोदितं सम्यक्, त्वया संलक्षितोऽवधिः
तद्विज्ञप्तेन स ततो, राज्ञा मे प्रहितोऽन्तिके ॥ ८०८ ॥

तेनोक्तं देव ! विद्येयं, प्राभृतीक्रियते यदि ।
तदा संसारिजीवस्य, सन्तोषो जायते महान् ॥ ८०९ ॥

सद्बोधोऽवोचताद्यापि, प्रस्तावोऽस्या न विद्यते ।
येन संसारिजीवस्त्वां, सामान्येनैव भोत्स्यते ॥ ८१० ॥

विशेषतश्च त्वद्रूपं, यावत् तेन न बुध्यते ।
न तावद् युज्यते दातुं, तस्मै कन्येयमुत्तमा ॥ ८११ ॥

अज्ञातकुलशीलोऽस्याः, कुर्याच्वेत् स पराभवम् ।
तन्निमित्तं तदा शल्यं, स्यादस्माकं दुरुद्धरम् ॥ ८१२ ॥

तद् गच्छ त्वं विना विद्यां, चन्द्रः पूर्णकलामिव ।
भूयसाऽनेहसा रूपं, भोत्स्यतेऽसौ तव स्फुटम् ॥ ८१३ ॥

आदायाहं तदा विद्यामागमिष्यामि तेऽन्तिके ।
स लप्स्यते शरच्चन्द्रज्योत्स्नोत्सवमुदं तदा ॥ ८१४ ॥

सदागमस्य सान्निध्यं, मोहादीनां च तानवम् ।
भवजन्तोः शमलवास्वादो देवदिदृक्षुता ॥ ८१५ ॥

हृदि स्रोतसिका खेदविश्रामश्चेत्यमी गुणाः ।
विद्यां विनाऽपि भवतो, गच्छतस्तत्र भाविनः ॥ ८१६ ॥

ततो महामन्त्रिवचो, राज्ञश्चाज्ञां प्रमाणयन् ।
एक एवागतस्तूर्णं, मत्पार्श्वं स महत्तमः ॥ ८१७ ॥

इतश्चानन्दनन्दिन्योः, सूनुर्नाम्ना विरोचनः ।
जातोऽहं मानवावासे, संप्राप्तश्चारु यौवनम् ॥ ८१८ ॥

गतोऽहं कानने चित्तनन्दने तत्र संयतः ।
धर्मघोषो मया दृष्टः, तदाऽभूत् कर्मतानवम् ॥ ८१९ ॥

निषण्णस्तं महाभागं, वन्दित्वा शुद्धभूतले ।
तेन मां भद्रकं ज्ञात्वा, कृता सद्धर्मदेशना ॥ ८२० ॥

अत्रान्तरे प्रादुरभूत्, पुनर्मम सदागमः ।
रुचितं तद्वचः पृष्टे, मुनिः किमुचितं मम ॥ ८२१ ॥

मुनिराह त्वया चिन्त्या, दोषाः संसारगोचराः ।
आराध्यः परमात्मा च, सिद्धानन्तचतुष्टयः ॥ ८२२ ॥

वन्द्यास्तदुपदिष्टाध्वगामिनो मुनयोऽनघाः ।
ज्ञेयानि नव तत्त्वानि, पेयं जिनवचोऽमृतम् ॥ ८२३ ॥

नेयं तदङ्गाङ्गीभावमनुष्ठेयं हितं निजम् ।
उपचेयं शुभोपायैः, पुण्यं पुण्यानुबन्धि च ॥ ८२४ ॥

विधेयं निर्मलं स्वान्तं, हेयं संकल्पमण्डलम् ।
ज्ञेयं गुरुवचः सारं, देयं चेतस्तदादरे ॥ ८२५ ॥

अवगेयं खलवचः, स्थेयमक्षुब्धचेतसा ।
इत्थं ब्रुवाणे सूरीन्द्रे, संप्राप्तोऽसौ महत्तमः ॥ ८२६ ॥

वीक्षितश्च सुदुर्भेदग्रन्थिभेदादसौ मया ।
श्रद्धानमात्मरुच्याऽभून्मौनीन्द्रे वचने ततः ॥ ८२७ ॥

बुद्धो बन्धुधिया सम्यग्दर्शनाख्यो महत्तमः ।
मुनिं प्रत्युक्तमादेशं, करिष्ये भवतामहम् ॥ ८२८ ॥

तं मुनीन्द्रं ततो नत्वा, गतोऽहं भवने निजे ।
ततः प्रभृति संजातः, सद्दृष्टिर्ज्ञानवर्जितः ॥ ८२९ ॥

तदेव सत्यं निःशङ्कं, यज्जिनेन्द्रैः प्रवेदितम् ।
एतावन्मात्रतुष्टोऽहं, जातः कुग्रहवर्जितः ॥ ८३० ॥

ज्ञानं सदागमेनापि, वितीर्णं मे तदा बहु ।
सूक्ष्मो भावः परं दृष्टो, न मया मन्दचक्षुषा ॥ ८३१ ॥

पटुवाचोऽपि गुरवः, सूक्ष्मज्ञानस्य हेतवः ।
विशिष्टयोग्यताऽभावान्न तदानीं ममाभवन् ॥ ८३२ ॥

सूक्ष्मज्ञानोज्झितं जातं, ततः श्रद्धानमेव मे ।
पल्योपमपृथक्त्वे तु, क्षीणे श्राद्धत्वमागतम् ॥ ८३३ ॥

सामान्यतस्तदादेशान्नियमाः पालिता मया ।
श्रद्धया तत्प्रभावेन, गतोऽहं विबुधालये ॥ ८३४ ॥

सौधर्मे तत्र शयनात्, स्फुरत्कुसुमसौरभात् ।
प्रवरोल्लोचसन्तानाच्छन्नात् कोमलवाससा ॥ ८३५ ॥

समुत्थितः क्षणार्द्धेन, ज्योतिर्द्योतितदिक्पथः ।
स्फुरत्कोटीरकटकहारकेयूरकुण्डलः ॥ ८३६ ॥

स्तुतो देवैश्च देवीभिः, सुस्निग्धमधुरोक्तिभिः ।
हरिचन्दनमन्दारसन्तानस्रग्विराजितः ॥ ८३७ ॥

विलोक्य तादृशीं भूतिं, विस्मितः पर्यचिन्तयम् ।
कृतं मया किं सुकृतं, ज्ञानं प्रादुरभूत् ततः ॥ ८३८ ॥

विरोचनभवावस्था, मया तेनावधारिता ।
समायातौ च सम्यक्त्वमहत्तमसदागमौ ॥ ८३९ ॥

बन्धुत्वेन प्रपन्नौ तौ, कृतं कृत्यमथोचितम् ।
विलोक्य पुस्तकं रत्नं, भगवत्पूजनादिकम् ॥ ८४० ॥

ततः स्वहृदयानन्दिविषयग्रामलालितः ।
स्थितस्तत्र मनाग्न्यूनसागरद्वितयावधि ॥ ८४१ ॥

ततश्च मानवावासे, सुनुर्मदनरेणयोः ।
आभीरोऽहं कलन्दाख्यो, भवितव्यतया कृतः ॥ ८४२ ॥

न मामन्वागतौ तत्र, महत्तमसदागमौ ।
तन्त्रान्तरीयको दृष्टः, श्राद्धधर्मश्च तत्र न ॥ ८४३ ॥

जातः प्राचीनसंस्कारात् केवलं पापभीरुकः ।
ज्योतिष्कोऽहं ततो जातो, भद्रकत्वानुभावतः ॥ ८४४ ॥

तत्र लालयता भोगैरिन्द्रियाणि सदा मया ।
सेवितौ दृढरागेण, महामोहपरिग्रहौ ॥ ८४५ ॥

ततोऽहं दर्दुराकारो, रुष्टया प्रियया कृतः ।
नानाविधेषु स्थानेषु, बहुशो भ्रमितस्ततः ॥ ८४६ ॥

ततश्च मानवावासे, काम्पिल्यनगरे कृतः ।
धराया वसुबन्धोश्च, तनयो वासवाभिधः ॥ ८४७ ॥

शान्ता(न्त्या)ख्यं सूरिमासाद्य, तत्र सद्धर्मदेशकम् ।
पुनर्दृष्टौ मया भद्रे, महत्तमसदागमौ ॥ ८४८ ॥

द्वितीयकल्पे संप्राप्तस्तत्प्रभावात् सुरालये ।
तत्रापि स्मृतिमारूढौ, महत्तमसदागमौ ॥ ८४९ ॥

भुक्त्वाऽतुलं सुखं तत्र, सुचिरं काञ्चने पुरे ।
आगतो मानवावासे, मोहात् तौ तत्र विस्मृतौ ॥ ८५० ॥

इत्थं संख्यातिगा वारा, दृष्टौ नष्टौ च तावुभौ ।
सामान्यश्राद्धधर्मोऽपि, दृष्टः सति महत्तमे ॥ ८५१ ॥

असंख्यवारास्तद्दृष्टास्त्रयोऽमी वरबान्धवा: ।
दृष्टश्च केवलोऽप्येषोऽनन्तवार: सदागम: ॥ ८५२ ॥

संजातो मत्समीपस्थो, यत्र यत्र महत्तम: ।
तत्र तत्राभवत् पुण्योदय: सुखनिबन्धनम् ॥ ८५३ ॥

जाता कर्मस्थितिर्लघ्वी, लीना मोहादयोऽपि च ।
यदा ते प्रबला जातास्तदा पुण्योदयो गत: ॥ ८५४ ॥

जितौ मोहादिभि: क्वापि, महत्तमसदागमौ ।
देशकालबलं प्राप्य, क्वचित् ताभ्यां च ते जिता: ॥ ८५५ ॥

इत्थं कालमनन्तं ते, जाता भङ्गजयस्पृश: ।
मत्पक्षपाताद् विजयो, भङ्गोऽभूत् तद्विपर्ययात् ॥ ८५६ ॥

कृतोऽन्यदा शालिभद्रकनकप्रभयोरहम् ।
सुतो विभाषण: पत्न्या, वणिक् सोपारके पुरे ॥ ८५७ ॥

अथ सूरिं सुधाकूपं, संप्राप्य शुभकानने ।
पुनर्दृष्टौ मया बन्धू, महत्तमसदागमौ ॥ ८५८ ॥

ततो गुरूपरोधेन, जातोऽहं श्रमणस्तदा ।
तत्त्वश्रद्धानसहितो, भावचारित्रवर्जित: ॥ ८५९ ॥

लिङ्गमादाय मौनीन्द्रं, मुनिमध्येऽपि तिष्ठत: ।
कर्मदोषान्मनो मेऽभूद्, वैभाष्यनिरतं तदा ॥ ८६० ॥

तत: प्रबलतां प्राप्ता, महामोहादयो द्विष: ।
भावतो विगतौ दूरे, महत्तमसदागमौ ॥ ८६१ ॥

तपस्विनां सुशीलानां, जातोऽहं निन्दकस्तत: ।
अन्येषामपि निन्दौघैर्मुखमुद्धूलितं मया ॥ ८६२ ॥

किमन्यत् तीर्थनाथानां, श्रुतस्य गणधारिणाम् ।
सङ्घस्य चाशातनया, पापकूपो मया भृत: ॥ ८६३ ॥

यतिवेषोऽपि जातोऽहं, मिथ्यात्वी गुणदूषकः ।
ततोऽनन्तं पुनः कालं, भ्रामितो दुष्टभार्यया ॥ ८६४ ॥

न सा विपन्न सा पीडा, न सा तीव्रविडम्बना ।
अपार्द्धपुद्गलावर्तं, या न सोढा मया तदा ॥ ८६५ ॥

स्वकीयवृत्तान्तमिति ब्रुवाणे, संसारिजीवे श्रवणामृताभम् ।
भावार्थलेशासिमुदाऽगृहीत-संकेतया चित्रमधारि चित्ते ॥ ८६६ ॥

प्रज्ञाविशालाऽपि निशम्य वाचं, तां तादृशीं चिन्तयति स्म चित्ते ।
अहो महामोहपरिग्रहौ द्वौ, दुरन्तदोषावनिवार्यवीर्यौ ॥ ८६७ ॥

क्रोधादिदोषादिगतैरनर्थैः, सम्यक्त्वहीनात्र हि विस्मयः स्यात् ।
तत्संयुताभ्यां भवपातमाभ्यां, श्रुत्वा तु चित्रीयत एव चेतः ॥ ८६८ ॥

ते के नु दोषाः भुवि ये भवन्ति, सम्यक्त्वसूर्यस्य पुरस्तमांसि ।
इमौ त्वहो दुष्टतरौ पयोदराहूपमौ तद्रुचिनाशदक्षौ ॥ ८६९ ॥

इमौ समस्ताः समुदायरूपौ, क्रोधादिदोषा अपि वाऽनुयान्ति ।
तदेतयोरीदृशकष्टजातसंपादकत्वं न हि चित्रकारि ॥ ८७० ॥

क्रोधादयोऽपि प्रभवन्ति घाते, बाढं गुणानामनिवार्यमाणाः ।
तथाऽपि चासावनयोर्विशेषो-ल्लेखार्थमेवेत्थमुदाजहार ॥ ८७१ ॥

इत्थं महामोहपरिग्रहोत्थं, फलं निशम्यापि न पापलोकः ।
प्रबुद्ध्यते सद्गुरुवाक्यलक्षैः, किं कुर्महे तत्र बहूपचारैः ॥ ८७२ ॥

एषाऽप्यशेषाऽपनयप्रसूतिः, श्रुतिः श्रुता कोविदसूरिवाक्यैः ।
तथाऽपि मोहान्धतया जनोऽस्याः, कथं वृथा धावति लालनाय॥ ८७३ ॥

उन्नीतभावामिति धीविशालां, संप्रेक्ष्य भव्यो वदति स्म मातः ! ।
ध्यातं त्वया किं निजगाद साऽपि, सर्वं प्रवक्ष्यामि निराकुला ते॥ ८७४ ॥

दत्तावधानः शृणु तावदस्य, वाक्यं कृथा मा तरलत्वमन्तः ।
अनेन सर्वं स्वचरित्रमुक्तप्रायं तदस्य द्रुतमस्तु पूर्तिः ॥ ८७५ ॥

ततस्तत्र स्थिते तूष्णीं, नृपपुत्रे स स सादरम् ।
संसारिजीवः प्रोवाच, शिष्टमात्मकथानकम् ॥ ८७६ ॥

नीतोऽहमन्यदा पत्न्या, भद्दिलाख्यपुरे तया ।
कृतः स्फटिकराजस्य, तनयो विशदाह्वयः ॥ ८७७ ॥

विमलाकुक्षिजो रम्ये, यौवने वर्तमानकः ।
सुप्रबुद्धमुनिं दृष्ट्वा, प्रतिबोधमुपागतः ॥ ८७८ ॥

भूयस्तत्र मया दृष्टौ, महत्तमसदागमौ ।
पालितौ तौ सदा सम्यग्, गृहिधर्मेण संयुतौ ॥ ८७९ ॥

श्रद्धायुक्तः स्थितस्तत्र, सूक्ष्मज्ञानेन तूज्झितः ।
गृहिधर्मानुभावाच्च, जातः पुण्योदयोऽनघः ॥ ८८० ॥

ततस्तृतीयकल्पेऽहं, भोगसंमर्दसुन्दरे ।
तया पत्न्या सदानन्दे, धृतः सागरसप्तकम् ॥ ८८१ ॥

ततश्च मनुजावासे, ततश्च विबुधालये ।
गमनागमनं भूरिवारमित्थं च कारितः ॥ ८८२ ॥

द्वादशापि मया स्वर्गा, बान्धवत्रयसंयुजा ।
प्रत्येकं प्रेक्षिता भद्रे !, क्वचित् त्यक्तश्च बान्धवैः ॥ ८८३ ॥

तयाऽथ द्वादशस्वर्गान्मनुजावाससम्मुखम् ।
प्रस्थापितो विशालाक्षि !, पुण्योदयसुहृद्युतः ॥ ८८४ ॥

भवति विगतस्वान्तध्वान्तः परिग्रहमोहयोः,
परिणतिमिमां श्रुत्वा दुष्टां श्रुतेरपि यः सुधीः ।
स इह लभते धर्मध्यानप्रथाप्रसरज्जिन-
प्रवचनकथानीतस्वात्मानुभूतियशःश्रियम् ॥ ८८५ ॥

॥ नवमः स्तबकः ॥

अथास्ति सप्रमोदाख्यं, पुरं कैलाससन्निभम् ।
यत् सर्वमङ्गलोल्लासिमहेश्वरविराजितम् ॥ १ ॥

निरीक्ष्यादृष्टपूर्वान् यल्ललनालोकविभ्रमान् ।
जाता किं विस्मयादेव, निर्निमेषाः सुराङ्गनाः ॥ २ ॥

तत्रोन्मूलितशत्रुस्त्रीपत्रवल्लिर्विराजते ।
राजा राजन्यगन्धेभसन्निभो मधुवारणः ॥ ३ ॥

योगीवाभूत् परपुरप्रवेशैककुतूहली ।
यत्खडगस्तद्यशःक्षीरपानमात्रधृतव्रतः ॥ ४ ॥

क्षुब्धोऽब्धिर्यन्महादानजलसात्कारवाञ्छया ।
पितुर्दुःखादतो दग्धा, कुक्षिर्लक्ष्ममिषाद् विधोः ॥ ५ ॥

तस्य चास्ति महादेवी; लावण्यगुणशालिनी ।
कृतरम्भामनःस्तम्भा, धाम्ना नाम्ना सुमालिनी ॥ ६ ॥

निवेशितोऽहं तत्कुक्षौ, पुण्योदययुतस्तया ।
निष्क्रान्तः कालपर्यायात्, सह पुण्योदयेन च ॥ ७ ॥

संजातं मयि जाते च, सोल्लासं नृपमन्दिरम् ।
उद्गते महसां पत्यावम्भोरुहवनं यथा ॥ ८ ॥

कृतं पित्रोचिते काले, नाम मे गुणधारणः ।
संप्राप्तो लालितो वृद्धिं, धात्रीभिः पञ्चभिस्ततः ॥ ९ ॥

इतश्चास्ति सगोत्रो मत्पितुर्मित्रं नरेश्वरः ।
यथार्थनामा तनयस्तस्य चास्ति कुलन्धरः ॥ १० ॥

वर्धमानो दृढस्नेहः, सह तेन सुमेधसा ।
जातोऽहमर्पितस्वीयमनःसद्भावगोचरः ॥ ११ ॥

कृतक्रीडौ समं सार्द्धं, कलाभ्यासपरायणौ ।
स्मरद्विपमदावस्थामावां तरुणतां गतौ ॥ १२ ॥

इतश्चास्ति पुराद्दूरे, स्वशोभाजितनन्दनम् ।
आह्लादमन्दिरं नाम, वनं द्रुमलताघनम् ॥ १३ ॥

तच्च सेवितमावाभ्यां, नेत्रानन्दि दिने दिने ।
दूरे योषिद्द्वयं दृष्टं, गताभ्यां तत्र चान्यदा ॥ १४ ॥

उद्गिरन्तीव लावण्यमङ्गैः शृङ्गाररङ्गिभिः ।
तत्रैकाऽस्थात् स्मितास्यैव, द्वितीयाऽपि तदन्तिके ॥ १५ ॥

अथ सा कुटिलैस्तीक्ष्णैराकर्णान्तावलम्बितैः ।
नामितभ्रूधनुर्मुक्तैर्दृग्बाणैर्मामताडयत् ॥ १६ ॥

उल्लसितस्तनी चूतशाखामालम्ब्य सा स्थिता ।
मनो बिभेद मे कामकन्दुकोत्क्षेपलीलया ॥ १७ ॥

कटाक्षान् विक्षिपन्ती सा, प्रोल्लसितकुचद्वया ।
निचखानाश्मगोलाभ्यां, हृदि स्मरशरान्मम ॥ १८ ॥

संभ्रान्तं विस्मितं स्निग्धं, साकूतं लज्जितं तथा ।
तस्याश्चित्तं मयाऽलक्षि, लक्षणैः स्नेहनिर्भरम् ॥ १९ ॥

स्वान्ते प्रविश्य सा रक्ता, मम स्वान्तमरञ्जयत् ।
अभेदरञ्जनविधिः, स्मरस्यायमलौकिकः ॥ २० ॥

ततो मया हृदि ध्यातं, किं रम्भेयं रतिः क्विमु ।
किन्नरी वा गुणदरी, किं वा श्रीर्मूर्तिशालिनी ॥ २१ ॥

इति ध्यायन्नहं चित्ते, जातः स्मरविकारभाक् ।
साकूतं सुहृदा दृष्टस्तेन विज्ञातचेतसा ॥ २२ ॥

आकारगोपनं कृत्वा, मयेत्थं चिन्तितं तदा ।
सकामदृष्ट्या नो युक्तं, परस्त्रीदर्शनं सताम् ॥ २३ ॥

तदस्मान्मद्विलसिताद्, किमनेन विचिन्तितम्।
इति ह्रीणो मुखं तस्य, परीक्षार्थं न्यभालयम् ॥ २४ ॥

ततो ज्ञाताशयः कृत्वा, निगूढां काकलीं जगौ।
कुलन्धरो मामधुना, कुमारैकसि गम्यताम् ॥ २५ ॥

बृहद्वेलां विलसितमपराह्णोऽथ वर्तते।
मयोक्तं तव चित्ते यद्, रोचते तद् विधीयताम् ॥ २६ ॥

आवां ततो गतौ गेहे, कृतं कार्यं दिनोचितम्।
उपस्थिताऽथ मदनज्वरवेलेव शर्वरी ॥ २७ ॥

तस्यां विविक्तशय्यायां, तिष्ठतो मम सा प्रिया।
सिंहमध्या फणिस्फारवेणिदण्डा गता हृदि ॥ २८ ॥

सा शल्यं मनसः शोच्यामकरिष्यद् दशां मम।
नाभविष्यत् सुहृत्पुण्योदयो यदि समीपगः ॥ २९ ॥

विलगन्त्यपि सा चित्ते, ततोऽभून्नातिबाधिका।
स हि सांसारिकार्थेषु, मनोबाधानिरासकृत् ॥ ३० ॥

स्मृत्वा तथापि तां काममाहात्म्येन ममाजनि।
कस्येयं कीदृशी वेति, मनाक् चिन्तातुरं मनः ॥ ३१ ॥

ध्यात्वेत्यहं गतो निद्रां, न्यवर्तत विभावरी।
समायातः समीपं मे, प्रभाते च कुलन्धरः ॥ ३२ ॥

मनाक् तद्दर्शनाकाङ्क्षावशात् सोऽभिहितो मया।
पुनर्वयस्य ! गच्छावः, किं तत्राह्लादमन्दिरे ॥ ३३ ॥

ततः कुलन्धरः प्राह, गिरा स्मितपवित्रया।
किं तत्र गम्यते किं ते, निधानं तत्र विस्मृतम् ॥ ३४ ॥

भावज्ञोऽयमिति ज्ञात्वा, मयोक्तं मित्र ! मुच्यताम्।
हासो गत्वा वने कस्य सा कीदृग् वेति वीक्ष्यताम् ॥ ३५ ॥

भवित्री परभार्या चेत्, तदा ग्राह्या न जातु मे ।
कन्यका चेन्न मुञ्चामि धावतस्तां हरेरपि ॥ ३६ ॥

ततः कुलन्धरेणोक्तमधैर्यं मित्र ! मा कृथाः ।
रोचते यद् वयस्याय, गच्छावस्तद् विधीयते ॥ ३७ ॥

ततो गतौ तत्र वने, स्थानं तत् सुनिरीक्षितम् ।
अदृष्ट्वा तत्र तां बालामुद्विग्नोऽहं मनाग् हृदि ॥ ३८ ॥

वने पर्यट्य चूतं तं, प्रेक्षमाणः पुनः पुनः ।
यावत् तत्र निषण्णोऽहं, कुलन्धरसमन्वितः ॥ ३९ ॥

नार्येका मध्यमावस्था, तावद् दृष्टा सुविग्रहा ।
ततोऽभ्युत्थितमावाभ्यामुत्तमाङ्गं च नामितम् ॥ ४० ॥

प्रौढनार्या तया दृष्टः, सविशेषमहं तथा ।
प्रोक्तं वत्स ! चिरं जीव, त्वं ममापि प्रियायुषा ॥ ४१ ॥

उक्तः कुलध(न्ध)रोऽप्युच्चैर्दीर्घायुर्भवताद् भवान् ।
भवतोर्वाच्यमस्तीति, नृपपुत्रं निवेशय ॥ ४२ ॥

प्रपन्नं तद्वचस्तेन, निविष्टं निखिलैस्ततः ।
मामुद्दिश्याह सा वत्स !, शृणु चित्ते समाहितः ॥ ४३ ॥

अस्ति विद्याधरस्थानं, वैताढ्याख्यो महागिरिः ।
तत्र गन्धसमृद्धाख्यं पुरं सर्वसमृद्धिमत् ॥ ४४ ॥

शास्ति विद्याभृतां चक्री, तद्भूपः कनकोदरः ।
अहं तस्य महादेवी, वर्ते कामलताऽभिधा ॥ ४५ ॥

निरपत्यतया भूयान्, विषादोऽभवदावयोः ।
ग्रहशान्त्यादिविहितमुपचारशतं ततः ॥ ४६ ॥

मम प्रादुरभूद् गर्भस्ततो वयसि मध्यमे ।
प्रसूताऽहं सुतां देहद्युतिद्योतितदिग्मुखाम् ॥ ४७ ॥

जातो राज्ञो महान् तोषः, कारितश्चोत्सवो महान्।
कृतं तन्नाम मदनमञ्जरीति शुभे दिने ॥ ४८ ॥

वर्धिता सा सुखभरैर्जाता चित्तप्रमोदकृत्।
कलौघं ग्राहिता सार्द्धं, सख्या लवलिकाख्यया ॥ ४९ ॥

उद्यौवना कलारूपातिशयैर्न ममोचितः।
पुरुषोऽस्तीति बुद्ध्याऽभूत्, पुरुषद्वेषिणी ततः ॥ ५० ॥

ज्ञात्वा पुत्र्याः स्वरूपं तद्, विषण्णाऽहं भृशं हृदि।
मया निवेदितं राज्ञे, सोऽपि खेदमुपागतः ॥ ५१ ॥

सोऽकारयत् समुत्पन्नधीः स्वयंवरमण्डपम्।
सर्वे तेन समाहूता, विद्याधरनरेश्वराः ॥ ५२ ॥

आगत्य सर्वे सर्वर्द्ध्या, ते स्वयंवरमण्डपे।
यथास्थानं स्थिता मध्ये, राजाऽपि सपरिच्छदः ॥ ५३ ॥

प्रविष्टाऽहं गृहीत्वा तां, वत्सां मदनमञ्जरीम्।
तत्र प्रदर्शितास्तस्या, रूपतो गुणतश्च ते ॥ ५४ ॥

दृष्ट्वा सा तत्र निखिलान्, विद्याधरनरेश्वरान्।
न्यवारयत् घृणां धृत्वा, तन्मिथ्यागुणवर्णनम् ॥ ५५ ॥

जगौ च मातर्नैतेषु कोऽपि मे रोचते वरः।
तदाकर्ण्य विषण्णाऽहं, तद् भूपाय निवेदितम् ॥ ५६ ॥

विषण्णः सोऽपि मां प्राह, वत्सा वेश्मनि नीयताम्।
माऽस्या भूद् वपुरस्वास्थ्यं, चित्तदुःखोदयादिति ॥ ५७ ॥

निर्गताऽहं ततो लात्वा, तां स्वयंवरमण्डपात्।
प्राप्ता सा स्वीयभवनं, निषण्णाऽविरताग्रहा ॥ ५८ ॥

ततो लवलिका प्राह, मां मातः ! को भविष्यति।
अस्याः पाणिग्रहोपायो, मया प्रोक्तं न वेद्म्यहम् ॥ ५९ ॥

इयं तव प्रियसखी, नूनं दुष्करोचिका ।
प्रष्टव्या तद् भवत्यैव, पर्यालोचो हतोऽत्र नः ॥ ६० ॥

इत्युक्त्वा रोदितुं लग्ना, विकीर्णैरहमश्रुभिः ।
ततो लवलिका प्राह, विषादं स्वामिनि ! त्यज ॥ ६१ ॥

प्रश्नयिष्याम्यहमिमां, नेयं सन्तापकारिणी ।
पित्रोर्भविष्यतीत्येवं, मम स्वास्थ्यं कृतं तया ॥ ६२ ॥

इतश्च खेचरोर्वीशास्ते स्वयंवरमण्डपात् ।
दृष्ट्वाऽवृतवरामेव, गतां मदनमञ्जरीम् ॥ ६३ ॥

विलक्षा हृतसर्वस्वा, इव लोष्टुहता इव ।
कनकोदरराजेन्द्रं, रुषाऽसंभाष्य निर्गताः ॥ ६४ ॥

ततो राजा ययौ शोकं, लङ्घितं वर्षवद् दिनम् ।
सुप्तो रजन्यां नायाता, निद्रा दुःखेन केवलम् ॥ ६५ ॥

निद्रालवेऽथ गमितप्रायायामागते निशि ।
स्वप्ने चत्वारि सोऽपश्यद् द्वौ नरौ द्वे च योषितौ ॥ ६६ ॥

तैः प्रोक्तं मुञ्च खेदं त्वं, नरेन्द्र कनकोदर ! ।
वरो दृष्टचरोऽस्माभिस्तव पुत्र्या भविष्यति ॥ ६७ ॥

तवान्यान्वेषणेनालमियं नान्यवरोचिता ।
द्वेष्या अस्माभिरेवास्याः कृता विद्याभृतोऽखिलाः ॥ ६८ ॥

जातं प्रभातं स्वप्नार्थं, बुद्ध्वा स्वस्थोऽभवन्नृपः ।
अथापृच्छल्लवलिका, सखी मदनमञ्जरीम् ॥ ६९ ॥

अधुना वद किं कार्यं, सा प्राह पितरौ यदि ।
आज्ञां दत्तस्तदा भ्रान्त्वा, स्वयमेव वसुन्धराम् ॥ ७० ॥

वरं वृणोमि रुचितं, पूरयामि मनोरथम् ।
प्राह तन्मे लवलिका, मया राज्ञे निवेदितम् ॥ ७१ ॥

अनेन चिन्तितं चित्ते, वत्सया चारु मन्त्रितम् ।
लाभोपायो वरस्यायं, स्वप्नोक्तस्य भविष्यति ॥ ७२ ॥

साऽनुज्ञाता ततस्तेन, वरार्थं भूदिदृक्षया ।
गता लवलिकायुक्ता, व्यतीताः केऽपि वासराः ॥ ७३ ॥

अहं राजा च तत्स्नेहात्, स्थितौ सोन्माथकौ भृशम् ।
अत्रान्तरे लवलिका, सविषादा समागता ॥ ७४ ॥

एकाकिनीं विषण्णां च, तां दृष्ट्वा चित्तमावयोः ।
विषण्णं सा मया पृष्टा, भद्रे ! कुशलिनी सुता ॥ ७५ ॥

सा प्राह मातः ! कुशलं, सुतायास्तव विद्यते ।
संपन्नो यस्तु वृत्तान्तः, सर्वं तं कथयामि ते ॥ ७६ ॥

निर्गत्येतः किलावाभ्यां, प्रेक्षितं भूमिमण्डलम् ।
भूरिग्रामपुराकीर्णं, नानावृत्तांन्तसंकुलम् ॥ ७७ ॥

सप्रमोदपुरं प्राप्ते क्रमात् तत्र बहिर्वनम् ।
आह्लादमन्दिरं दृष्टं, स्थिते तस्योपरि क्षणम् ॥ ७८ ॥

सुकुमाराकृती तत्र, दृष्टौ राजसुतावुभौ ।
स्मरार्त्ताऽभूत् प्रियसखी, पश्यन्त्येकं तयोः पुनः ॥ ७९ ॥

अवतीर्य मया सार्धं, भूतले सा ततः स्थिता ।
तयोर्दृग्गोचरे चूतवने दूरस्थिते मनाक् ॥ ८० ॥

प्रेक्षमाणा नृपसुतं, तमेव चानिमेषदृग् ।
न्यस्ताऽब्जद्रोहिणी दृष्टिस्तस्यास्तेनापि सम्मुखम् ॥ ८१ ॥

ततः सा स्निग्धदृक् पीतचन्द्रिकेव चकोरिका ।
स्फुटामोदा विकसिता, पद्मिनीव रवेः करैः ॥ ८२ ॥

प्रनृत्यन्ती मयूरीव, पयोदप्रेक्षणोन्मदा ।
अमान्ती स्वान्तकल्लोलैस्तटिनीव रयोद्धता ॥ ८३ ॥

सा विस्मितसुधापूरैः, शुभ्रितद्रुमपल्लवा ।
मया रसान्तरे मग्ना, दृष्टा पश्यति वल्लभे ॥ ८४ ॥

ततस्तां तादृशीं प्रेक्ष्य, मया मनसि चिन्तितम् ।
तोषिताऽनेन यूनेयमहो दुष्कररोचिका ॥ ८५ ॥

सुभ्रुवो भ्रूविधानेऽस्या, भग्नचापोऽपि वेधसा ।
अहो अस्य गुणैरेव, हन्ति बालामिमां स्मरः ॥ ८६ ॥

आनुरूप्येण मिथुनमिदं धात्रैव योजितम् ।
सद्भावमीलनात् सिद्धमधुना नः समीहितम् ॥ ८७ ॥

संयोगमनयोर्युक्तं, विधाय कुरुतां विधिः ।
अयोग्ययोगजनितस्वकलङ्काघमार्जनम् ॥ ८८ ॥

अथ सार्द्धं वयस्येन, ततः स्थानाद् गतो युवा ।
ततः सा प्राप सङ्कोचं, गते सूर्य इवाब्जिनी ॥ ८९ ॥

गतरत्नेव जाता च, भृशं मनसि विह्वला ।
ततो मयोक्तं कः खेदो, यद्यसौ रुचितो वरः ॥ ९० ॥

समीपे गम्यतां भर्तृदारिके ! जनकाम्बयोः ।
तयोः स्वां रुचिमुद्भाव्य, त्वरया व्रियतामयम् ॥ ९१ ॥

सप्रमोदपुरेशस्य, मधुवारणभूभुजः ।
भविष्यत्येष तनयो, गुणैर्योग्यस्तवेदृशैः ॥ ९२ ॥

क्ष्माभृद्भिर्न यदाक्रान्तं, निखिलैरपि ते मनः ।
आक्रामन् दृक्त्रिभागेन, तदेष क्ष्माभृतां गुरुः ॥ ९३ ॥

तयोक्तं मे लवलिके ! रुचितोऽयं भृशं जनः ।
अहं तु रुचिता नास्मै, तूर्णं गच्छेत् कुतोऽन्यथा ॥ ९४ ॥

उन्मूलयति धैर्यं मे, स्नेहस्तेनैकपाक्षिकः ।
निर्भग्नैकतटः सिन्धुपूरः प्रान्तद्रुमं यथा ॥ ९५ ॥

मयोक्तमेवं मा वादीर्न स्वामिनि ! रुचिं विना ।
स स्यात् तव मुखज्योत्स्नापानलम्पटलोचनः ॥ ९६ ॥

रुचिताऽसि भृशं तस्य, शङ्कामपनयानघे ! ।
रोचते किं न भृङ्गाय, प्रफुल्ला मालती मधौ ॥ ९७ ॥

वैदग्ध्यादेव तूर्णं च, तेनापक्रमणं कृतम् ।
परिणामगुरुः स्नेहः, सतामापाततो लघुः ॥ ९८ ॥

इति मद्वचसा किञ्चित्, स्वस्थीभूताऽपि साऽब्रवीत् ।
सखि ! गन्तुं न शक्नोमि, वपुरस्वस्थमस्ति मे ॥ ९९ ॥

न मोक्तव्यं मयोद्यानमिदं ताताम्बयोर्वद ।
त्वं च वार्तामिमां तूर्णं, गत्वा तत्त्वार्थकोविदे ! ॥ १०० ॥

ततो मत्वाऽऽग्रहं तस्या, दुर्वारं विनिवेश्य ताम् ।
गुप्तद्रुमलतामध्ये, तल्पे पल्लवनिर्मिते ॥ १०१ ॥

आगताऽहमिहोत्पत्य, तमालश्यामलं नभः ।
देवोऽम्बा च तदत्रार्थे, प्रमाणं वाच्यमुत्तरम् ॥ १०२ ॥

ततो राज्ञोदितं देवि !, त्वं तावद् याहि सत्वरम् ।
वत्सां संधीरयैष्यामि, सामग्रीसम्पदा त्वहम् ॥ १०३ ॥

यन्मे मनोऽस्ति साशङ्कं, रुषा विद्याधरा गताः ।
तद्वृत्तान्तोपलम्भाय, प्रयुक्तश्चटुलो मया ॥ १०४ ॥

तेन सम्पादनं युक्तं, सामग्र्याः प्राभृतस्य च ।
वरयोग्यस्य तत् कालविलम्बो मे भविष्यति ॥ १०५ ॥

तत् तूर्णं देवि ! गच्छेति, धृत्वाऽऽज्ञां मूर्ध्नि तां प्रभोः ।
वेगादिमां लवलिकां, पुरस्कृत्याहमागता ॥ १०६ ॥

दृष्टा पल्लवतल्पे सा, स्थिता मदनमञ्जरी ।
तत्रैव किञ्चिद् ध्यायन्ती, योगिनीव वचोऽतिगम् ॥ १०७ ॥

ज्ञात्वा लवलिकावाचा, स्निग्धया लब्धचेतना ।
मामागतां समुत्थाय, पतिता मम पादयोः ॥ १०८ ॥

मया प्रोक्तं चिरं जीव, वत्से ! प्राप्नुहि वल्लभम् ।
मनोऽभिवाञ्छितं भुङ्क्ष्व, सुखानि सुभगा भव ॥ १०९ ॥

ततश्चोत्थाप्य साऽऽघ्राता, मूर्ध्न्युत्सङ्गे निवेशिता ।
उक्ता च खेदं मा कार्षीः, सिद्धं तव समीहितम् ॥ ११० ॥

त्वरां करोति सामग्र्याः, कार्येऽत्र जनकस्तव ।
तत् श्रुत्वेयत् क्व मे भाग्यमित्युक्त्वा न्यग्मुखी स्थिता ॥ १११ ॥

अत्रान्तरे गतो भानुरस्तमुल्लसितं तमः ।
प्रक्षालितनभोमार्गा, चन्द्रज्योत्स्ना च पप्रथे ॥ ११२ ॥

विनोद्य तां विचित्राभिः, कथाभिर्गमिता ततः ।
कृच्छ्रान्निशोदिते सूर्ये, प्रोक्ता लवलिका मया ॥ ११३ ॥

निरूपय निजस्वामिमार्गं स्थित्वा विहायसि ।
चिरयत्येष किं सोर्ध्वं, तथेत्युक्त्वा स्थिताऽम्बरे ॥ ११४ ॥

स्थित्वा च क्षणमात्रं सा, समुत्तीर्णा प्रमोदभाग् ।
मयोक्तं किं सहर्षाऽसि, किं स्वामी ते समागतः ॥ ११५ ॥

अनया प्रोक्तमद्यापि, स्वामी नो न समागतः ।
किन्त्वागतौ राजसुतौ, तौ द्रष्टुं भर्तृदारिकाम् ॥ ११६ ॥

निरीक्षितं वनं ताभ्यां, न दृष्टा भर्तृदारिका।
ततो विषण्णस्तत्प्रेयान्, द्वितीयेनेति भाषितः ॥ ११७ ॥

स्थेयं चूतवने तत्र, कुमार गुणधारण ! ।
सा सुभ्रूर्यत्र दृष्टाऽऽसीदन्यत्र भ्रमणेन किम् ॥ ११८ ॥

कदाचिद् दैवयोगेन, सा तत्रैवोपलभ्यते ।
एवमस्त्विति तेनोक्ते, तं देशं तौ प्रजग्मतुः ॥ ११९ ॥

ततोऽहं मुदिताऽस्मीति, सा निशम्यापि तद्वचः ।
प्रत्यायिताऽपि शपथैः, प्रत्ययं न दधौ हृदि ॥ १२० ॥

मया प्रोक्तं लवलिके !, कुमारं मे प्रदर्शय ।
येन स्वयं तमानीय, वत्सामाह्लादयाम्यहम् ॥ १२१ ॥

ततस्तयाऽहमानीता, कुमार ! तव सन्निधौ ।
तदुत्थाय कुमारस्तां, दुःखार्तां द्रष्टुमर्हति ॥ १२२ ॥

कुलन्धरस्य वदनं, मया संप्रेक्षितं ततः ।
तेनोक्तं गम्यतामत्र, किं कुमार ! विरुध्यते ॥ १२३ ॥

ततोऽस्माभिर्गतं तत्र, सा दृष्टोद्दिष्टलक्षणा ।
जातः सुखामृते मग्नस्तद्दर्शनरसादहम् ॥ १२४ ॥

प्राप्तः प्रेयान् स एवायमिति हृष्टाऽवलोक्य माम् ।
उत्का चिराद् दृष्ट इति, क्वागच्छेदिति तर्कभाग् ॥ १२५ ॥

स्वप्नोऽयं प्रत्यय इति, सविषादा स्थिरत्वतः ।
सनिर्णया वियोगेऽपि, जीवितेत्युदितत्रपा ॥ १२६ ॥

प्रपत्स्यते कथमसौ, मामित्युद्वेगपूरिता ।
प्रेक्षते मामयमिति, सविकारा च साऽभवत् ॥ १२७ ॥

अनेकभावसंकीर्णरसनिर्मग्नमानसा ।
सा वीक्षिता मया स्निग्धलोललोचनपङ्कजा ॥ १२८ ॥

ततः सा कामलतया, प्रोक्ता ते प्रत्ययोऽजनि ।
वत्से ! लवलिकावाक्ये, स्मित्वाऽथाधोमुखी स्थिता ॥ १२९ ॥

जातः प्रमोदः सर्वेषामागतोऽत्रान्तरे नृपः ।
स्फुरद्रत्नप्रभाजालैर्भूरिविद्याधरैर्युतः ॥ १३० ॥

आह्लादमन्दिरोद्यानमवतीर्य नभस्तलात् ।
रत्नैर्भृतविमानौघः, सानन्दः कनकोदरः ॥ १३१ ॥

कृतमस्माभिरुत्थानं, प्रतिपत्तिः कृतोचिता ।
स्थिताः सर्वे यथास्थानं, तेनाहं वीक्षितश्चिरम् ॥ १३२ ॥

निश्चितश्च स एवायमित्यथानन्दशालिना ।
पृष्टा कामलता साऽऽख्यद्, वृत्तान्तं निखिलं मम ॥ १३३ ॥

ईदृशे नररत्ने या, निर्बबन्ध मनस्तया ।
स्वाग्रहो देवि ! निर्व्यूढः, प्राहेति कनकोदरः ॥ १३४ ॥

ततः कामलता प्राह, सत्यमेतन्न संशयः ।
कदापि किं कामयते, शक्रादन्यं पुलोमजा ॥ १३५ ॥

अत्रान्तरे समागत्य, चटुलेन निवेदितम् ।
कनकोदरभूपस्य, कर्णे किमपि धीमता ॥ १३६ ॥

ततो विलम्बेन कृतमिति कामलतां प्रति ।
वदन् मदनमञ्जर्या, विवाहं कनकोदरः ॥ १३७ ॥

अकारयन्मां संक्षेपात्, स्थाने तत्रैव पावने ।
अदर्शयद् विमानौघं, नानारत्नभृतं ततः ॥ १३८ ॥

कुलन्धराय प्रोचेऽमून्, रत्नपूगानिहानयम् ।
राजपुत्रस्य कोशार्थं, तदेतान् स्वीकरोत्वसौ ॥ १३९ ॥

स प्राह यूयमेवात्र, प्रमाणं प्रश्न एष कः ।
तान् दत्त्वा प्रययौ तोषं, राजाऽथ कनकोदरः ॥ १४० ॥

हृष्टा कामलता बाढं, चिन्तासन्तापशान्तितः ।
प्रीतो लवलिकादिश्च, परिवारोऽखिलस्तदा ॥ १४१ ॥

अहं मदनमञ्जर्या, रत्नपूगाढ्यया तया ।
शोभां रविरिव प्राप्तो, धामाढ्यदिवसश्रिया ॥ १४२ ॥

अत्रान्तरे महामेघनिकुरम्बमिवाग्रतः ।
विद्याधरबलं दूरादागच्छद् व्योम्नि वीक्षितम् ॥ १४३ ॥

कुन्ततूणीरचक्रासिशक्तिनाराचतोमरैः ।
शूलप्रासधनुर्दण्डगदाभिश्च भयानकम् ॥ १४४ ॥

सिंहनादमहोत्कृष्टिध्वानैर्मुखरिताम्बरम् ।
कृताद्भुतं महायोधैर्मूर्तैः शौर्यरसैरिव ॥ १४५ ॥

स्मयमानमिव प्रेङ्खत्प्रभाजालैर्मदोद्धुरम् ।
तत्क्षणेनागतं पार्श्वे, दृष्टमस्माभिरुन्मुखैः ॥ १४६ ॥

ततो विद्याधरान् प्राह, स्वकीयान् कनकोदरः ।
सज्जीभवत सर्वेऽपि, चटुलोक्तमभूत् स्फुटम् ॥ १४७ ॥

मण्डपान्मामसंभाष्य, पूर्वं ये निर्गता रुषा ।
ज्ञात्वाऽऽगताः सुतां दत्तां, किञ्चिदालोच्य ते मिथः ॥ १४८ ॥

इदमेषामभिप्रेतं, यदयं गुणधारणः ।
हीनो न भूचरोऽस्मत्तः, कन्यां स्वीकर्तुमर्हति ॥ १४९ ॥

खगानिव खगानेतान्, भूचरस्योपजीविनः ।
निरस्य मानमेतेषां, तद् यूयं हन्तुमर्हथ ॥ १५० ॥

आकर्ण्य रणकण्डूलभुजास्तत् स्वामिनो वचः ।
नभश्चरा व्यवसितास्तेऽथोत्पतितुमम्बरे ॥ १५१ ॥

अत्रान्तरे मयाऽचिन्ति, चारु नेदमजायत ।
यतोऽत्र प्रलयोऽमीषां, मम हेतोर्भविष्यति ॥ १५२ ॥

स्तम्भितं तद्बलद्वन्द्वं, तदानीमेव केनचित् ।
उत्ताननेत्रमूर्द्धाधश्चित्रन्यस्तमिव स्थितम् ॥ १५३ ॥

निर्व्यापारं निराटोपं, ददृशे तद् बलद्वयम् ।
मनःखेदात् कुमारस्य, द्विधाभूतमिवाम्बरम् ॥ १५४ ॥

तेषामथ नभःस्थानामहं दृग्गोचरं गतः ।
सार्द्धं मदनमञ्जर्या, निविष्टो विष्टरे सुखम् ॥ १५५ ॥

ततो मां प्रेक्ष्य तैर्ध्यातमहो रूपमहो गुणाः ।
अहो नरोत्तमस्यास्य, माहात्म्यं वाक्पथातिगम् ॥ १५६ ॥

अहो मदनमञ्जर्याः, सुसमीक्षितकारिता ।
वृतोऽयमीदृशो भर्ता, यया सौभाग्यभाग्यभूः ॥ १५७ ॥

अनेन स्तम्भिता नूनं, वयं स्वीयेन तेजसा ।
सह मित्रेण पत्न्या च, स्वयं यन्मुत्कलोऽस्त्ययम् ॥ १५८ ॥

तद् दुष्टु कृतमस्माभिरीदृशो यन्नरोत्तमः ।
जिघांसित इतो जाड्यात्, स्तम्भोऽस्माकं न नोचितः ॥ १५९ ॥

अतः परमयं स्वामी, वयं चास्य पदातयः ।
ध्यायन्त इति ते चित्ते, केनचिन्मुत्कलीकृताः ॥ १६० ॥

लग्नास्ते खेचरास्तूर्णमागत्य मम पादयोः ।
रणार्थः पर्यवसितस्तदुत्साहो मम स्तवे ॥ १६१ ॥

उक्तस्तैरहमस्माकं, क्षन्तव्यं दुष्कृतं त्वया ।
वयं जाता गुणक्रीता, नाथ! भृत्यास्तवाधुना ॥ १६२ ॥

ततोऽभूत् तेषु कनकोदरो विगतमत्सरः ।
जातश्च मुत्कलः सर्वैरन्योन्यं क्षमितं ततः ॥ १६३ ॥

सर्वे प्रमुदिता जाताः, खेचरा बान्धवाधिकाः ।
वार्तां श्रुत्वाऽऽगतस्तत्र, तों राजा मधुवारणः ॥ १६४ ॥

अम्बा चान्तःपुरैः सार्द्धं, शेषा अप्यागता जनाः ।
ततः पितृपदद्वन्द्वं, मयाऽन्यैश्च नृपैर्नतम् ॥ १६५ ॥

समं मदनमञ्जर्या, माताऽपि प्रणता मया ।
अन्येऽपि लोका विधिना, यथार्हं बहुमानिताः ॥ १६६ ॥

आलिङ्गितोऽहं तातेन, हर्षाश्रुप्लुतचक्षुषा ।
कुलन्धरेण वृत्तान्तः, सर्वोऽप्यस्मै निवेदितः ॥ १६७ ॥

सर्वेऽपि खेचराः प्रोचुस्तातस्याग्रे सुतस्तव ।
धन्योऽयं वरवीर्योऽयं, पूताऽनेन वसुन्धरा ॥ १६८ ॥

अयं जीवितदोऽस्माकं, देवोऽयं गुरुरेष नः ।
इत्यम्बरचरस्तुत्या, मुदितौ पितरौ मम ॥ १६९ ॥

अथ सर्वे प्रमोदेन, सप्रमोदपुरेऽविशन् ।
तातेनाह्लादितोऽत्यन्तं, सबन्धुः कनकोदरः ॥ १७० ॥

सर्वे विद्याधरास्तुष्टाः, प्रहृष्टा नगरी जनैः ।
अनिर्वाच्यसुखोत्कर्षं, तद्दिनं मम लङ्घितम् ॥ १७१ ॥

प्रियाया रत्नराशेश्च, लाभात् प्रत्यर्थिभङ्गतः ।
ताताम्बाचित्ततोषाच्च, मुदितोऽहं भृशं हृदि ॥ १७२ ॥

समं मदनमञ्जर्या, स्थितोऽहं वाससद्मनि ।
तत्रानुभूतवान् रात्रौ, रतोत्सवसुखं महत् ॥ १७३ ॥

अत्यन्ताबाधितस्वान्तः, केवलं लौल्यहानितः ।
लब्धनिद्रासुखः प्राप्तः, प्रबुद्धः प्रियया सह ॥ १७४ ॥

कृतं प्राभातिकं कृत्यं, ताताम्बानमनादिकम् ।
सन्निधानमथायातो, मित्रं मम कुलन्धरः ॥ १७५ ॥

मां प्रत्यभिहितं तेन, निराकुलहृदा मया ।
त्रयः पुमांसो द्वे नार्यावद्य स्वप्ने निरीक्षिताः ॥ १७६ ॥

तैरुक्तं विहितोऽस्माभिः, सुखौघो गुणधारणे ।
शुभमस्याखिलं कुर्मो, वयमेव कुलन्धर ! ॥ १७७ ॥

तिरोबभूवुरित्युक्त्वा, मानुषाणि ममाग्रतः ।
तानि कानीति नो विद्मः, कार्यं कुर्वन्ति यानि ते ॥ १७८ ॥

मयोक्तं जनकादीनां, स्वप्न एष निवेद्यताम् ।
व्यक्तो यथा स्याद् भावार्थस्तेनोक्तस्तातपर्षदि ॥ १७९ ॥

उक्तस्तदर्थस्ताताद्यैरेकवाक्यतया ततः ।
कुमारस्यानुकूलानि, देवरूपाणि कानिचित् ॥ १८० ॥

ईदृशी यैः कुमारस्य, कृता कल्याणधोरणी ।
यैश्चास्य प्रियमित्रस्य, स्वप्ने सर्वं निवेदितम् ॥ १८१ ॥

निशम्य तत् कामलतावचनं च स्मरन्नहम् ।
सन्देहदोलामारूढः, स्वीयचित्ते व्यचिन्तयम् ॥ १८२ ॥

चत्वारि मानुषाणि प्राक्, किं नृपः कनकोदरः ।
किं वा कुलन्धरस्तानि, स्वप्ने पश्चाद्य दृष्टवान् ॥ १८३ ॥

कानि वा देवरूपाणि, मम कार्याणि कुर्वते ।
किं च कारणमाश्रित्य, सर्वथा गहनं ह्यदः ॥ १८४ ॥

अतीन्द्रियज्ञं साधुं चेत्, प्रेक्षे कुर्वेऽत्र निर्णयम् ।
मयेदृक्संशयेनापि, ताताद्युक्तं न दूषितम् ॥ १८५ ॥

अथ ते खेचराः सर्वे, कनकोदरसंयुताः ।
मुदिताः कतिचित् स्थित्वा, दिनानि मम मन्दिरे ॥ १८६ ॥

मद्भृत्यभावमादृत्य, गताः स्वस्थानमन्यदा ।
सुखं तदुपनीतं मे, पूर्णकाममवर्धत ॥ १८७ ॥

सार्धं मदनमञ्जर्या, कौमुद्येवामृतद्युतिः ।
लौल्यतापोज्झितः सौख्यं, भुञ्जानोऽहं स्थितोऽतुलम् ॥ १८८ ॥

अन्यदा सुहृदा युक्तस्तत्रैवाह्लादमन्दिरे ।
अद्राक्षं कन्दनामानं, सभार्योऽहं मुनीश्वरम् ॥ १८९ ॥

तं प्रणम्य निषण्णोऽहं, तस्याग्रे शुद्धभूतले ।
विहिता तेन सद्धर्मदेशनाऽऽह्लाददायिनी ॥ १९० ॥

पुनस्तदाऽऽगतौ तौ मे, बान्धवौ लक्षितौ मया ।
सदागमोऽयमेषोऽत्र, सम्यग्दर्शननामकः ॥ १९१ ॥

गुरुवाक्यप्रबुद्धेन, तौ मया हितकारिणौ ।
बुद्धौ सातनरेन्द्रेण, तदा मयि विजृम्भितम् ॥ १९२ ॥

अभूद् यो मयि रक्तात्मा, सत्पुरे विबुधालये ।
विललास मया सार्द्धं, सप्रमोदपुरे च यः ॥ १९३ ॥

स हि पूर्वं तिरोभूत्:, प्राग् ददौ मे सुखासिकाम् ।
आविर्भूतस्तदाऽभूत् तावागतौ बान्धवौ यदा ॥ १९४ ॥

सत्कान्तारत्नपूगादिलाभात् याऽभूत् सुखासिका ।
ततोऽनन्तगुणा जाता, गुरुवाक्यश्रुतौ मम ॥ १९५ ॥

तदा कुलन्धरेणापि, महत्तमसदागमौ ।
तया मदनमञ्जर्या, प्रपन्नौ मुनिसन्निधौ ॥ १९६ ॥

विशिष्य देशनां चक्रे, ततस्तुष्टोऽधिकं मुनिः ।
चित्तवृत्तौ ततो भीता, मोहाद्या रोधकं जहुः ॥ १९७ ॥

चारित्रधर्मराजेन, सद्बोधः सचिवस्तदा ।
उक्तः संप्रति शुभ्राऽभूत्, चित्तवृत्तिमहाटवी ॥ १९८ ॥

ईषद्दूरे च रिपवः, सन्ति संत्यक्तरोधकाः ।
संसारिजीवसविधे, विद्यामादाय तद् व्रज ॥ १९९ ॥

उपकन्दमुनिं ज्ञातः, स्थितः स च चरैर्मया ।
तत्रावश्यं भवन्तं च, स्नेहेन प्रतिपत्स्यते ॥ २०० ॥

सद्बोधः प्राह राजेन्द्र !, युक्तमुक्तमिदं त्वया ।
अत्र प्रयोजनेऽद्यापि, विलम्बः किन्तु युज्यते ॥ २०१ ॥

स हि पुण्योदयस्तस्य, स च साताभिधः सुहृत् ।
कियन्तमपि कालं स्तो, भूरिभोगफलावहौ ॥ २०२ ॥

यावत् तदनुवृत्त्याऽयमध्यास्ते भोगभाग् गृहम् ।
तावन्न मे सविद्यस्य, युक्तं गन्तुं तदन्तिके ॥ २०३ ॥

धर्मादपि भवन् भोगो, रुणद्धि चरणागमम् ।
चन्दनैरपि संछन्नो, मार्गो भवति दुर्गमः ॥ २०४ ॥

केवलं प्रेष्यतां तस्य, पार्श्वेऽसौ स्वसुतः प्रभो ! ।
गृहिधर्मः सभार्यस्तत्प्रस्तावोऽस्त्यधुना शुभः ॥ २०५ ॥

इमं देव ! स भावेन, गतमात्रं प्रपत्स्यते ।
इष्टा भवित्री तस्यास्य, कान्ता सद्गुणरक्तता ॥ २०६ ॥

सदागमस्य सान्निध्यात्, द्रव्यतोऽनन्तशोऽमुना ।
असौ प्राप्तो यदा त्वस्य, गतः पार्श्वं महत्तमः ॥ २०७ ॥

तदा तेनाप्ययं नीतो, वात्सल्यातिशयात् सह ।
पल्योपमपृथक्त्वे तु, गते प्राप्तः स भावतः ॥ २०८ ॥

ततो यदा यदा दृष्टौ, महत्तमसदागमौ ।
असंख्यवारास्तेनैष, भावेनाप्तस्तदा तदा ॥ २०९ ॥

अधुना तस्य पार्श्वे स्तो, महत्तमसदागमौ ।
प्रहीयतां विशेषेण, तत्पार्श्वे तदसौ द्रुतम् ॥ २१० ॥

कर्मह्रासो मनःशुद्धिर्गुर्वी चैव सुखासिका ।
तस्यास्मदाभिमुख्यं च, स्याद् विशिष्यास्य संस्तवात् ॥ २११ ॥

प्रस्थाप्यतां ततस्तस्य, गृहिधर्मोऽयमन्तिके ।
यास्यामि पश्चात् प्रस्तावं, मत्वाऽहं विद्ययाऽन्वितः ॥ २१२ ॥

मन्त्रिणो वचनं श्रुत्वा, तदिदं नीतिनिर्मलम् ।
चारित्रधर्मराजेन्द्रः, प्रजिघाय सुतं निजम् ॥ २१३ ॥

आपृच्छ्य स ततः कर्मपरिणाममहीभुजम् ।
मदन्तिके समायातस्तत्रैवाह्लादमन्दिरे ॥ २१४ ॥

आविर्भूतो ममाग्रेऽसौ, शृण्वतः कन्ददेशनाम् ।
प्रकाशितश्च तेनापि, श्रितो बन्धुधिया मया ॥ २१५ ॥

गुणरक्ततया युक्तस्तथा, द्वादशमानुषैः ।
कुलन्धरेण स श्राद्धधर्मः पत्न्या च मे श्रितः ॥ २१६ ॥

मया पृष्टो मुनीन्द्रोऽथ, कन्दः स्वप्नार्थसंशयम् ।
स प्राह निर्णयो न स्यादस्यातिशयिनं विना ॥ २१७ ॥

सर्वज्ञा गुरवः सन्ति, दूरे मे निर्मलाभिधाः ।
तान् वन्दिष्ये यदा तेऽमुं, तदा प्रक्ष्यामि संशयम् ॥ २१८ ॥

संशयो हृदि ते जातो, योऽयं स्वप्नद्वयाध्वना ।
एकमार्गप्रणाल्या तं, ते छेत्स्यन्ति महाधियः ॥ २१९ ॥

मया प्रोक्तं कथञ्चित् ते, भदन्त ! गुरवो यदि ।
अत्रायान्ति भवेत् तर्हि, शोभनादपि शोभनम् ॥ २२० ॥

मुनिराह महाभाग ! गतोऽहं गुरुसन्निधौ ।
विज्ञप्य त्वद्गिरा तांस्ते, पूरयिष्यामि कामितम् ॥ २२१ ॥

ज्ञात्वाऽत्र ते भवद्भावमेष्यन्ति स्वयमेव वा ।
सम्यक्त्वसहितः पाल्यो, गृहिधर्मस्त्वया परम् ॥ २२२ ॥

इदं कन्दमुनेर्वाक्यं, श्रुत्वा तच्छासनस्थितः ।
समित्रश्च सभार्यश्च, तं नत्वाऽहं गृहं गतः ॥ २२३ ॥

ततः सोऽपि मुनिर्युक्तो, मुनिभिर्गुरुसन्निधौ ।
प्रययावुपविन्ध्याद्रि, करीव कलभान्वितः ॥ २२४ ॥

अथ लोकान्तरीभूतः, पिता मे मधुवारणः ।
ततो राज्येऽभिषिक्तोऽहं, बन्धुमन्त्रिमहत्तमैः ॥ २२५ ॥

उज्ज्वलैरपि रक्ताऽभूद्, गुणैर्मम नृपावलिः ।
मरुद्भिरपि सद्भक्तिस्थैर्यं मयि समाहृतम् ॥ २२६ ॥

न नामितं क्वचिच्चापं, कृता भ्रूनैव भङ्गुरा ।
तथापि मां नताः सर्वे, शत्रवो भयभङ्गुराः ॥ २२७ ॥

एकच्छत्रमभूद् राज्यं, परच्छत्रहृतेर्मम ।
तथाऽपि विपुला च्छाया, चित्रं जगति पप्रथे ॥ २२८ ॥

तथाविधेऽपि साम्राज्ये, प्रक्षुब्धं नैव मे मनः ।
पुण्योदयस्य माहात्म्यात्, किन्तु बाढं धृतिं दधौ ॥ २२९ ॥

बिभ्रतः शुचि सम्यक्त्वमुद्युक्तस्य सदागमे ।
गृहिधर्मादरभृतः, साताह्लादितचेतसः ॥ २३० ॥

पुण्योदयपवित्रस्य, मग्नस्यानन्दसागरे ।
सुशीलपरिवारस्य, कालो भूयान् गतो मम ॥ २३१ ॥

कल्याणो नाम कल्याणीभक्तिर्मां प्रियदारकः ।
अन्यदा प्रणिपत्यैवमास्थानस्थं व्यजिज्ञपत् ॥ २३२ ॥

आह्लादमन्दिरे देव !, देवदानवमानवैः ।
पूजिता निर्मलाचार्या, महाभागाः समागताः ॥ २३३ ॥

श्रुत्वा कल्याणवचनं, तन्मुदो मम नो ममुः ।
चित्ते बहिस्ताः प्रसृताः, प्रसादव्यपदेशतः ॥ २३४ ॥

ततोऽङ्गलग्नभूषादियुक्तं तस्मै समर्पितम् ।
दीनाराणां मया लक्षं, तुष्टेन प्रियभाषिणे ॥ २३५ ॥

ततः सर्वसमृद्ध्याऽहं, सवयस्यः सभार्यकः ।
नगरान्निर्गतः सूरिपदवन्दनहेतवे ॥ २३६ ॥

अथ दृष्टा सुरकृतस्वर्णाम्भोजस्थिता मया ।
सूरयो देशनोद्युक्ता, मुनिवृन्देन वेष्टिताः ॥ २३७ ॥

ततस्त्यक्तासिकोटीरचामरच्छत्रवाहनः ।
अहं कृतोत्तरासङ्गः, प्रविष्टस्तदवग्रहे ॥ २३८ ॥

दत्त्वा भगवतः सम्यग्, द्वादशावर्तवन्दनम् ।
मुनीन् यथाक्रमं नत्वाऽशेषान् लब्ध्वा तदाशिषः ॥ २३९ ॥

निषण्णो भूतले शुद्धे, प्रीतोऽहं सपरिच्छदः ।
देशनाऽऽरम्भि गुरुणा, ततः कर्मविषापहा ॥ २४० ॥

भवाम्भोधौ महोद्दामदुःखकल्लोलभीषणे ।
भो भव्याः ! शरणं धर्मं, विनाऽन्यन्नास्ति देहिनाम् ॥ २४१ ॥

संयोगा विप्रयोगान्ता, विपदन्ताश्च सम्पदः ।
जरान्तं चारु तारुण्यं, किं पर्यन्तसुखे भवे ॥ २४२ ॥

भवे यन्मधुलिप्तासिधारास्वादसमं सुखम् ।
तत्रास्था धीमतः कस्य, युज्यते दुःखमिश्रिते ॥ २४३ ॥

सर्वद्वन्द्वविमुक्तानां, सिद्धानामेव तात्त्विकम् ।
संसिद्धसर्वकार्याणां, निर्द्वन्द्वं वर्तते सुखम् ॥ २४४ ॥

जन्माभावे जरामृत्योरभावो हेत्वभावतः ।
तदभावे च सिद्धानां, सर्वदुःखक्षयात् सुखम् ॥ २४५ ॥

वृत्तिभ्यां देहमनसोर्दुःखे शारीरमानसे ।
भवतस्तदभावाच्च, सिद्धौ सिद्धं महासुखम् ॥ २४६ ॥

त्यक्तबाह्यान्तरग्रन्थैरथवा लभ्यते सुखम् ।
तात्त्विकं मुनिभिः शान्तैर्विरक्तेर्भवचारकात् ॥ २४७ ॥

सुखिनो विषयातृप्ता, नेन्द्रोपेन्द्रादयोऽप्यहो ।
भिक्षुरेकः सुखी लोके, ज्ञानतृप्तो निरञ्जनः ॥ २४८ ॥

सर्वे दुःखद्विषो जीवाः, सर्वे च सुखकाङ्क्षिणः ।
न विना साधुतां हन्त, सुखदुःखक्षयौ पुनः ॥ २४९ ॥

निश्चित्य तदिदं तत्त्वं, संसारं प्रविहाय भोः ! ।
विधीयतां महासत्त्वा ! भवद्भिः साधु साधुता ॥ २५० ॥

इदं मे भगवद्वाक्यं, रुचितं लघुकर्मणः ।
कुर्वे भगवदादिष्टमिति चित्ते च चिन्तितम् ॥ २५१ ॥

सूरीन्द्रे देशनां दत्त्वा, विरतेऽत्रान्तरे मुनिः ।
कन्दनामाऽऽह भगवन् !, विलम्बः कस्य नोचितः ॥ २५२ ॥

भगवानाह जिज्ञासोः, सशङ्कस्यान्तिके गुरोः ।
कन्दः प्राह तदा शङ्कां, भूभुजश्छेत्तुमर्हथ ॥ २५३ ॥

भगवानाह साधूक्तं, मया प्रोक्तं मुनिं प्रति ।
भदन्तानुगृहीतोऽहमेवं प्रश्नयता त्वया ॥ २५४ ॥

ततः कन्दमुनिः प्राह, योग्या यूयमनुग्रहे ।
भगवद्वचनं रुच्यमाकर्णयत सम्प्रति ॥ २५५ ॥

अहं नतोत्तमाङ्गः सन्, स्थितः प्रह्वतरस्ततः ।
भगवानाह सन्देहस्तवायं गुणधारण ! ॥ २५६ ॥

स्वप्ने दृष्टानि चत्वारि, कनकोदरभूभुजा ।
कुलन्धरेण पञ्चैव, मानुषाणीति का भिदा ॥ २५७ ॥

कानि तानि किमर्थं वा, मम कार्याणि कुर्वते ।
किं तानि देवरूपाणि, किं वा स्वप्नद्वयं मृषा ॥ २५८ ॥

महत्यस्ति कथा तत्र, कथं सर्वा निवेद्यताम् ।
मयोक्तं कथयन्त्वल्पां, भगवन्तो हिताय मे ॥ २५९ ॥

ततः संक्षेपतः प्रोक्ता, मम वक्तव्यताऽखिला ।
आरभ्याव्यवहाराख्यान्नगरात् सर्ववेदिना ॥ २६० ॥

उक्तं च फलितं तेन, महामोहादिभिस्तव ।
राज्यमुद्दालितं ह्यासीदियन्तं कालमान्तरम् ॥ २६१ ॥

चारित्रधर्मराजाद्या, हितास्तैश्च बहिष्कृताः ।
त्वत्प्रतीपोऽतनोत् कर्मपरिणामोऽपि तद्बलम् ॥ २६२ ॥

अधुना चानुकूल्यं ते, सार्वभौमः करोत्यसौ ।
तेनैव च कृता कालपरिणत्यृजुता त्वयि ॥ २६३ ॥

प्रसादिता च तेनैव, भार्या ते भवितव्यता ।
प्रह्वीकृतोऽङ्गभूतस्ते, स्वभावः स्वमहत्तमः ॥ २६४ ॥

प्रोत्साहितः सहचरस्तव पुण्योदयस्तथा ।
आश्वासिताश्चारित्राद्या, मोहाद्याश्चावधीरिताः ॥ २६५ ॥

यतः प्रभृति जातौ ते, महत्तमसदागमौ ।
बान्धवौ तत आरभ्यानुकूलस्त्वय्ययं नृपः ॥ २६६ ॥

ततस्तेन सुखश्रेणी, दत्ता ते विबुधालये ।
प्रोत्साहितोऽधुनाऽप्येष, सुहृत् पुण्योदयस्तव ॥ २६७ ॥

तेन संपादिता बाह्या, भार्या मदनसुन्दरी ।
तेनैव दर्शितः स्वप्नः, कनकोदरभूभुजः ॥ २६८ ॥

वरो मदनमञ्जर्या, दृष्टोऽस्माभिस्तवात्र का ।
चिन्तेति तत्र यत् प्रोचे, मानुषाणां चतुष्टयम् ॥ २६९ ॥

तत् कर्मपरिणामादिरूपं तेन प्रकाशितम् ।
गोपितं स्वस्य माहात्म्यं, गाम्भीर्यात् पुनरात्मना ॥ २७० ॥

विद्याधरेषु वैमुख्यं, तस्या यज्जनितं स्वयम् ।
तन्मुखेनैव तदपि, प्राकाशयदयं कृती ॥ २७१ ॥

ततोऽसौ भाषितः कर्मपरिणामेन भूभुजा ।
स्वात्मा यद्गोपितश्चारु, पुण्योदय ! न तत् कृतम् ॥ २७२ ॥

त्वां विना सुन्दरं कार्यं, न वयं कर्तुमीश्महे ।
प्रकाशनीयस्तेनात्मा, नान्यथा नः सुखं भवेत् ॥ २७३ ॥

तदाज्ञपारतन्त्र्येण, स्वात्मान्तर्भावतस्ततः ।
कुलन्धराय पञ्चासौ, मानुषाणि न्यरूपयत् ॥ २७४ ॥

इदं तेषां चतुर्णां च, पञ्चानां च प्रदर्शने ।
कारणं तत्र सन्देहं, मा कार्षीर्गुणधारण ! ॥ २७५ ॥

मयोक्तं भगवन्नारात्, प्रियालाभान्ममाखिलः ।
सुखावगाहः किं पुण्योदयेनैव विनिर्मितः ॥ २७६ ॥

भगवानाह विहितं, न केवलमियत् तव ।
पुण्योदयेन कार्याणि, भूयांसि तव चक्रिरे ॥ २७७ ॥

समं कनकमञ्जर्या, नन्दिवर्धनजन्मनि ।
योगस्ते जनितोऽनेन, प्रेमाम्बुधिविधूदयः ॥ २७८ ॥

रिपुदारणकाले च, लम्भिता नरसुन्दरी ।
वामदेवदशायां च, विमलस्ते सुहृत् कृतः ॥ २७९ ॥

धनशेखरकाले च, प्रापिता रत्नराशयः ।
प्रदत्तं च महाराज्यं घनवाहनजन्मनि ॥ २८० ॥

अकृत्रिमोऽकलङ्कस्य, स्नेहश्चोत्पादितस्त्वयि ।
सर्वस्थाने सुखं दत्तं, न ज्ञातोऽयं परं त्वया ॥ २८१ ॥

निःशेषदोषपुञ्जेषु, हिंसावैश्वानरादिषु ।
आरोपितो गुणव्यूहो, भवता मूढचेतसा ॥ २८२ ॥

मयोक्तं नाथ ! यद्येवं, मम पुण्योदयः सुहृत् ।
प्रागप्यासीत् तदेतावद्दिनदुःखमभूत् कुतः ॥ २८३ ॥

भगवानाह नित्यं ते, चित्तवृत्तौ बलद्वयम् ।
अस्ति चारित्रधर्माद्यं, तथा मोहनृपादिकम् ॥ २८४ ॥

तत्र साधारणः कर्मपरिणामो बलद्वये ।
बलवृद्धिकरस्तत्तदुदयापेक्षलक्षणः ॥ २८५ ॥

तस्य सेनापती द्वौ स्तः, पापपुण्योदयाभिधौ ।
प्रतिकूलः स्वभावेन, तत्र पापोदयस्तव ॥ २८६ ॥

यत् कर्मपरिणामस्य, सैन्यं विद्वेषि ते दृढम् ।
तदेवाधिकरोत्येष, हितः पुण्योदयस्तु ते ॥ २८७ ॥

यत् कर्मपरिणामस्य, सैन्यं ते बान्धवाधिकम् ।
तदेवाधिकरोत्येष, पूर्णिमाविधुनिर्मलः ॥ २८८ ॥

क्वचिदेव ददौ पुण्योदयं च भवितव्यता ।
स च पापोदयोऽनादिरूढस्त्वामन्ववर्तत ॥ २८९ ॥

अनन्तकालभ्रमणदुःखं तेन व्यधायि ते ।
हिंसादिषु हितत्वं च, तेनैव परिकल्पितम् ॥ २९० ॥

पुण्योदयश्च तद्दोषाद्, हितकारी न लक्षितः ।
तेनैव चित्तवृत्तेस्त्वं, महाराज्याद् बहिष्कृतः ॥ २९१ ॥

छादितं तेन चारित्रधर्मादिबलमाङ्गिकम् ।
महामोहादि सैन्यं च, पोषितं दुःखकारि ते ॥ २९२ ॥

पुण्योदयोऽपि नो तेनानुबद्धोऽनुबबन्ध ते ।
सुखौघमन्तःसंलीनज्वरानुद्भवसन्निभः ॥ २९३ ॥

दोषः पुण्योदयस्यास्य, तत्र कश्चन विद्यते ।
किन्तु पापोदयस्यैव, दोषः सर्वोऽप्ययं द्विषः ॥ २९४ ॥

मयोक्तं भगवन् ! पापोदयोऽसावधुना कथम् ।
तूष्णीमास्ते गुरुः, प्राह, स्वतन्त्रोऽयं न कर्हिचित् ॥ २९५ ॥

यत् कर्मपरिणामादिनिर्देशेन प्रवर्तते ।
दूरीकृतोऽसावधुना, तैर्दुरात्मा त्वदन्तिकात् ॥ २९६ ॥

यतः प्रभृति पार्श्वे ते, समायातः सदागमः ।
अमीभिस्तत आरभ्य, तत्प्राबल्यं निराकृतम् ॥ २९७ ॥

दूरेऽगात् स मनाक् तेन, प्राप्तः पुण्योदयोऽन्तिके ।
ततः सदागमे प्रीतिः, संजाता तेऽन्तराऽन्तरा ॥ २९८ ॥

तन्माहात्म्यात् सुखं लब्धं, त्वया तैस्त्वं क्वचित्पुनः ।
कृतः पापोदयं दत्त्वा, दुःखी त्यक्तसदागमः ॥ २९९ ॥

आलोच्यालोच्य तैरेव, मीलितोऽनन्तशस्तव ।
पापोदयान्तरात् पुण्योदययुक्तः सदागमः ॥ ३०० ॥

यदा त्वेतैस्तवानीतः, सविधे गृहिधर्मयुग् ।
महत्तमो दूरतरीकृतः पापोदयस्तदा ॥ ३०१ ॥

नीतस्त्वं विबुधावासे, ततः पुण्योदयान्वितः ।
आनीतो मनुजावासे, कृता कल्याणसन्ततिः ॥ ३०२ ॥

पुनः पापोदयो दत्तस्त्याजितास्ते सुबान्धवाः ।
बन्धुसंयोगविरहावित्थं तेऽसंख्यशः कृतौ ॥ ३०३ ॥

त्वत्तोऽधुना ते तैर्दूरतरे पापोदयः कृतः ।
मधुवारणपुत्रत्वे, तूष्णीमासते ततो ह्यसौ ॥ ३०४ ॥

आसन्नास्ते कृतास्तैश्च, सातपुण्यादयोऽधुना ।
पापानुबन्धिविरहाद्, दिव्याः पुण्यानुबन्धिनः ॥ ३०५ ॥

तेन ते वर्धते नित्यं, लौल्यमुक्ता सुखावलिः ।
हिते ते स्वप्नदृष्टानि, मानुषाण्येव जाग्रति ॥ ३०६ ॥

यदा हि प्रतिकूलानि, तान्यभूवंस्तवोपरि ।
तदा पापोदयद्वारा, दुःखं तैस्तव दर्शितम् ॥ ३०७ ॥

अनुकूलैस्तु तैः पुण्योदयद्वारा सुखासिका ।
दत्ता ते तेन तान्येव कारणं ते शुभाशुभे ॥ ३०८ ॥

मयोक्तं तत् किमत्रार्थे, वर्तेऽकिञ्चित्करोऽन्वहम् ।
सूरिराह महासत्त्व !, मैवं मंस्थाः कदाचन ॥ ३०९ ॥

अमूनि परिवारस्ते, त्वमेवाखिलनायकः ।
त्वद्योग्यतामपेक्ष्यैव, तेषां तास्ताः प्रवृत्तयः ॥ ३१० ॥

ततस्ते कारणं मुख्यं, सुन्दरेतरवस्तुषु ।
योग्यताऽनादिशक्त्याख्या, परे तु सहकारिणः ॥ ३११ ॥

हेतुस्त्वं परिणामित्वात्, कार्याणामात्मभाविनाम् ।
तन्मुख्यः प्रतिपद्यन्ते, गौणत्वं चान्यहेतवः ॥ ३१२ ॥

मयोक्तं नाथ ! यद्येवं, कार्यसम्पादको मम ।
किमियानेव हेत्वोघः, किं वाऽस्त्यधिकमप्यतः ॥ ३१३ ॥

सूरिराह महाराज ! शृणु या निर्वृतिः पुरी ।
अस्ति निर्द्वन्द्वसुखभूर्निरातङ्का निरामया ॥ ३१४ ॥

अस्ति तस्यां महाराजः, सुस्थितः परमेश्वरः ।
सुन्दरेतरकार्याणां, हेतुस्ते जगतश्च सः ॥ ३१५ ॥

एकरूपोऽप्यनेकोऽसावचिन्त्यगुणभाजनम् ।
अव्ययो निष्कलः शुद्धः, परमात्मा सनातनः ॥ ३१६ ॥

स बुद्धः स महादेवः, स विष्णुः स पितामहः ।
स वीतरागो भगवान्, कथितस्तत्त्वदर्शिभिः ॥ ३१७ ॥

निरिच्छो न करोत्येष, त्वत्कार्यव्यूहमिच्छया ।
किन्त्वाज्ञा विद्यते तस्य, लोकानां करणोचिता ॥ ३१८ ॥

कार्या निरन्धकारेयं, चित्तवृत्तिर्महाटवी ।
हन्तव्यं रिपुबुद्ध्या च, महामोहादिकं बलम् ॥ ३१९ ॥

चारित्रधर्मराजाद्यं, पोष्यं बन्धुधिया बलम् ।
आज्ञेयमियती विश्वहितकृत् पारमेश्वरी ॥ ३२० ॥

ध्यानेन ब्रह्मविधिना, स्तवेन व्रतचर्यया ।
इयमाराध्यते शिष्टैर्दुष्टाचारैर्विराध्यते ॥ ३२१ ॥

तां च यो यावतीं धीमानाराधयति सर्वदा ।
अजानतोऽपि तद्रूपं, तस्य तावद् भवेद् सुखम् ॥ ३२२ ॥

यो यावत् कुरुते मूढस्तदाज्ञाया विराधनम् ।
तावद् दुःखं भवेत् तस्य, तद्रूपावेदिनोऽपि हि ॥ ३२३ ॥

तदाज्ञालङ्घनाद् दुःखं, तदाज्ञाकरणात् सुखम् ।
ततः स निर्वृतिस्थोऽपि, जगतां हेतुरुच्यते ॥ ३२४ ॥

शुभाशुभानां कार्याणामतस्ते गुणधारण ! ।
स एव परमो हेतुरिष्यते नात्र संशयः ॥ ३२५ ॥

पूर्वं तदाज्ञालोपात् ते, जाता दुःखपरम्परा ।
अधुना सुखलेशोऽयमीदृशस्ते विधायिनः ॥ ३२६ ॥

यदा तु तस्य सम्पूर्णामाज्ञामाराधयिष्यति ।
तदा प्रकृष्टं यद् भावि, सुखं तद् ज्ञास्यसि स्वयम् ॥ ३२७ ॥

प्रधानगुणभावेन, तदेते हेतवोऽखिलाः ।
मिलिताः कुर्वते कार्यं, नत्वेकेनापि वर्जिताः ॥ ३२८ ॥

मयोक्तं कार्यसामग्री, सम्पूर्णेयं निवेदिता ।
सूरिराह महाराज !, प्रायशः प्रतिपादिता ॥ ३२९ ॥

अन्तर्भावोऽवशिष्टानां, हेतूनामत्र कीर्त्यते ।
यथा यदृच्छानियती, प्रविष्टे 'भवितव्यताम् ॥ ३३० ॥

ततोऽहं गतसन्देहस्तत् स्वीकृत्य गुरोर्वचः ।
तं परं पृष्टवान् चित्ते, संदेहं प्राग् वितर्कितम् ॥ ३३१ ॥

भूमौ व्योम्नि च सस्पर्द्धं नभश्चरबलद्वयम् ।
स्तम्भितं केन भगवंस्तदा रणरसोद्धतम् ॥ ३३२ ॥

सूरिर्बभाषे तत्रापि, हेतुः पुण्योदयस्तव ।
परमस्तस्य माहात्म्यात् प्रसन्ना वनदेवता ॥ ३३३ ॥

तया बलद्वयं सद्यः, स्तम्भितं रक्षिता मृतिः ।
त्वदिच्छया खेचराणां, मुक्तास्ते शान्तविग्रहाः ॥ ३३४ ॥

तयाऽपि यत् कृतं कार्यं, ज्ञेयं पुण्योदयस्य तत् ।
अयमेव हि सत्कार्ये, बाह्यहेतुप्रचोदकः ॥ ३३५ ॥

पुण्यपापोदयौ तस्मान्मुख्यहेतू शुभाशुभे ।
निमित्तमात्रं बाह्यास्तु, पदार्था गुणधारण ! ॥ ३३६ ॥

मयोक्तं भगवन् ! नष्टोऽधुना मे संशयोऽखिलः ।
बुद्धं च तत्त्वं यत् पूर्वं, सुस्थिताज्ञाविलङ्घनात् ॥ ३३७ ॥

तैः कर्मपरिणामाद्यैर्महामोहादिपोषिभिः ।
क्रुद्धैः प्रचोदितात् पापोदयाद् दुःखं बभूव मे ॥ ३३८ ॥

यदा स्वयोग्यतापेक्षसुस्थितानुग्रहान्मम ।
जातं ज्ञानं कृतः पोषश्चारित्रादिबलस्य च ॥ ३३९ ॥

तैः कर्मपरिणामाद्यैरनुकूलैस्तदा मम ।
प्रौढपुण्योदयद्वारा, दाप्यते सुखमालिका ॥ ३४० ॥

केवलं भगवद्भिर्यत्, प्रोक्तं पुण्योदयेन ते ।
ईदृक् सुखलवो दत्तस्तत्र मे कौतुकं महत् ॥ ३४१ ॥

यतो यस्मिन् दिने लब्धा, मया कनक(मदन)मञ्जरी ।
दिव्यरत्नसमूहाश्च, भाभिर्भानुसनाभयः ॥ ३४२ ॥

चिन्तामात्रेण स(श)मितं, खेचराणां च विड्वरम् ।
बन्धूभूता मिथस्ते च, प्रपन्ना मम भृत्यताम् ॥ ३४३ ॥

ताताम्बादिमनस्तोषः, कृतस्तैः खेचरैः सह ।
प्राप्तो महोत्सवैर्गेहं, गीतं सर्वैर्यशश्च मे ॥ ३४४ ॥

तद्दिनं मे महानन्दात्, प्रतिभातं सुधामयम् ।
वर्धमाने च मदनमञ्जरीस्नेहपादपे ॥ ३४५ ॥

जाते कन्दमुनीन्द्रस्य, दर्शने मित्रतां गते ।
साते सदागमे श्राद्धधर्मे सम्यक्त्वभाजि च ॥ ३४६ ॥

राज्ये परिणतेऽत्यन्तं, यः सुखातिशयोऽजनि ।
जाता तेन ममावज्ञा, स्वर्गलोकसुखेष्वपि ॥ ३४७ ॥

भगवत्यधुना दृष्टे, तथा भक्त्याऽभिवन्दिते ।
नष्टे च चित्तसन्देहे, यत् सुखं तद् वचोऽतिगम् ॥ ३४८ ॥

तत् कथं सुखलेशो मे, भगवद्भिर्निवेदित: ।
अस्मिन् सुखलवे पूर्णे, सुखं किन्नु भविष्यति ॥ ३४९ ॥

सूरिराह महाराज !, यदा त्वं परिणेष्यसि ।
दश कन्यास्तदा पूर्णं, ज्ञास्यसेऽनुभवेन तत् ॥ ३५० ॥

तत्प्रेमपरिणामोत्थनर्मशर्मव्यपेक्षया ।
तवायमधुना शर्मलेश एवावसीयते ॥ ३५१ ॥

ततो मयोक्तं भगवन् !, कान्तां मदनमञ्जरीम् ।
त्यक्त्वैनामपि शिष्यस्ते, भविष्यामीति मेऽस्ति धी: ॥ ३५२ ॥

दश कन्या भवत्प्रोक्ता:, परिणेष्यामि तत् कथम् ।
भगवानाह तव ता, विना प्रव्रजितेन किम् ॥ ३५३ ॥

वयं प्रव्राजयिष्यामो, भवन्तं ताभिरन्वितम् ।
तादृश्यो हि कुटुम्बिन्यस्त्यागार्हा न कदाचन ॥ ३५४ ॥

तच्छ्रुत्वाऽहं गुरुर्ब्रूते, किमेतदिति विस्मित: ।
तत: कन्दमुनि: प्राह, का नु कन्या भदन्त ! ता: ॥ ३५५ ॥

भगवानाह नगरं, चेत:सौन्दर्यमस्ति यत् ।
राजा शुभाशयस्तत्र, विद्येते द्वे च तत्प्रिये ॥ ३५६ ॥

स्थिरताशान्तते नाम, कन्ये क्षान्तिदये तयो: ।
मनोनैर्मल्यसंज्ञानं, तथाऽस्ति नगरं परम् ॥ ३५७ ॥

राजा हिताशयस्तत्र, नम्रतापूर्णताऽभिधे ।
देव्यौ तस्य तयो: कन्ये, मृदुतासत्यताभिधे ॥ ३५८ ॥

तथाऽन्यदस्ति नगरं, स्वान्तवैशद्यसंज्ञकम् ।
राजा रुच्याशयस्तत्र, तद्भार्ये शुद्धिशिष्टते ॥ ३५९ ॥

ऋजुताऽचौरते नाम, द्वे कन्ये तत्तनूद्भवे ।
परं भावप्रसादाख्यं, पुरमस्ति मनोहरम् ॥ ३६० ॥

राजा शुद्धाशयस्तत्र, तस्यात्मरतिरुच्यते ।
देव्यौ कन्ये तयोर्द्वेऽन्ये, द्वे ब्रह्मरतिमुक्तते ॥ ३६१ ॥

अन्या च मानसी सम्यग्दर्शनेन विनिर्मिता ।
स्ववीर्येणास्ति विद्याख्या, कन्या सन्न्यायवासभूः ॥ ३६२ ॥

चारित्रधर्मराजस्य, देव्याश्च विरतेः परा ।
अस्ति कुक्षिसमुद्भूता, कन्या नाम्ना निरीहता ॥ ३६३ ॥

वासाभिजननामानि, तदेवं कीर्तितानि ते ।
दशानामपि कन्यानामार्यकन्दमुने ! स्फुटम् ॥ ३६४ ॥

ततः कन्दमुनिः प्राह, लप्स्यते ताः कथं नृपः ।
बभाषे भगवान् कर्मपरिणामानुकूल्यतः ॥ ३६५ ॥

अनेन योग्यता कार्या, गुणाभ्यासेन केवलम् ।
यथा तस्य पितॄणां च, तासां स्यादत्र रक्तता ॥ ३६६ ॥

प्राह कन्दमुनिर्नाथा ! युष्मदाज्ञावशंवदः ।
अयमस्ति वदन्त्वस्य, तल्लाभौपयिकान् गुणान् ॥ ३६७ ॥

बभाषे भगवानार्य !, क्षान्तिं समभिकाङ्क्षता ।
मैत्री समस्तसत्त्वेषु, भावनीया प्रयत्नतः ॥ ३६८ ॥

पराभवः परकृतः सोढव्यस्तत्प्रसङ्गतः ।
अनुमोद्या परप्रीतिश्चिन्त्यः स्वानुग्रहस्ततः ॥ ३६९ ॥

निन्द्यो हेतुतया चात्मा, परिभावकदुर्गतेः ।
हितबुद्ध्या प्रपत्तव्याः, स्वस्य न्यक्कारकारिणः ॥ ३७० ॥

संसारासारदर्शित्वप्रवृद्धगुरुभावतः ।
विधेयं सर्वथा स्वान्तं, निष्प्रकम्पमनाविलम् ॥ ३७१ ॥

परापकारः स्तोकोऽपि, दयां परिणिनीषता ।
त्याज्यो निखिलसत्त्वानां, दर्शनीया च बन्धुता ॥ ३७२ ॥

परोपकारः कर्तव्यः, सेव्या च समता सदा ।
नोदासितव्यमन्येषां, व्यसनेषु महात्मना ॥ ३७३ ॥

मोक्तव्यो जातिवादश्च, मृदुतां स्वीकरिष्यता ।
कुलाभिमानः संत्याज्यो, वर्जनीयो बलस्मयः ॥ ३७४ ॥

स्वान्ताद् रहयितव्यश्च, रूपोत्सेकः प्रसृत्वरः ।
परिहार्यस्तपोगर्वो, निर्वास्यो धनितामदः ॥ ३७५ ॥

श्रुतावलेपः क्षेप्तव्यो, लाभावष्टम्भसंयुतः ।
वाल्लभ्यकस्यानुशयः, कार्यश्च शिथिलः सदा ॥ ३७६ ॥

विनयोऽभ्यसनीयश्च, सात्मीकार्या च नम्रता ।
नवनीतसहाध्यायि, कर्त्तव्यं सर्वथा मनः ॥ ३७७ ॥

त्यजतो भयवैक्लव्यं, परिहासमकुर्वतः ।
अनुद्घाटयतो मर्म, परेषां शान्तचेतसः ॥ ३७८ ॥

वाक्पारुष्यं च पैशुन्यं, मौखर्यं चोक्तिवक्रताम् ।
अभूतोद्भावनं भूतनिह्नवं चाप्यतन्वतः ॥ ३७९ ॥

चरणस्रजमागत्य, स्वयमेव निधास्यति ।
गुणानुरक्ता दयिता, कण्ठे राज्ञोऽस्य सत्यता ॥ ३८० ॥

सद्भावसारमाचारमनुशीलयता स्फुटम् ।
त्यजता चित्तकौटिल्यमृजुदण्डोपमात्मना ॥ ३८१ ॥

शल्यमुद्धरता प्रत्याहरता क्लिष्टलेश्यताम् ।
ऋजुता नृपरत्नेन, वशीकार्या प्रयत्नतः ॥ ३८२ ॥

परपीडापरद्रोहभीरुतां हृदि बिभ्रति ।
जानाने च परद्रव्यापहारापायहेतुताम् ॥ ३८३ ॥

संस्मृत्य दुर्गतेः पातं, कम्पमाने च रागिणी ।
अचौरता महीपाले, भाविनी संगमोत्सुका ॥ ३८४ ॥

विवेकनिर्भरः कार्यो, मुक्ततां पुनरिच्छता ।
भाव्याऽऽत्मनः सदा बाह्याभ्यन्तरग्रन्थभिन्नता ॥ ३८५ ॥

प्रदीप्तार्थपिपासा च, शमनीया शमाम्भसा ।
अर्थकामाम्बुपङ्काभ्यामूर्द्ध्वं स्थेयं च पद्मवत् ॥ ३८६ ॥

पाणौ जिघृक्षता ब्रह्मरतिं कन्दमुनेऽमुना ।
स्वकीया मातर इव, प्रेक्ष्याः सर्वा अपि स्त्रियः ॥ ३८७ ॥

न वस्तव्यं तद्वसतौ, न कार्या जातु तत्कथा ।
न सेव्या तन्निषद्या न, प्रेक्ष्यं तत्सुन्दरेन्द्रियम् ॥ ३८८ ॥

स्थेयं रतिस्थमिथुनकुड्याभ्यर्णे कदापि न ।
न स्मार्यं पूर्वललितं, न(ना)हार्यं स्निग्धभोजनम् ॥ ३८९ ॥

त्याज्या तदतिमात्रा च, राढा च तनुगोचरा ।
रताभिलाषिता सर्वोद्दलनीया च यत्नतः ॥ ३९० ॥

अनित्यतामशुचितां, दुःखतामात्मभिन्नताम् ।
पुद्गलानां भावयते, देहादिपरिणामिनाम् ॥ ३९१ ॥

त्यजते कुविकल्पौघं, तत्त्वं विमृशते हृदि ।
सद्बोधोऽस्मै समानीय, विद्याकन्यां प्रदास्यति ॥ ३९२ ॥

भोगाभिलाषास्तापाय, मनसो मृतये जनुः ।
कुटुम्बसङ्गः क्लेशाय, वियोगाय प्रियागमः ॥ ३९३ ॥

शोकाय जनवाल्लभ्यमात्मबन्धाय कल्पना ।
कीटस्य कोट(श)कारस्य, तन्तूनां रचना यथा ॥ ३९४ ॥

प्रवृत्तिः परमं दुःखं, निवृत्तिः परमं सुखम् ।
इत्यस्य ध्यायतो रक्ता, भविष्यति निरीहता ॥ ३९५ ॥

तदेते सद्‌गुणास्तासामुपलम्भाय भूभुजा ।
दशानामपि कन्यानां, संस्तोतव्याः प्रयत्नतः ॥ ३९६ ॥

राज्ञोऽस्य कुर्वतश्चैवं, स कर्मपरिणामराट् ।
चारित्रधर्मराजाद्यं, स्वबलं दर्शयिष्यति ॥ ३९७ ॥

अनुरूपगुणाभ्यासाद्, रञ्जनीयाश्च ते भटाः ।
रक्तास्तेऽस्य हनिष्यन्ति, मोहादिद्विषतां बलम् ॥ ३९८ ॥

भावराज्यं ततो लब्ध्वा, निष्कण्टकमयं नृपः ।
कान्ताभिर्विलसंस्ताभिः प्रकृष्टं शर्म लप्स्यते ॥ ३९९ ॥

ततः कन्दमुनिः प्राह, कालेन कियता पुनः ।
महाराजस्य भगवन् ! सेत्स्यतीदं प्रयोजनम् ॥ ४०० ॥

भगवानाह षण्मास्या, मयोक्तं त्वरयाम्यहम् ।
आदातुं भगवन् ! दीक्षां, विलम्बस्तदियान् वृथा ॥ ४०१ ॥

सूरिराह महाराज !, त्वरयाऽत्र कृतं तव ।
इयमेव हि सद्दीक्षा, यन्मदुक्तस्य पालनम् ॥ ४०२ ॥

द्रव्यलिङ्गं हि भवता, प्राग् गृहीतमनन्तशः ।
विनोक्तस्थितिमासं तु न विशिष्टफलं ततः ॥ ४०३ ॥

कुर्वंस्तिष्ठोपदिष्टं मे, मा त्वरिष्ठास्ततोऽनघ ! ।
प्राह कन्दमुनिः स्वामिंस्तद्विवाहे क्रमोऽस्य कः ॥ ४०४ ॥

सूरिराहार्यपार्श्वेऽस्य, मदुक्तमनुतिष्ठतः ।
विद्यां कन्यां समादाय, सद्बोधः समुपेष्यति ॥ ४०५ ॥

ग्राहयित्वाऽस्य तां कन्यां, पाणौ स्थास्यति सोऽन्तिके ।
ततो ब्रूते स यत् किञ्चित्, तत्कार्यममुनेति दिग् ॥ ४०६ ॥

ततो भगवतो वाक्यं, तत् स्वीकृत्य प्रणम्य तम् ।
गतोऽहं नगरे तस्योपदेशं च प्रणीतवान् ॥ ४०७ ॥

मम तं कुर्वतः सम्यग्, गच्छत्सु दिवसेष्वथ ।
अन्यदा भावनाभाजो, निद्रा निशि समागता ॥ ४०८ ॥

तयैव मे भावनया, वृद्धा बुद्धस्य साऽधिकम् ।
रात्रिशेषे ततो जातः, प्रमोदो विस्मयावहः ॥ ४०९ ॥

तदा समीपमायातः, सद्बोधः प्रविलोकितः ।
दृष्टा मया च तत्पार्श्वे, सर्वावयवसुन्दरा ॥ ४१० ॥

विमर्शमालतीदामस्फुरत्सौरभसम्पदा ।
धारणावेणिदण्डेन, लम्बमानेन राजिता ॥ ४११ ॥

आस्तिक्यवदना दीर्घप्रमाणनयलोचना ।
पीनवैराग्यसंवेगविशालस्तनमण्डला ॥ ४१२ ॥

आध्यात्मिकमनोवृत्तिस्तोमरोमालिशालिता ।
गम्भीरात्मज्ञतानाभिः, शमचारुनितम्बभृत् ॥ ४१३ ॥

सदसत्ख्यातिरम्योरुः, शुचिवृत्ततपःक्रमा ।
लसत्परापरगुणानुरागकरपल्लवा ॥ ४१४ ॥

स्पृहणीयगुणोपेता, हृदयानन्दकारिणी ।
कन्या विद्याऽभिधा धन्या, स्नेहस्तिमितचक्षुषा ॥ ४१५ ॥

सा सद्बोधेन पाणौ मे, ग्राहिता लङ्घिता निशा ।
प्रभाते भगवन्मूलं, गतोऽहं सपरिच्छदः ॥ ४१६ ॥

वन्दिता मुनयः सर्वे, पृष्टा निर्मलसूरयः ।
निशोदन्तमभूत् किं मे, तादृशी वरभावना ॥ ४१७ ॥

किं वा तादृक् समुत्पन्नः, प्रमोदो विस्मयावहः ।
भगवानाह भूमीश !, समाकर्णय कारणम् ॥ ४१८ ॥

तुष्टस्ते सदनुष्ठानात्, स कर्मपरिणामराट् ।
गत्वा सविद्यः सद्बोधस्तेन प्रोत्साहितः स्वयम् ॥ ४१९ ॥

यथा गच्छ भजस्वोर्वीवासवं गुणधारणम् ।
ततः स्वप्रभुमापृच्छ्य, प्रस्थितोऽसौ त्वदुन्मुखम् ॥ ४२० ॥

ज्ञात्वा प्रवृत्तिमेतां च, महामोहादयो द्विषः ।
पापोदयं पुरस्कृत्य, पर्यालोचं प्रचक्रिरे ॥ ४२१ ॥

जगाद तत्र विषयाभिलाषो निहता वयम् ।
सद्बोधो यदि संसारिजीवपार्श्वे, व्रजेदयम् ॥ ४२२ ॥

सर्वेऽपि पथि कुर्वन्तु, तदस्य स्खलनोद्यमम् ।
तदा पापोदयः प्राह, किमार्य ! क्रियतेऽधुना ॥ ४२३ ॥

यत् कर्मपरिणामोऽपि, जातः सद्बोधपक्षकृत् ।
पुरा हि बलवान् पक्षो, बलादस्य बभूव नः ॥ ४२४ ॥

उदासीनोऽपि देवश्चेद्, भवेदत्र बलद्वये ।
तदाऽपि युज्यते योद्धुमस्माकमरिभिः समम् ॥ ४२५ ॥

इदानीं याति सद्बोधस्तत्पार्श्वे देवशासनात् ।
तत्रास्य स्खलनं युक्तं, देवो दूरीकरोति नः ॥ ४२६ ॥

अधुना संस्थिता यूयं, प्रस्तावं लब्धुमर्हथ ।
सद्बोधो यातु तत्पार्श्वं, पश्चाद् विज्ञास्यतेऽखिलम् ॥ ४२७ ॥

इदमाकर्ण्य कुपितो, ज्ञानसंवरणो नृपः ।
जगाद यदि तत्पार्श्वे, सद्बोधो याति लीलया ॥ ४२८ ॥

जीवितेन तदा किं मे, मलिनेनायशोभरैः ।
यूयं तिष्ठत तद् भीता, यातव्यं तु मया ध्रुवम् ॥ ४२९ ॥

इत्युक्त्वा चलिते तस्य, प्रतिस्खलनकाम्यया ।
ज्ञानसंवरणे राज्ञि, सर्वेऽपि चलिता ह्रिया ॥ ४३० ॥

रुद्धो मार्गस्तदाऽऽगत्य, सद्बोधसचिवस्य तैः ।
आसीच्चारित्रसैन्यं चात्रागतं तावतीं भुवम् ॥ ४३१ ॥

घोरमायोधनं लग्नं, ततश्च बलयोस्तयोः ।
परस्परसमाह्वानरोषनिर्घोषतो मिथः ॥ ४३२ ॥

एकतो विधुवच्छुभ्रं, भ्रमरच्छवि चान्यतः ।
बलद्वयं मिलद्गङ्गाकालिन्दीजलवद् बभौ ॥ ४३३ ॥

भग्नयोधं हतगजं, छिन्नच्छत्रं पतद्रथम् ।
बलयोस्तदभूद् युद्धं, गुरुपौरुषशालिनोः ॥ ४३४ ॥

जयः स्यादिह कस्येति, द्रष्टुं संशयसंक्रमात् ।
जयश्रीः संशयारूढा, मन्ये नैकमपि श्रिता ॥ ४३५ ॥

स कर्मपरिणामाख्यस्तदैवं पर्यचिन्तयत् ।
पक्षपातं स्फुटं कुर्वे, कस्य साधारणो ह्यहम् ॥ ४३६ ॥

मोहाद्या भिन्नचित्ताः स्युः, सद्बोधस्य स्फुटे कृते ।
पक्षपाते तदा तैः स्यात्, सार्द्धं चाकाण्डविड्वरम् ॥ ४३७ ॥

न च तन्मम युक्तं यत्, साम्प्रतं मेऽस्ति वल्लभम् ।
बलं संसारिजीवस्य, रुच्या चारित्रभूपतेः ॥ ४३८ ॥

दोषेष्वेव निबध्नीयाद्, भूयोऽप्येष यदा मनः ।
तदा चिरन्तनस्थित्या, गतिर्मोहादयो मम ॥ ४३९ ॥

तन्न तेषां मनो भेद्यं, पोष्यं धर्मबलं च मे ।
इति तेन भवच्चित्ते, वर्धिता वरभावना ॥ ४४० ॥

यावत् त्वं भावनासौधमारूढो गुणधारण ! ।
तावत् सद्बोधसहितं, बलं प्रबलतां गतम् ॥ ४४१ ॥

स्फीते त्वद्भावनामन्त्रे, मोहाद्याः क्षीणतां गताः ।
ततः सद्बोधसैन्येन, सर्वं मोहबलं हतम् ॥ ४४२ ॥

दत्तः प्रहारः सर्वेषां, महामोहादिविद्विषाम् ।
चूर्णितश्च विशेषेण, ज्ञानसंवरणो नृपः ॥ ४४३ ॥

मन्दाक्षलक्ष्या निःस्पन्दाः, स्थिताः पापोदयादयः ।
पार्श्वे सविद्यः सद्बोधस्तव निर्विघ्नमागतः ॥ ४४४ ॥

हर्षोल्लसस्ततस्तेऽभूत्, परिणीता च कन्यका ।
राजंस्त्वयाऽखिलं तत्त्वं, ज्ञातमेव ततः परम् ॥ ४४५ ॥

तदिदं भावनावृद्धेः, कारणं तव भूपते ! ।
हर्षोल्लसस्य चोत्पन्नं, रजन्यां नात्र संशयः ॥ ४४६ ॥

मयोक्तमधुना किं ते, कुर्वन्ति मम शत्रवः ।
भगवन्नाह भूमीश !, कुर्वते कालयापनाम् ॥ ४४७ ॥

उदीर्णास्ते परिक्षीणाः, परे चोपशमं गताः ।
चित्तवृत्तिमहाटव्यां, लीनाः सन्त्यखिलाः स्थिताः ॥ ४४८ ॥

प्रस्तावे मत्सरध्माताः, करिष्यन्ति रणं पुनः ।
सद्बोधवचनात् सर्वे, हन्तव्यास्ते तदा त्वया ॥ ४४९ ॥

तत् प्रमाणीकृतं वाक्यं, मया भगवतस्ततः ।
विहृता मासकल्पे ते, सम्पूर्णेऽन्यत्र सूरयः ॥ ४५० ॥

ततस्तदुपदिष्टार्थो, विशिष्यानुष्ठितो मया ।
प्रसादितं मनो बाढं, शरीरं परिकर्मितम् ॥ ४५१ ॥

विहितं चित्तवृत्तौ मे, सद्बोधेन प्रवेशनम् ।
प्रदर्शितौ द्वौ पुरुषौ, शुभ्रौ रम्यौ सुखावहौ ॥ ४५२ ॥

उक्तं च तेन द्वावेतौ, धर्मशुक्लाभिधौ नरौ ।
तव प्रवेशकौ राज्ये, कार्यस्तेनादरोऽनयोः ॥ ४५३ ॥

ततश्च दर्शिता पीतपद्मशुक्लाभिधाः स्त्रियः ।
विद्युत्पद्मस्फटिकभास्तेन तिस्रो मनोहराः ॥ ४५४ ॥

उक्तं च प्रथमस्येमास्तिस्रोऽपि परिचारिका ।
शुक्लैवैका द्वितीयस्य, विज्ञेया पोषकारिणी ॥ ४५५ ॥

तदेतासु त्वया सम्यग्, वर्त्तितव्यं महाशय ! ।
पुरुषौ दास्यतो राज्यमेताभिः पोषिताविमौ || ४५६ ||

ततस्तद्वचनं पथ्यं, स्वीकृत्याहं पुनः पुनः ।
सद्बोधेन सह स्वैरं, विलसामि स्म लीलया || ४५७ ||

चित्तवृत्तौ प्रविश्य स्म मन्त्रयामि मुहुर्मुहुः ।
मानयामि स्म सम्यक्त्वगृहिधर्मसदागमान् || ४५८ ||

गतेषु कुर्वतश्चैवं, किञ्चिदूनेषु पञ्चसु ।
मासेषु मे भृशं तुष्टः, स कर्मपरिणामराट् || ४५९ ||

ततस्तेन नृपाः स्वस्वकन्यादानेऽनुकूलिताः ।
प्रावर्त्तन्त विवेकाद्रौ, दातुमेताः पुरोदिताः || ४६० ||

अत्रान्तरे च विषयाभिलाषो मोहभूपतिम् ।
प्राह संसारिजीवोऽसाविमाः कन्या वृणोति चेत् || ४६१ ||

ततो वयं परिक्षीणास्तन्नोपेक्षाऽत्र युज्यते ।
कर्त्तव्यः सर्वथा यत्नः, सत्त्वमालम्ब्य निर्भयम् || ४६२ ||

तावद् भयेभ्यो भेतव्यं, यावद् भयमनागम् ।
आगतं तु भयं दृष्ट्वा, प्रहर्तव्यमशङ्कितैः || ४६३ ||

अनुमेने महामोहो, न्याय्यं तन्मन्त्रिणो वचः ।
समर्थितं भटैः शेषैः, सन्नद्धमखिलं बलम् || ४६४ ||

भूयः संभूय ते योद्धुं, कृतोत्साहाः समागताः ।
जाताः पर्याकुलाश्चित्ते, केवलं दृष्टसाध्वसाः || ४६५ ||

ततः सविनयं पृष्टा, सर्वैस्तैर्भवितव्यता ।
न्याय्यं किमधुनाऽस्माकं, भगवत्यभिधेहि नः || ४६६ ||

सा प्राह भद्र ! भवतां, रणारम्भो न युज्यते ।
यत् कर्मपरिणामोऽस्मिन्नार्यपुत्रेऽधुना हितः || ४६७ ||

शुभाशयादयस्तेन, विशेषात् तस्य मीलिताः ।
करिष्यत्यधुना सम्यक्, स्वबलस्यैष षोषणम् ॥ ४६८ ॥

अधुना युध्यमानानां, प्रलयस्तदनेन वः ।
संपत्स्यते ततः कालयापनां कर्तुमर्हथ ॥ ४६९ ॥

यदा त्ववसरो भावी, वक्ष्यामि भवतां तदा ।
अहं दत्तावधानाऽस्मि, सदा युष्मत्प्रयोजने ॥ ४७० ॥

संहृतस्तै रणावेशस्ततस्तदुपदेशतः ।
संलीनैः केवलं स्वाः स्वाः, प्रयुक्ता योगशक्तयः ॥ ४७१ ॥

समजायन्त कल्लोलास्तन्माहात्म्येन मे हृदि ।
सूरिणोक्तं हिताः कन्या, यदि त्वं परिणेष्यसि ॥ ४७२ ॥

तदा प्रव्राजयिष्येऽहं, प्रव्रज्या चातिदुष्करा ।
भुजाभ्यां तरणं ह्येतत्, स्वयंभूरमणोदधेः ॥ ४७३ ॥

नैष्ठिकं यत्यनुष्ठानं, वपुर्मे सुखलालितम् ।
रोगातङ्कांस्तथा रूक्षवृत्तिं नेदं क्षमिष्यते ॥ ४७४ ॥

बाधिष्यते च मदनमञ्जरी विरहेण मे ।
द्राघीयसाऽतिमृद्वङ्गी, तुषारेणेव पद्मिनी ॥ ४७५ ॥

जातो मनाग् मनोभङ्ग, इत्यादि ध्यायतो मम ।
चिन्तितं च तदा किं ताः, पाणौ गृह्णामि नाधुना ॥ ४७६ ॥

सुखैः प्रसृमरैस्तैर्यौवनं गमयाम्यहम् ।
वार्द्धके प्रव्रजिष्यामि, स्वाधीनाः परिणीय ताः ॥ ४७७ ॥

वितर्कोऽयमभूत् सर्वः, सद्बोधे दूरवर्तिनि ।
आगतायाथ सर्वोऽयं, प्रोक्तोऽस्मै स्वाशयो मया ॥ ४७८ ॥

सद्बोधः प्राह न न्याय्यमिदं देवेन मन्त्रितम् ।
इदं ह्यज्ञानताचिह्नं, स्वहितप्रतिबन्धकम् ॥ ४७९ ॥

न चेदं त्वत्स्वभावोत्थं, किन्तु तेषां विजृम्भितम् ।
पापानामधुना ते हि, त्वद्विघ्नायोपतस्थिरे ॥ ४८० ॥

मयोक्तमार्य ! ते पापा, निराकार्याः कथं मया ।
तेन प्रोक्तं निजबलान्मयोक्तं तत् प्रदर्शय ॥ ४८१ ॥

ततः प्रवेश्य मां चित्तसमाधानाख्यमण्डपे ।
नृपांश्चारित्रधर्मादीन्, सद्बोधः समदर्शयत् ॥ ४८२ ॥

कृता तैः प्रतिपत्तिर्मे, सर्वे सम्मानिता मया ।
प्रवृत्तास्ते द्विषो हन्तुं, सेनया चतुरङ्गया ॥ ४८३ ॥

दृष्ट्वैव तेषां संरम्भं भयेनोद्भ्रान्तमानसाः ।
पापोदयं पुरस्कृत्य, नष्टा मोहादयो द्विषः ॥ ४८४ ॥

तैस्तु भग्नास्तदावासाः, शोधिता च महाटवी ।
द्विषज्जयाद् यशस्तेषामखिला व्यानशे दिशः ॥ ४८५ ॥

किञ्चित् क्षयं गता किञ्चित्, प्रशान्तत्वमुपागताः ।
निलीय केवलं पापाः, स्थितास्ते बकचर्यया ॥ ४८६ ॥

प्रारब्धो मे तदा कर्तुं, विवाहो भावबान्धवैः ।
तत्राष्टौ मातरः पूर्वं, स्थापितास्ताश्च पूजिताः ॥ ४८७ ॥

तासां निवेदितं वीर्यं, सद्बोधेन पृथक् पृथक् ।
आद्या माता यतिं कुर्याद्, युगमात्रप्रलोकितम् ॥ ४८८ ॥

प्रियं पथ्यं मितं तथ्यं, द्वितीया भाषयेद् वचः ।
तृतीया कारयेत् सर्वदोषवर्जितभोजनम् ॥ ४८९ ॥

पात्राद्यादाननिक्षेपं, सुदृष्टं सुप्रमार्जितम् ।
माता चतुर्थी मुनिभिः, कारयन्ती विजृम्भते ॥ ४९० ॥

पञ्चमी त्याजयेन्नीत्या, देहाहारमलादिकम् ।
अनाकुलं मुनेश्चित्तं, षष्ठी माता तु रक्षति ॥ ४९१ ॥

सप्तमी कारयेन्मौनं, धर्म्यं वा भाषयेद् वचः ।
अष्टमी लीनतां कार्ये(ये), कारयेद् यतनां तथा ॥ ४९२ ॥

संपूज्याऽद्यदिने जैनपुराधिष्ठायिका इमाः ।
शुद्धा चित्तसमाधाने, वेदिर्निःस्पृहता कृता ॥ ४९३ ॥

आध्यात्मिकमहःसंज्ञं, विस्तीर्णं तत्र निर्मितम् ।
कुण्डं धर्मेण भावार्चिरुद्दीप्तं जातवेदसः ॥ ४९४ ॥

ततो वृद्धकुलस्त्रीभिर्भावनाख्याभिरादरात् ।
स्नानाङ्गरागभूषादिवधूकर्म विनिर्मितम् ॥ ४९५ ॥

ताभिरेव तथा शेषैः, स्नपितोऽहं नरेश्वरैः ।
शमतीर्थोदकैर्लिप्तोऽवधानैश्चन्दनद्रवैः ॥ ४९६ ॥

भूषितः कोमलैर्दिव्यैः प्रत्याहारैस्तथांऽशुकैः ।
ततः प्रवृत्तो विपुलः, पाणिग्रहमहोत्सवः ॥ ४९७ ॥

स्वयं चकार सद्बोधस्तत्र कार्यं पुरोधसः ।
ऋच उच्चारयन् वेदगता अभ्युदयावहाः ॥ ४९८ ॥

हूयन्ते कर्मसमिधः, क्षिप्यन्ते हुतयोऽनयाः ।
वितीर्यन्ते तथा लाजाञ्जलयो भववासनाः ॥ ४९९ ॥

सांवत्सरः शुभं लग्नं, ददानोऽथ सदागमः ।
अकारयन्मम क्षान्तिदारिकायाः करग्रहम् ॥ ५०० ॥

शुभाशयाद्याः सर्वेऽथ, प्रमोदेन विजृम्भिताः ।
भ्रान्तानि मण्डलान्युच्चैः, प्रवृत्तोऽतिमहोत्सवः ॥ ५०१ ॥

तस्मिन्नेव क्रमेणैव, लग्ने शेषा दयादिकाः ।
परिणीता मया कन्या, अष्टौ स्पष्टौजसाऽन्विताः ॥ ५०२ ॥

ताभिः सहोपविष्टोऽहं, जीववीर्यवरासने ।
चारित्रधर्मराजाद्याः, सर्वेऽपि मुदिता भृशम् ॥ ५०३ ॥

यदैव विद्या कन्या सा, परिणीता तदैव मे ।
लीनो मोहः परं पार्श्वे, दग्धरज्जुसमः स्थितः ॥ ५०४ ॥

यदा तु परिणीतास्ताः, क्षान्त्यादिशुचिकन्यकाः ।
वैश्वानरादिसंहारस्वभावसमवस्थिताः ॥ ५०५ ॥

गतोऽसौ लीनतरतां, तदाऽनीकसमन्वितः ।
पापोदयश्च संत्रस्तो, दूराद् दूरतरं गतः ॥ ५०६ ॥

शान्ताबाधस्ततः कान्तान्वितः स्वबलसंयुतः ।
स्वसंवेदनसिद्धं स्म, वेद्मि सत्यं मुनेर्वचः ॥ ५०७ ॥

अन्या अपिः धृतिश्रद्धामेधाविविदिषासुखाः ।
मैत्रीप्रमुदितोपेक्षाविज्ञप्तिकरुणादिकाः ॥ ५०८ ॥

परिणीता मया कन्याः, शुभाशयमहीभृतः ।
ताभिः प्रौढं सुखं मेऽभूत्, स्त्रीभिर्विलसतः सह ॥ ५०९ ॥

समागता अथाह्लादमन्दिरे निर्मलाभिधाः ।
सूरयस्ते मया गत्वा, सर्वर्द्धया तत्र वन्दिताः ॥ ५१० ॥

ततो विनयनम्रेण, तेषामग्रे मयोदितम् ।
सम्पन्नो भवदादेशो, नाथ ! दीक्षाऽथ दीयताम् ॥ ५११ ॥

सूरिराह महाराज !, जातैव तव भावतः ।
दीक्षा किमधुना देयं, गृहस्थोऽपि यतिर्भवान् ॥ ५१२ ॥

यदेव जातमधुना, वसतोऽपि गृहे तव ।
यतित्वेऽपि विधातव्यमिदमेव विशेषतः ॥ ५१३ ॥

तथापि व्यवहारोऽत्र, लङ्घनीयो न धीमताम् ।
भावस्य दीयते हेतुर्द्रव्यलिङ्गं ततस्तव ॥ ५१४ ॥

महाप्रसाद इत्युक्त्वा ततः प्रमदमेदुरः ।
विधायाष्टदिनान्यर्हद्बिम्बपूजां मनोहराम् ॥ ५१५ ॥

संभाल्य बन्धून् दत्त्वा च, यथेष्टं दानमर्थिनाम् ।
जनतारणनामानं, राज्ये संस्थाप्य नन्दनम् ॥ ५१६ ॥

कुलन्धरेण मदनमञ्जर्या च समन्वितः ।
शेषैः श्रेष्ठजनैश्चाहं, निष्क्रान्तः सूरिसन्निधौ ॥ ५१७ ॥

ततोऽभ्यस्ताः क्रिया गाढं, प्रियोऽभून्मे सदागमः ।
अङ्गान्येकादश मया, पठितानि तदाज्ञया ॥ ५१८ ॥

इष्टोऽभून्मे भृशं सम्यग्दर्शनाख्यो महत्तमः ।
जातश्चारित्रधर्मे च, चित्ताबन्धो विशेषवान् ॥ ५१९ ॥

ज्ञातं विशिष्य तत्सैन्यं, धृतो योगः कृतं तपः ।
प्रमत्ततानदीमुख्या, भग्नाः क्रीडालया द्विषाम् ॥ ५२० ॥

संपाल्य चरणं भूरिकालं त्यक्त्वा समाधिभाग् ।
अन्तेऽनशनतो देहमाद्यग्रैवेयकं गतः ॥ ५२१ ॥

तत्रोत्तमसुखं भुक्त्वा, त्रयोविंशतिवारिधीन् ।
भार्याज्ञयैरवतकं, प्राप्तोऽहं मनुजालये ॥ ५२२ ॥

जातः सिंहपुरे तत्र, पुत्रो वीणामहेन्द्रयोः ।
अहं गङ्गाधरो नाम, क्षत्रियो वरविक्रमः ॥ ५२३ ॥

जातिं स्मृत्वा व्रतं लात्वा, सुघोषाचार्यसन्निधौ ।
ग्रैवेयके द्वितीयेऽथ, गतः पूर्वविधानतः ॥ ५२४ ॥

कृता गमागमाः पञ्च, भावमौनाद् दिशाऽनया ।
ग्रैवेयकेषु तत्राभूदेकैकाब्ध्युत्तरा स्थितिः ॥ ५२५ ॥

ततश्च धातकीखण्डे, भरते शङ्खसत्पुरे ।
पुत्रो भद्रामहागिर्योर्जातोऽहं सिंहनामकः ॥ ५२६ ॥

नृपवंशे महाभूतिः, सुप्रतापः शुभाकृतिः ।
अभूवं यौवनं प्राप्तः कलानामेकमास्पदम् ॥ ५२७ ॥

जगृहेऽथ मया दीक्षा, धर्मबन्धुमहामुनेः ।
समीपे तेन सार्द्धं च, विहृतोऽभ्यस्तसत्क्रियः ॥ ५२८ ॥

जातः स्वल्पेन कालेन, द्वादशाङ्गाब्धिपारगः ।
सदागमस्थितिः काऽपि, न स्थिता मदगोचरे ॥ ५२९ ॥

ततोऽधिगतसूत्रार्थो, धर्मबन्धुमुनीन्दुना ।
समक्षं सर्वसङ्घस्य, स्थापितोऽहं पदे निजे ॥ ५३० ॥

आचार्यपददाने मे, देवदानवमानवैः ।
कृतो महोत्सवो विश्वमनोविस्मयकारणम् ॥ ५३१ ॥

धन्योऽसि कृतकृत्योऽसि, प्रोद्धर्त्ता जगतामसि ।
ज्ञातः सदागमो येन, संस्तुतो गुरुणेत्यहम् ॥ ५३२ ॥

मुनयो मानवा देवाः, सर्वे मे नम्रतां गताः ।
गुणैरावर्जिताः सन्तः, कुन्दपूर्णेन्दुनिर्मलैः ॥ ५३३ ॥

विनीताः पण्डिताः शिष्याः, बभूवुर्बहवो मम ।
पुरः स्फुरन्ति नो येषां, वाचो वाचस्पतेरपि ॥ ५३४ ॥

विद्यार्थिनः श्रिताः शिष्याः, मामागत्य गणान्तरात् ।
सौरभाकाङ्क्षिणः पद्मं, भृङ्गा इव लतान्तरात् ॥ ५३५ ॥

मत्तर्कवादमाकर्ण्य, सिंहनादमिवोद्धतम् ।
दुर्वादिमत्तमातङ्गैर्दूरादेव पलायितम् ॥ ५३६ ॥

स्वशास्त्रभासः प्रथितास्तेजोभानोर्ममोदये ।
छन्नाश्च परशास्त्रार्था, ग्रहांशव इवाभवन् ॥ ५३७ ॥

मद्देशनासुधां भव्या, ग्रामाकरपुरादिषु ।
विततैः श्रोत्रचुलुकैः, पायंपायं मुदं ययुः ॥ ५३८ ॥

मद्यशःपटहध्वानैः, पूर्णं ब्रह्माण्डमण्डलम् ।
दिशः सर्वा अपि व्याप्ताः, प्रसरद्भिर्गुणैर्मम ॥ ५३९ ॥

सत्यं सिंहोऽसि धाम्ना त्वं, त्वया भूर्भूषिताऽखिला ।
इति मां नम्रमूर्द्धानस्तीर्थिका अपि तुष्टुवुः ॥ ५४० ॥

तादृशीं सूरिपदवीभूतिं प्रेक्ष्य ममाद्भुताम् ।
असूययेव रुष्टा मे, पापिष्ठा भवितव्यता ॥ ५४१ ॥

चिन्तितं च तया पूर्वं, प्रस्तावो यो मयाऽऽस्थितः ।
साम्प्रतं सोऽस्ति तदिमं, ब्रुवे मोहादिभूभुजाम् ॥ ५४२ ॥

ते हि मे मुखमीक्षन्ते, याचका धनिनो यथा ।
तदद्य पूरयाम्याशां, तेषामेषा प्रसेदुषी ॥ ५४३ ॥

इति निश्चित्य ते सर्वे, रहस्यं ज्ञापितास्तया ।
स कर्मपरिणामश्च, मोहिता बन्धवश्च मे ॥ ५४४ ॥

प्रस्तारमादधुर्भूयो, मोहपापोदयादयः ।
किन्तु दृष्टभयाश्चक्रुः, सर्वे रहसि मन्त्रणम् ॥ ५४५ ॥

कः स्याज्जयोपाय इति, प्राह मन्त्र्यथ गच्छतु ।
ज्ञानसंवरणस्तावद्, समिथ्यात्वस्तदन्तिके ॥ ५४६ ॥

त्रीणि शैलेन्द्रयुक्तानि, गौरवाणि श्रयन्तु तम् ।
पुरुषौ प्रेषणीयौ द्वावार्त्तरौद्राशयौ ततः ॥ ५४७ ॥

लेश्या यास्यन्त्यथो कृष्णनीलकापोतसंज्ञकाः ।
स्वत एव तदभ्यर्णं, तिस्रस्तत्परिचारिकाः ॥ ५४८ ॥

वयं तु भूयः संस्थाप्य, नदीं दीर्घां प्रमत्तताम् ।
रचनां मण्डपादीनां, कुर्महे प्रयताः परम् ॥ ५४९ ॥

एवं नः कुर्वतां कार्यमनायासेन सेत्स्यति ।
तदिदं रुचितं मन्त्रिवचो मोहादिभूभुजाम् ॥ ५५० ॥

समर्थितं तैस्तद्वाक्यं, प्रारब्धा मन्त्रितक्रिया ।
अथ तेष्वन्तिकस्थेषु, हृत्तरङ्गा ममोत्थिताः ॥ ५५१ ॥

यथाऽहो मे परं तेजो, ममाहो गौरवप्रथा ।
अहो युगप्रधानोऽहं, कोऽपि नैवास्ति मत्समः ॥ ५५२ ॥

अमात्योऽपि जगत् त्यक्त्वा, कलाः सर्वाः समागताः ।
अहंपूर्विकया तीर्थे, मय्येव प्रियमेलके ॥ ५५३ ॥

प्राक्पर्याये नरेन्द्रोऽहमधुना सूरिपुङ्गवः ।
जात्यहेम्न इवोद्दीप्तिः कदा जाता न मे गुणैः ॥ ५५४ ॥

महान् वंशो महद्धैर्यं, महती धीर्महत्तपः ।
महान् मम प्रतापश्च, महतां सकलं महत् ॥ ५५५ ॥

ईदृग्विकल्पशिखरैर्वर्धमानैर्यथोत्तरम् ।
ममानन्तानुबन्धेन, शैलराजो व्यजृम्भत ॥ ५५६ ॥

ज्ञानावरणमिथ्यात्वे, महागहनसन्निभे ।
नियतस्थितिके तत्र, ताभ्यां क्षिप्तस्तमस्यहम् ॥ ५५७ ॥

शास्त्रार्थं तद्विलासेन, विदन्नपि न वेद्म्यहम् ।
पठामि पाठयाम्यन्यं, व्याचक्षे शून्यचेतसा ॥ ५५८ ॥

तथाभूतस्य मे भ्रष्टं, सार्द्धं पूर्वचतुष्टयम् ।
शेषज्ञानं तु नो नष्टं, विपर्यस्तं तु मोहतः ॥ ५५९ ॥

अत्रान्तरे नदीपूर्णा, चित्तवृत्तौ च वाहिता ।
प्रमत्तताऽऽख्या, रिपुभिर्व्याक्षेपावर्तभीषणा ॥ ५६० ॥

गौरवाणि व्यजृम्भन्त, ततो मयि विशेषतः ।
कुभावनास्तदुत्कर्षान्ममाभूवन् सहस्रशः ॥ ५६१ ॥

सन्ति मे विपुला वस्त्रपात्रपुस्तकसम्पदः ।
महाजनानां नेताऽहं, प्राज्ञाः शिष्या ममेदृशाः ॥ ५६२ ॥

प्रत्यासीदन्ति मां सर्वाः, सिद्धयश्चाणिमादिकाः ।
इति प्राप्तर्द्धिदृप्तेन, मयेष्टाऽनागतापि सा ॥ ५६३ ॥

भोज्यं नीरसमुत्सृष्टं, भुक्तं च सरसं मया ।
बद्धा तत्र रतिर्लौल्यात्, प्रार्थनाऽनागतेऽपि च ॥ ५६४ ॥

सुखे शारीरके तोषः, -कृतः शय्यासनादिजे ।
मया प्राप्ते तथा लौल्यं, प्रवर्त्तितमनागते ॥ ५६५ ॥

गा(गौ)रवत्रयमग्नेन, तदानीमेवमादृतम् ।
शिथिलत्वं मया व्यक्तं, विहायोग्रविहारिताम् ॥ ५६६ ॥

आर्त्ताशयोऽप्याविरभूत्, ततो दुष्टविकल्पभूः ।
रौद्राशयस्तदा पार्श्वे, तस्यास्थाद् व्यापृतस्तु न ॥ ५६७ ॥

ततः समागताः कृष्णनीलकापोतसंज्ञकाः ।
दौःशील्यकारिकास्तिस्रो, लेश्यास्तत्परिचारिकाः ॥ ५६८ ॥

इतश्च चित्तविक्षेपो, मण्डपो वेदिका च सा ।
चित्तवृत्तौ कृता सज्जा, रिपुभिर्विष्टरं तथा ॥ ५६९ ॥

तिरोबभूवुश्चारित्रधर्मराजादयस्ततः ।
जातोऽहं मुनिवेषोऽपि, मिथ्यादृष्टिशिरोमणिः ॥ ५७० ॥

लब्धावकाशा रिपवः, स्वेच्छया व्यलसंस्तदा ।
आयुर्नामाऽथ सन्दिष्टो, भूपतिर्मम भार्यया ॥ ५७१ ॥

निरूपयोचितं स्थानमार्यपुत्रस्य साम्प्रतम् ।
तेनोक्तं दृष्टमेवास्ति, स्थानमस्योचितं मया ॥ ५७२ ॥

स कर्मपरिणामोऽस्य, विरक्तो दुश्चरित्रतः ।
पापोदयं पुरस्कृत्य, मोहसैन्येऽधुना गतः ॥ ५७३ ॥

पुरे तेनैकाक्षवासे, प्रेषितोऽहं ततश्च तौ ।
तीव्रमोहोदयात्यन्ताबोधावाकारितौ द्रुतम् ॥ ५७४ ॥

वेदनीये च कुपितश्चक्रेऽकिञ्चित्करं स तम् ।
त्वया मया च नेयोऽसौ, तत्र ताभ्यां समं ततः ॥ ५७५ ॥

अस्य त्रिभागमात्रेह, स्थितिरद्यापि तिष्ठति ।
तत् सिंहः कार्यतां पूर्णां, सामग्रीं गमनोचिताम् ॥ ५७६ ॥

स्वीकृत्य तद्वचस्तस्य, भवितव्यतया तथा ।
शेषैश्चारिभिरत्यन्तं, मार्गेऽहं शिथिलीकृतः ॥ ५७७ ॥

अलक्षितात्मा शारीरैर्दोषैरन्ते ततस्ततैः ।
जीर्णप्राचीनगुटिकः, समासाद्य परां गुटीम् ॥ ५७८ ॥

अलक्षितात्मा यातोऽहं, वनस्पत्याख्यपाटके ।
सौधापवरकन्यायात् तत्राहं सुचिरं स्थितः ॥ ५७९ ॥

आनीतोऽहं ततः शेषपाटकान्यपुरेषु च ।
पत्न्या कदाचित् पञ्चाक्षपशुस्थाने ततो धृतः ॥ ५८० ॥

ततो विशुद्धभावत्वाद् गतोऽहं विबुधालये ।
भूयो गमागमास्तत्र, बहवो विहितास्ततः ॥ ५८१ ॥

पञ्चाक्षपशुसंस्थानाद्, व्यन्तरादिषु भूरिशः ।
अकामनिर्जराजन्यभावशुद्धेरहं गतः ॥ ५८२ ॥

विशिष्टपरिणामेन, गतः कल्पोपगेष्वपि ।
सम्यक्त्वश्राद्धधर्माभ्यामष्टौ कल्पा मयेक्षिताः ॥ ५८३ ॥

कर्माकर्मान्तरद्वीपभूमिजेषु नृषु स्थितः ।
आगत्य मानवावासे, स्वर्लोके बहुशो गतः ॥ ५८४ ॥

अकार्षं कृत्यमज्ञानादुत्पन्नः कर्मभूमिषु ।
पञ्चाग्नितपनाद्यं यद्, यच्चाम्बुपतनादिकम् ॥ ५८५ ॥

धर्मबुद्ध्याऽन्यथा चान्तर्भावशुद्ध्यनुवेधतः ।
ततोऽहं किल्बिषावासे, गतो व्यन्तरपाटके ॥ ५८६ ॥

कृत्वा बालतपः क्रोधी, तपो गौरवभाग् गतः ।
भवनस्थेषु भूत्वा च, ज्योतिश्चारिषु तापसः ॥ ५८७ ॥

प्राप्य भागवतीं दीक्षां, क्रियाभ्यासपरायणः ।
ध्यानमौनतपोयोगशीलसंयमयत्नवान् ॥ ५८८ ॥

गतोऽश्रद्धानदुष्टात्मा, सर्वग्रैवेयकेष्वपि ।
आगतो मनुजावासं, भूयो भूयोऽन्तराऽन्तरा ॥ ५८९ ॥

इयतो भ्रमणस्यैव, विद्धि पद्माक्षि ! कारणम् ।
तत् सिंहाचार्यभवे यत्, कृतं चारित्रखण्डनम् ॥ ५९० ॥

शैथिल्यं नाकरिष्यं चेत्, सिंहाचार्यपदस्थितः ।
तदैव हत्वाऽरितीरगमिष्यं शिवालयम् ॥ ५९१ ॥

इयद्भ्रमणदुःखं यन्मम जातं वरानने ! ।
तदेतन्निजदुर्भार्याप्रेरणाजनितं फलम् ॥ ५९२ ॥

अथागृहीतसंकेता, प्राह तात ! न केवलम् ।
इयत् किन्तु त्वया प्रोक्तमखिलं त्वद्विजृम्भितम् ॥ ५९३ ॥

पूर्वमेवाभविष्यश्चेत्, सुस्थिताज्ञास्थिरादरः ।
ततो दीर्घाऽभविष्यत् ते, नैषाऽनर्थपरम्परा ॥ ५९४ ॥

प्राह संसारिजीवोऽथ, सुभ्रु ! चारूदितं त्वया ।
नाम्नाऽगृहीतसंकेता, भावतस्त्वसि पण्डिता ॥ ५९५ ॥

अथाकर्णय तद् येन, जातोऽहं तस्कराकृतिः ।
प्राहागृहीतसंकेता, निवेदय महाशय ! ॥ ५९६ ॥

संसारिजीवो न्यगददन्त्यग्रैवेयकात् ततः ।
आनीतोऽहं नृगत्यन्तःस्थितां क्षेमाऽभिधां पुरीम् ॥ ५९७ ॥

मध्ये महाविदेहस्य, हट्टमार्गस्य सा स्थिता ।
रम्ये सुकच्छविजयस्थाने विस्तारशालिनि ॥ ५९८ ॥

युगन्धरस्य नृपतेः, पुत्रस्तत्रोरुविक्रमः ।
नलिनीनन्दनश्चक्री, पितरि द्यां गतेऽभवम् ॥ ५९९ ॥

क्षेमपुर्यां स्थितेनैव, मया धाम्ना जिता मही ।
भुक्ताश्च विपुला भोगा, बिभ्रता चक्रवर्तिताम् ॥ ६०० ॥

अशीतिं पूर्वलक्षाणि, चतुर्भिरधिकामहम् ।
भुक्त्वा राज्यसुखं काले, पश्चिमे चारुलोचने ! ॥ ६०१ ॥

स्वपुर्या निर्गतः स्वीयविजयोर्वीदिदृक्षया ।
भ्रान्त्वा वसुन्धरां शङ्खनगरेऽस्मिन् समागतः ॥ ६०२ ॥

इदं चित्तरमोद्यानं, नृपैः कतिपयैर्युतः ।
पश्चात् कृत्वा बलं शेषं, संप्राप्तो नन्दनोपमम् ॥ ६०३ ॥

इतश्च यान्यभूवन्मे, गुणधारणजन्मनि ।
आद्यधर्मप्रदः कन्दमुनिर्मित्रं कुलन्धरः ॥ ६०४ ॥

भार्या च रम्या मदनमञ्जरी हन्त तान्यपि ।
भ्रमितान्यद्भुतै रूपैर्भवितव्यतया भवे ॥ ६०५ ॥

कृताद् बहुलिकासङ्गात्, ततः कन्दमुनिः क्वचित् ।
सुकच्छविजयेऽत्रैवानीतो हरिपुरे तया ॥ ६०६ ॥

सुभद्राया भीमरथराज्ञ्याः कुक्षौ प्रवेशितः ।
जाता पुत्री कृतं तस्या, महाभद्रेति नाम च ॥ ६०७ ॥

भ्राता समन्तभद्रोऽभूत्, तस्या लात्वा स च व्रतम् ।
सुखोपमगुरोः पार्श्वे, द्वादशाङ्गधरोऽभवत् ॥ ६०८ ॥

ज्ञात्वा योग्यं पदे स्वीये, स्थापयामास तं गुरुः ।
महाभद्राऽपि संप्राप्ता, यौवनं युवमोहनम् ॥ ६०९ ॥

करेऽग्रहीत् तां गन्धर्वपुरनाथो दिवाकरः ।
रविप्रभस्य भूपस्य, पद्मावत्याश्च नन्दनः ॥ ६१० ॥

दैवादसौ गतोऽस्तं सा, प्रतिबोध्य च लम्भिता ।
दीक्षां समन्तभद्रेण, जाता चैकादशाङ्गभृत् ॥ ६११ ॥

प्रवर्तिनी कृता दक्षा, गीतार्था गुरुभिस्ततः ।
अन्यदा विहरन्ती सा, पूज्या रत्नपुरं ययौ ॥ ६१२ ॥

राजा मगधसेनोऽभूत्, तत्र देवी सुमङ्गला ।
इतश्च तत्सुतात्वेन, जाता मदनमञ्जरी ॥ ६१३ ॥

कृतं सुललितेत्यस्या, नाम सा प्राप्य यौवनम् ।
पुरुषद्वेषिणी जाता, नेष्टः कोऽपि तया वरः ॥ ६१४ ॥

अभूतां जननीतातौ, तच्चिन्तादग्धमानसौ ।
श्रुत्वा मान्यां महाभद्रामागतां मुदितौ हृदि ॥ ६१५ ॥

गतावादाय तनयां, तां प्रणन्तुमुपाश्रये ।
धर्मलाभस्तया दत्तः, प्रदत्ता धर्मदेशना ॥ ६१६ ॥

तद्वचोऽबुध्यमानाऽपि, तस्यां स्नेहमुपागता ।
पूर्वाभ्यासात् सुललिता, स्थिता तन्मुखदत्तदृग् ॥ ६१७ ॥

अथ सा विततस्नेहकल्लोलाक्रान्तमानसा ।
स्थास्याम्येतां विना नाहमित्यभिग्रहमग्रहीत् ॥ ६१८ ॥

प्रतिश्रुतं च कष्टेन, पितृभ्यामपि तद्वचः ।
स्वीकारितं च न ग्राह्या, प्रव्रज्याऽस्मदपृच्छया ॥ ६१९ ॥

अथ साऽनु महाभद्रां, विजहार तमोभिदम् ।
कर्मोदयान्न बोधोऽस्या, जायते च स्फुटः परम् ॥ ६२० ॥

महाभद्रा शङ्खपुरे, समायाताऽन्यदा स्थिता ।
नन्दस्य श्रेष्ठिनो घङ्घशालायां शीलशालिनी ॥ ६२१ ॥

इतः शङ्खपुरेऽभून्मे, श्रीगर्भो मातुलो नृपः ।
देवी कमलिनी तस्य, महाभद्रापितृष्वसा ॥ ६२२ ॥

उपचारानपत्यार्थं, साऽनपत्याऽकरोद् बहून् ।
औषधीमूलपानादींस्तत्कुक्षावागतस्ततः ॥ ६२३ ॥

कुलन्धरः कृतशुभाभ्यासो बहुषु जन्मसु ।
तया दृष्टस्तदा स्वप्नो, यथा कोऽपि शुभाकृतिः ॥ ६२४ ॥

प्रविश्य मे मुखेनाङ्गे, निर्गत्य च गतः क्षणात् ।
नरेण केनचित् सार्धं, भर्त्रे स कथितस्तया ॥ ६२५ ॥

तेनोक्तं ते सुतो भावी, केवलं प्रव्रजिष्यति ।
शीघ्रं कश्चिद् गुरुं प्राप्य, तच्छ्रुत्वा सा दधौ मुदम् ॥ ६२६ ॥

जातस्तृतीये मासेऽस्याः, शुभकर्ममनोरथः ।
संपूरितोऽसौ श्रीगर्भराजेनातुलसम्पदा ॥ ६२७ ॥

असूत सा सुतं पूर्णे, काले रुचिरलक्षणम् ।
संतुष्टोऽचीकरद् राजा, तस्य जन्ममहोत्सवम् ॥ ६२८ ॥

गुरुः समन्तभद्राख्यो, जातनिर्मलकेवलः ।
इतः समागतोऽत्रैव, स्थितश्चित्तरमे वने ॥ ६२९ ॥

इतः सुललिताऽज्ञाता, वन्दितुं तं प्रवर्तिनी ।
गता कथञ्चित् तत्राभूद्, वार्ता पुत्रस्य भूभुजः ॥ ६३० ॥

उक्तं भगवताऽभ्यस्तसत्कर्मा बहुशो ह्ययम् ।
न स्थास्यति गृहे दीक्षां, लात्वा भावी श्रुतार्थवित् ॥ ६३१ ॥

तदाकर्ण्य महाभद्रा, हृष्टा स्वोपाश्रये गता ।
इतश्च राजपुत्रस्य, तस्य नाम प्रतिष्ठितम् ॥ ६३२ ॥

पुण्डरीक इति स्पष्टं, कृतस्तत्करणोत्सवः ।
इतश्च सा सुललिता, कुतूहलपरायणा ॥ ६३३ ॥

विचरन्ती वने तत्र, गता सूरिं स्म पश्यति ।
वर्णयन्तं गुणान् भाविभद्रस्य नृपजन्मनः ॥ ६३४ ॥

शुभेन कर्मणा कालपरिणत्याऽनुकूलया ।
अयं हि नृगतौ पुर्यां, जातः श्रेयांसि लप्स्यते ॥ ६३५ ॥

यदयं भव्यपुरुषः सुमतिश्चेति युज्यते ।
श्रेयोयोगोऽत्र तच्छ्रुत्वा, दधुः सर्वे जना मुदम् ॥ ६३६ ॥

दध्यौ सुललिता त्वन्तर्जनकाम्बादिगोचरः ।
कोऽयं भेदः कथं चैष, वेत्ति भाविगुणोच्चयम् ॥ ६३७ ॥

इति शङ्कापरा गत्वा, वसतिं सा प्रवर्तिनीम् ।
पप्रच्छ साऽतिमुग्धां तां, ज्ञात्वा युक्त्याऽर्थमाह तम् ॥ ६३८ ॥

अस्याः सदागमप्रीतिं, तनोमीति विचिन्त्य च ।
सदागमस्यावितथं, कथयामास गौरवम् ॥ ६३९ ॥

उक्तार्थप्रत्ययार्थं च, तत्संस्तवमकारयत् ।
दिनानि यान्त्यथ तयोर्भगवत्पादसेवया ॥ ६४० ॥

लङ्घिते मासकल्पेऽथ, सूरिराह प्रवर्तिनीम् ।
क्षीणजङ्घाबलाऽसि त्वं, तत् तिष्ठात्रैव धीमति ! ॥ ६४१ ॥

वयं पुनः समेष्यामः, प्रतिजागरणाय ते ।
क्षेत्रे साध्वीश्रिते वस्तुं, कारणं हीदमेव नः ॥ ६४२ ॥

आबाल्यात् स्नेहलो बाढं, कर्तव्यश्च नृपाङ्गजः ।
त्वया यद् वर्धमानोऽसौ, मम शिष्यो भविष्यति ॥ ६४३ ॥

महाभद्रा गुरुवचस्तत् तथा प्रत्यपद्यत ।
विहृता गुरवः प्राप्तः पुण्डरीकः कुमारताम् ॥ ६४४ ॥

बभूवाथ महाभद्रास्नेहवश्यो गुणैकभूः ।
आचार्याः पुनरायातास्तत्पार्श्वे तं निनाय सा ॥ ६४५ ॥

भाविभद्रतया हृष्टः, स तन्मूर्तिनिरीक्षणात् ।
रञ्जितस्तद्गुणव्रातैः, प्रीतस्तद्वचनामृतैः ॥ ६४६ ॥

संपप्रच्छे महाभद्रां, किं नामायं महाशयः ।
साऽऽह भद्र ! भवद्भूतभाविज्ञोऽयं सदागमः ॥ ६४७ ॥

स प्राह चित्ते यद्यम्बाताततयोः प्रतिभाति मे ।
तदागमार्थं गृह्णामि, गुरोरस्यैव सन्निधौ ॥ ६४८ ॥

महाभद्राऽथ तं भावं, श्रीगर्भाय महीभुजे ।
जगाद कमलिन्यै च, जातो हर्षस्तयोर्महान् ॥ ६४९ ॥

दत्तस्ताभ्यां भगवतः, स महाभद्रया सह ।
सततं याति तत्पार्श्वे, कुरुतेऽभ्यासमागमे ॥ ६५० ॥

व्याचक्षाणेऽन्यदाऽऽचार्ये, धर्मं शृण्वत्सु देशनाम् ।
महाभद्रासुललितापुण्डरीकेषु भाविषु ॥ ६५१ ॥

लोके धर्मकथाऽऽक्षिप्ते, बलकोलाहलो मम ।
समुल्ललास तच्छ्रुत्वा, पर्षदुत्कर्णिताऽखिला ॥ ६५२ ॥

ततः सुललिता प्राह, महाभद्रामिदं तु किम् ।
सा प्राह नास्मि जानामि, जानाति भगवान् परम् ॥ ६५३ ॥

अथ प्रभुः सुललितापुण्डरीकप्रबुद्धये ।
इमं रूपकगूढार्थमाचचक्षे विचक्षणः ॥ ६५४ ॥

महाभद्रे ! न जानीषे, ख्यातेयं नृगतिः पुरी ।
महाविदेहरूपोऽयं, हट्टमार्गोऽत्र विश्रुतः ॥ ६५५ ॥

चौरः संसारिजीवोऽत्र, सलोप्त्रो दाण्डपाशिकैः ।
राज्ञे क्रूराशयैः कर्मपरिणामाय दर्शितः ॥ ६५६ ॥

तेन वध्यतयाऽऽज्ञप्तः, पृष्ट्वा भार्यां च बान्धवान् ।
कोलाहलैः प्रसृमरैर्वेष्टितो राजपुरुषैः ॥ ६५७ ॥

बहिः पुर्या विनिस्सार्य, हट्टमार्गस्य मध्यतः ।
नीत्वा वध्यस्थले पापिपञ्जरे मारयिष्यते ॥ ६५८ ॥

श्रूयते कर्णनिर्घाती, सोऽयं कोलाहलो महान् ।
प्राप्ता सुललिताऽऽश्चर्यं, तत् श्रुत्वाऽऽह प्रवर्तिनीम् ॥ ६५९ ॥

नृगतिर्नगरी नेयं, ननु शङ्खपुरं ह्रदः ।
वनं चित्तरमं चेदं, हट्टमार्गो न विस्तृतः ॥ ६६० ॥

न कर्मपरिणामोऽत्र, राजा श्रीगर्भ एव तु ।
अबद्धं भगवान् बुद्धे ! किमित्येवं प्रभाषते ॥ ६६१ ॥

भगवानाह जानीषे, परमार्थं न मे गिराम् ।
भद्रेऽगृहीतसंकेता, ततस्त्वमसि निश्चितम् ॥ ६६२ ॥

सा दध्यौ हा ममाप्यन्या, कृता भगवताऽभिधा ।
स्थितेति विस्मिता भावं महाभद्रा त्वलक्षयत् ॥ ६६३ ॥

नूनमेष महापापो, निर्दिष्टो नरकं गमी ।
जीवो भगवता तस्याः संजाता महती कृपा ॥ ६६४ ॥

पप्रच्छ भगवन्तं सा, मुच्येतासौ कथञ्चन ।
स प्राह दर्शनात् तेऽस्य, मोक्षः स्याच्छ्रयणाच्च नः ॥ ६६५ ॥

महाभद्राऽऽह भगवंस्तद्, गच्छाम्यस्य संमुखम् ।
भगवानाह गच्छाशु, सफलोऽयं तवोद्यमः ॥ ६६६ ॥

ततः कृपापरा याता, महाभद्रा मदन्तिकम् ।
उक्तश्चाहं तया त्राणं, भज भद्र ! सदागमम् ॥ ६६७ ॥

नो चेदाभ्यन्तरं चौरं, नीत्वा त्वां पापिपञ्जरे ।
कदर्थयिष्यन्ति कर्मपरिणामस्य पूरुषाः ॥ ६६८ ॥

इत्युक्तवत्या नीतोऽहं, तया भगवदन्तिकम् ।
दृष्टश्चौराकृतिश्चैवं, वध्यः सकलपर्षदा ॥ ६६९ ॥

पश्यतो भगवन्तं मेऽनाख्येयसुखमञ्जनात् ।
मूर्च्छाऽऽगताऽथ शुद्ध्यासौ, मयाऽसौ शरणीकृतः ॥ ६७० ॥

आश्वासितो भगवता, मा भैषीरित्यहं ततः ।
मत्तोऽमी राजपुरुषा, दूरीभूताश्च तद्भिया ॥ ६७१ ॥

ततो विश्रम्भमाप्तोऽहं, पृष्टो व्यतिकरं त्वया ।
कथितश्च मया स्वीयवृत्तान्तो विस्तरादयम् ॥ ६७२ ॥

वार्ता समन्तभद्रादेस्त्वत्प्रतीताऽपि योदिता ।
सा त्वत्प्रत्ययसिद्ध्यर्थं, तज्जातः प्रत्ययस्तव ॥ ६७३ ॥

सा प्राह बाढं जातो मे, प्रत्ययो वचने तव ।
परं त्वं चक्रवर्ती चेत्, किमीदृगिति मे वद ॥ ६७४ ॥

स प्राह भद्रे ! युवयोः, प्रतिबोधाय निर्मितम् ।
मयेदं तास्करं रूपं, प्रोक्तं भगवता यतः ॥ ६७५ ॥

भवतां पुरतश्चौर्यं, समुद्दिश्याहमान्तरम् ।
चौरः संसारिजीवोऽयं, वध्यो नीयत इत्यहो ॥ ६७६ ॥

मया गतायां च महाभद्रायां मम सम्मुखम् ।
तद्दर्शनात् प्रबुद्धेन, मनसीदं विचिन्तितम् ॥ ६७७ ॥

यद्यप्येषा महाभद्रा, जानात्येव गुरूदितम् ।
प्रज्ञाविशाला सकलं, चौर्यमाभ्यन्तरं मम ॥ ६७८ ॥

वार्ताया गन्धमप्यस्या, वेत्त्यद्यापि तथाऽपि न ।
अगृहीतार्थसङ्केता, मुग्धा सुललिता ततः ॥ ६७९ ॥

विप्रत्ययो भवेद् दृष्ट्वा, रूपं मे चक्रवर्तिनः ।
सदागमवचस्यस्या, उक्तव्यत्ययशङ्कया ॥ ६८० ॥

किं चासौ पौण्डरीकोऽपि, प्रतिबुद्धो भविष्यति ।
एतन्मदीयवृत्तान्तं, श्रुतिद्वारैव भावुकः ॥ ६८१ ॥

इति ध्यात्वा कृतं रूपमन्तश्चौर्यस्य सूचकम् ।
वैक्रियर्द्ध्या बहिरपि, स्फुटमेवंविधं मया ॥ ६८२ ॥

जगौ सुललिता कीदृग्, भावचौर्यं कृतं त्वया ।
कथं वा परवृत्तान्तं, जानासीत्यखिलं वद ॥ ६८३ ॥

अथानुसुन्दरोऽवादीदन्त्यग्रैवेयकादहम् ।
सुकच्छविजये क्षेमपुर्यां जातो महोदयः ॥ ६८४ ॥

अत्रान्तरे महामोहादयः प्रत्यर्थिनो मम ।
भवितव्यतया लब्ध्वा, छलं प्रोत्साहिता इति ॥ ६८५ ॥

दूरस्थो यावदेषोऽस्ति, सम्यक्त्वादनुसुन्दरः ।
तावत् सर्वबलं कृत्वा, यतध्वं स्वार्थसिद्धये ॥ ६८६ ॥

अन्यथा स्वबलं लब्ध्वा, प्राग्वदेष भविष्यति ।
बाधाकृद् वस्तदधुना, किङ्करीक्रियतामयम् ॥ ६८७ ॥

ततस्तत्प्रेरितैर्बाढं, वल्गद्भिरनियन्त्रितैः ।
वशीकृतस्तैराबाल्यादहं तन्मयतां गतः ॥ ६८८ ॥

ततस्तैः स्वीयवीर्येण, कृतः पापपरायणः ।
कौमारे वर्तमानोऽहं, मद्यमांसरतोऽभवम् ॥ ६८९ ॥

प्रसह्य पारदार्यादौ, प्रवृत्तौ यौवने प्रभुः ।
चक्रित्वे सेविता दोषाः, पापर्द्ध्याद्याः सहस्रशः ॥ ६९० ॥

ततो लब्धप्रचारैस्तैर्नितरां मलिनीकृता ।
द्विषद्भिः चित्तवृत्तिर्मे, सुहृत्सैन्यं तिरस्कृतम् ॥ ६९१ ॥

तिरोहितं च क्षान्त्यादिशुच्यन्तःपुरमान्तरम् ।
राज्याद् बहिष्कृतश्चाहं, कर्मवीर्यं प्रकाशितम् ॥ ६९२ ॥

तदा पापोदयो दीप्तो, मोहसैन्यं प्रवल्गितम् ।
जातानि तत्पुरादीनि, वो(चो)ढा स्निन्धुः प्रमत्तता ॥ ६९३ ॥

विस्तृतं तद्विलसितं पुलिनं मण्डपो नवः ।
उद्भूतश्चित्तविक्षेपस्तृष्णाऽभूद् वेदिकाऽद्भुता ॥ ६९४ ॥

संस्कृतं च विपर्यासविष्टरं परिपोषिता ।
अविद्याऽऽख्या गात्रयष्टिर्महामोहेन भूभुजा ॥ ६९५ ॥

सर्वथैव नवीभूता, सामग्री सकला द्विषाम् ।
पर्यालोचस्ततोऽमीषां, जातः स्वेष्टफलाश्रयः ॥ ६९६ ॥

जगाद तत्र विषयाभिलाषः सचिवाग्रणीः ।
दृष्टदाहाः पुरा यूयं, किन्तु वः कथ्यतेऽधुना ॥ ६९७ ॥

स्वक्षतिं प्राक्तनीं प्रेक्ष्य, मन्दादरकृताद् रणात् ।
युष्माकं साम्प्रतं कर्तुं, युक्तो मन्दोऽत्र नादरः ॥ ६९८ ॥

तीव्रादरेण तद् यूयं, यतध्वमधुनाऽखिलाः ।
यथा निष्कण्टकं राज्यं, भवेदाकालनिश्चलम् ॥ ६९९ ॥

प्रतिभातं वचस्तेषां, मन्त्रिणस्तत् ततश्च ते ।
तस्योपदेशमादृत्य, प्रेरयामासुराशु माम् ॥ ७०० ॥

तैः कर्मपरिणामस्य, क्षेत्रस्थं वर्गणोद्भवम् ।
अशस्ताख्यं द्रव्यजातं, ग्राहितोऽहं स्वयं बहु ॥ ७०१ ॥

तैरेव ज्ञापितः कर्मपरिणामस्य भूभुजः ।
अहं चौरतया तेनादिष्टमेष विडम्ब्यताम् ॥ ७०२ ॥

मार्यतां दुःखमारेण, नीत्वा द्राक् पापिपञ्जरे ।
मुदितास्ते दुरात्मानस्तदाकर्ण्य प्रभोर्वचः ॥ ७०३ ॥

ततश्च तैर्विलिप्तोऽहं, कर्माणुमलभस्मना ।
गात्रे गैरिकहस्तैश्च, चर्चितो राजसैस्ततैः ॥ ७०४ ॥

श्यामीकृतस्तृणमषीपुण्ड्रकैस्तामसैस्तथा ।
कणवीरस्रजा रागवीचिनाम्न्या विनाटितः ॥ ७०५ ॥

मूर्ध्नि पापौग्र्यसूर्पेण, हृदये घूर्णमानया ।
शरावमालया भ्रान्तिसन्तत्या च विडम्बितः ॥ ७०६ ॥

स्वरूपे निहिताशस्तकर्मलोप्त्रो गलोपमे ।
आरोपितोऽसदाचाराभिधे महति रासभे ॥ ७०७ ॥

क्रूराशयैर्यमसमैर्वेष्टितो राजपूरुषैः ।
कोलाहलैः कषायाख्यडिम्भानां प्रविसृत्वरैः ॥ ७०८ ॥

श्रूयमाणेन विरसडिण्डिमध्वनिना तथा ।
शब्दादिभोगसंज्ञेन, निन्दया च विवेकिनाम् ॥ ७०९ ॥

बाह्यलोकविलासेन, खलहासेन भूयसा ।
निःसारितो वध्यभूमेः, संमुखं शून्यमानसः ॥ ७१० ॥

महाविदेहरूपेऽस्मिन्, हट्टमार्गे सुविस्तृते ।
आनीतो देशमेनं स्वदेशदर्शनकैतवात् ॥ ७११ ॥

श्रुतो युष्माभिरुच्चैर्मद्बलकोलाहलस्ततः ।
आगता मे महाभद्रा, संमुखं विपुलाशया ॥ ७१२ ॥

इतश्चाहं परित्यज्य, स्वसैन्यं पृष्ठतोऽखिलम् ।
वृतो नृपैः कतिपयैरुद्यानमिदमागतः ॥ ७१३ ॥

रक्ताशोकतले यावत्, स्थितस्योत्तीर्य वारणात् ।
राजपुत्रा विनीता मे, दर्शयन्ति वनश्रियम् ॥ ७१४ ॥

आगच्छन्ती मया तावन्महाभद्रा विलोकिता ।
तस्यां ममज्ज मे दृष्टिर्निवृत्त्य विषयान्तरात् ॥ ७१५ ॥

ववर्ष स्नेहपीयूषं, तस्यां मग्ना च दृग् मम ।
मयि स्नेहं दधौ पूर्वाभ्यासादेषाऽपि निःस्पृहा ॥ ७१६ ॥

ममाभ्यर्णमथ प्राप्ता, स्मरन्ती भगवद्वचः ।
अयं नरकगामीति, करुणापूर्णमानसा ॥ ७१७ ॥

ततः कदम्बमुनित्वेऽस्या, गुणधारणजन्मनि ।
चित्तार्पणान्मया भूयो, विनयाद्यनुशीलनात् ॥ ७१८ ॥

कृतश्चारुविमर्शोऽयं, केयं भगवती ननु ।
दृष्टमात्राऽपि याऽऽह्लादं, मानसे वितनोति मे ॥ ७१९ ॥

वपुर्निर्वापयत्यक्ष्णोः, पीयूषमभिवर्षति ।
ततोऽहं प्रणतोऽमुष्यै, धर्मलाभमियं ददौ ॥ ७२० ॥

जगाद च महाराज !, मानुष्ये मोक्षकारणे ।
प्राप्तेऽन्यत्र न गन्तुं ते, युक्तमुन्मार्गसंश्रयात् ॥ ७२१ ॥

नीयमानस्य चौरस्य, वध्यस्थाने स्वमन्तुना ।
किं राज्यं के विलासास्ते, किं वा स्वास्थ्यं विचिन्तय ॥ ७२२ ॥

किं च मद्दर्शनात् तस्या, जाता जातिस्मृतिस्तदा ।
सर्वं सोदन्तमाकन्दमुनिकालात् ततोऽस्मरत् ॥ ७२३ ॥

उत्पन्नमवधिज्ञानं, शुभभावात् तदाश्रयात् ।
तेन दृष्टं ममाप्युच्चैर्भगवत्या विचेष्टितम् ॥ ७२४ ॥

ततोऽसावाह राजेन्द्र !, किं न स्मरसि यत् तदा ।
लालितः प्रौढलीलाभिर्ममाग्रे गुणधारण ! ॥ ७२५ ॥

क्षान्त्याद्यन्तःपुरं प्राप्य, परमानन्दमेदुरः ।
भावराज्ये स्थितो यत् त्वं, तत् किं नु तव विस्मृतम् ॥ ७२६ ॥

किं न ते स्मृतिमायाति, विमलाचार्यभारती ।
भवप्रपञ्चो निखिलः, प्रोक्तोऽनन्तोऽपि ते यया ॥ ७२७ ॥

यत्प्रसादात् त्वया प्राप्तं, सुखं ग्रैवेयकादिषु ।
सदागमः स ते त्राणं, तत् प्रबुद्ध्यस्व मा मुहः ॥ ७२८ ॥

तवैवाहं प्रबोधाय, करुणार्द्रा समागता ।
विहाय चित्तशून्यत्वमन्तस्तत्त्वं विलोकय ॥ ७२९ ॥

अत्रान्तरे च प्रस्तावं, ज्ञात्वा मत्सम्मुखं पुनः ।
सम्यग्दर्शनसद्बोधावागन्तुं चक्रतुर्मनः ॥ ७३० ॥

दुष्टान्तरारिवर्गेण, संरुद्धौ तमसा पथि ।
विकुर्वितेन मे पार्श्वं, नागन्तुं शक्नुतः स्म तौ ॥ ७३१ ॥

सूर्यकान्तसमे दीप्ते, जीववीर्यवरासने ।
क्षीणं तमो भगवतीवाक्यसूर्यांशुभिश्च तत् ॥ ७३२ ॥

आयोधनं ततो लग्नं, चित्तवृत्तौ बलद्वये ।
सम्यग्दर्शनसद्‌बोधौ, हत्वाऽरीन् मामुपागतौ ॥ ७३३ ॥

ध्यातं मया भगवती, किमेषा परिजल्पति ।
ईहापोहं गतस्यैवं, जातिस्मृतिरभून्मम ॥ ७३४ ॥

गुणधारणकालीना, स्मृताऽवस्था शुभाशयात् ।
ततः सद्‌बोधमित्रं मामवधिः समुपागतः ॥ ७३५ ॥

असंख्येया मया दृष्टास्तद्‌बलाद् द्वीपवार्धयः ।
भवप्रपञ्चोऽसंख्येयः, साक्षादेव विलोकितः ॥ ७३६ ॥

सिंहाचार्यभवाभ्यस्तं, सर्वैरतिशयैः सह ।
निर्मलं पूर्वपर्यन्तं, प्रादुर्भूतं श्रुतं मम ॥ ७३७ ॥

स्मृतः संसारविस्तारो, निर्मलाचार्यकीर्तितः ।
असंख्येयः स्फुटं दृष्टस्तदारात्तु भवभ्रमः ॥ ७३८ ॥

धृत्वाऽहं तस्कराकारं, ततः पूर्वोक्तकारणात् ।
इहागतस्तदारात् तु, वार्ता ज्ञातैव ते मम ॥ ७३९ ॥

ततो भद्रे सुललिते !, ज्ञात्वा मदनमञ्जरीम् ।
त्वां प्रबोधयितुं मुग्धां, जातस्नेहकृपाभरः ॥ ७४० ॥

बहुमानाद् भवत्वस्याः, सर्वज्ञागमगोचरात् ।
तपस्विन्याः क्लिष्टकर्मक्षय इत्यवधारयन् ॥ ७४१ ॥

प्रभोः सदागमस्यास्य, प्रभावादखिलं ह्यदः ।
अहं वेद्मीति जनयन्, बहुमानं सदागमे ॥ ७४२ ॥

संक्षेपतोऽपि षण्मासवाच्यं माहात्म्यतः प्रभोः ।
सर्वं चरित्रं प्रहरत्रयेण स्म वदामि ते ॥ ७४३ ॥

तदिदं भावचौर्यं मे, ममेदृक् च विडम्बना ।
एवं च भद्रे ! जानामि, वृत्तान्तं स्वपराश्रयम् ॥ ७४४ ॥

श्रुत्वा चेदं सुललिता, विस्मिता भाविता हृदि ।
पौण्डरीकोऽपि भावार्थं, जग्राहैतद्गतं मनाक् ॥ ७४५ ॥

अवादीच्चार्य ! किञ्चित् तद्, वृत्तावस्ति तवाधुना ।
ततोऽनुसुन्दरेणोक्तं, यावत् संवेगमागतः ॥ ७४६ ॥

प्रक्रान्तोऽहं चरित्रं भो, वक्तुं स्वं भवतां पुरः ।
तावच्चारित्रधर्मोऽसौ, चलितो मम सम्मुखम् ॥ ७४७ ॥

तेन चागच्छता चारूकृतं सात्त्विकमानसम् ।
नगरं शुभ्रतां नीतो, विवेकगिरिपर्वतः ॥ ७४८ ॥

शिखरं चाप्रमत्तत्वं, कृतमुच्चैस्तरां शुचि ।
भूयोऽपि भूषितं जैनपुरमुत्तोरणावलि ॥ ७४९ ॥

स च चित्तसमाधानमण्डपः परिमण्डितः ।
सा च निःस्पृहता वेदिर्भूयः सज्जा विनिर्मिता ॥ ७५० ॥

कृतं तच्चोल्लसत्कान्ति जीववीर्यं वरासनम् ।
सर्वशक्त्या निजं सैन्यं, निखिलं परितोषितम् ॥ ७५१ ॥

महामोहबलं लग्नं, तस्य चागच्छतः पथि ।
सर्वप्राणेन तद् युद्धं, द्वयोर्दृष्टं स्फुटं मया ॥ ७५२ ॥

ततः सम्यक्त्वसद्बोधयुक्तेन स नृपो मया ।
जातः प्रदत्तावष्टम्भो, जयलक्ष्मीनिकेतनम् ॥ ७५३ ॥

चिरन्तनं हतारातिर्गृहीत्वाऽन्तःपुरं ततः ।
चारित्रधर्मराजेन्द्रो, मदभ्यर्णमुपागतः ॥ ७५४ ॥

द्विषस्ते हृतसर्वस्वाः किञ्चिच्छेषस्वजीविताः ।
लीनास्तिष्ठन्त्यदश्चित्तवृत्तावस्ति ममाधुना ॥ ७५५ ॥

अन्यच्च त्रिजगद्वन्द्यं, प्रपद्य जिनभाषितम् ।
लिङ्गं सम्प्रति बन्धूनां, वर्गः पोष्यो मयाऽऽन्तरः ॥ ७५६ ॥

एवं च वदता तेनानुसुन्दरमहीभुजा ।
संहृतं तास्करं रूपं, चक्रिरूपं स्फुटीकृतम् ॥ ७५७ ॥

कृतसंकेतभावेन, गता चौरविडम्बना ।
आगता मन्त्रिसामन्ताः, प्रोक्तस्तेभ्यो निजाशयः ॥ ७५८ ॥

प्राप्तकालतया तेषां, प्रतिभातः स मानसे ।
ततः पुरन्दरायादाद्, राज्यं चक्री स्वसूनवे ॥ ७५९ ॥

अर्हत्पूजादिकृत्यं च, निःशेषं तेन निर्मितम् ।
सपौरान्तःपुरो राजा, श्रीगर्भो निर्गतः पुरात् ॥ ७६० ॥

कृता च तेन सर्वेषां, प्रतिपत्तिर्निजोचिता ।
पुनः संमिलिता पर्षत्, प्रवृत्तः पृथुरुत्सवः ॥ ७६१ ॥

दृष्ट्वाऽद्भुतं सुललिता, क्षणात् तादृक् चमत्कृता ।
संजातः पौण्डरीकोऽपि, प्रीती विस्मितलोचनः ॥ ७६२ ॥

अथातिप्रार्थिते सूरौ, दीक्षां दातुं समुद्यते ।
राजपुत्रीं समुद्दिश्य, प्राह भूयोऽनुसुन्दरः ॥ ७६३ ॥

न जातः किं तवाद्यापि, बोधः सुललितेऽनघे ।
यद् दोलायितचित्ता त्वं, लक्ष्यसे चकितेक्षणा ॥ ७६४ ॥

त्वद्बोधार्थमयं भद्रे, मया निर्वेदकारकः ।
स्वीयः प्रकीर्त्तितः सर्वः प्रपञ्चो भवगोचरः ॥ ७६५ ॥

तदमेन श्रुतेनापि, किं ते चित्ते न जायते ।
संसारचारके पूर्णे, निर्वेदो दुःखराशिभिः ॥ ७६६ ॥

पुरे संव्यवहाराख्ये, मयोक्तं स्वविडम्बनम् ।
यत्र तत् किं त्वयाऽलक्षि, यद् दधासि भवे रतिम् ॥ ७६७ ॥

एकेन्द्रियादिभेदेषु, यश्च तिर्यक्षु कीर्तितः ।
मयाऽनुभूतो दुःखौघः, स त्वया किं न भावितः ॥ ७६८ ॥

यत् त्वं विलम्बसेऽद्यापि, त्यक्तुं संसारचारकम् ।
किं वा कथानिकामात्रमिदं ते प्रतिभासते ॥ ७६९ ॥

मोक्षसाधनयोग्येऽपि, लब्धे मनुजजन्मनि ।
हिंसाक्रोधवशेनाप्ता, यन्मया दुःखसन्ततिः ॥ ७७० ॥

तथा मानमृषावादस्तेयमायापरायणः ।
लोभमैथुनदोषान्धो, यदहं भ्रान्तवान् भवम् ॥ ७७१ ॥

तदप्याकर्ण्य चित्तं ते, यदि न द्रुतिमागतम् ।
कठोरं तदहं मन्ये, वज्रसारेण निर्मितम् ॥ ७७२ ॥

यन्न बुद्धा मया प्रोक्तौ, दुष्टौ मोहपरिग्रहौ ।
श्रुत्वाऽगृहीतसंकेतेत्युक्ता तेनासि भूरिशः ॥ ७७३ ॥

स्पर्शनादीन्द्रियाणां यः, प्रोक्तो बाले जडे तथा ।
मन्दे जडेऽतिविरसो, विपाको बालिशेऽपि च ॥ ७७४ ॥

सोऽपि चेन्न त्वया बुद्धो, वैराग्यफलशून्यया ।
काष्ठभूतमहं मन्ये, तन्नूनं तव मानसम् ॥ ७७५ ॥

इन्द्रियाणां जयाज्जातं, मनीषिणि विचक्षणे ।
यद् बुद्धे चोत्तमे चैव, कोविदे च यशः शुचि ॥ ७७६ ॥

तदाकलय्य यो नाम, संसारान्न विरज्यते ।
ततोऽधिको जगत्यस्ति, स्वार्थभ्रष्टो न कश्चन ॥ ७७७ ॥

चित्तवृत्तिस्थितं यत् ते, मया प्रोक्तं बलद्वयम् ।
आभ्यन्तरं सुहृद्बन्धुसमानं मुग्धमानसे ! ॥ ७७८ ॥

तद्विलासमपि श्रुत्वा, यदि न प्रतिबुद्ध्यसे ।
त्वद्बोधकरणोपायस्ततः खकुसुमोपमः ॥ ७७९ ॥

श्रुत्वा गरिष्ठां शिष्टत्वनिष्ठां कानकशेखरीम् ।
आलोच्य तादृशं धर्म्यमुत्साहं नारवाहनम् ॥ ७८० ॥

विमलं विमलस्येन्दुज्योत्स्नावच्च विजृम्भितम् ।
त्यागं हरिनरेन्द्रस्य, ध्यात्वा विस्मयकारणम् ॥ ७८१ ॥

विवेकमकलङ्कस्य, निष्कलङ्कं विचिन्त्य च ।
श्रुत्वा मुनीनां वैरागयकारणानि च नैकधा ॥ ७८२ ॥

यदि चित्तं न ते बाले !, विरक्तं भववासतः ।
ततः काङ्कटुकप्राया, वर्तसे नात्र संशयः ॥ ७८३ ॥

इत्थं ह्यबुध्यमाना त्वं, न रोषं गन्तुमर्हसि ।
वाचाऽगृहीतसंकेतेत्युच्यमाना बुधैर्जनैः ॥ ७८४ ॥

बाले ! मदनमञ्जर्या, दशायां यन्मया सह ।
भोगास्त्वया विलसिताः, पुण्योदयसमर्पिताः ॥ ७८५ ॥

भवत्या विस्मृतास्ते किं, यच्च बुद्धा जिनागमे ।
कुलन्धरान्विता कन्दमुनीन्दोस्तत्र वेत्सि किम् ॥ ७८६ ॥

प्राह यं विमलाचार्यः, केवली प्रकटाक्षरैः ।
भवप्रपञ्चमनन्तं, न विज्ञातस्त्वया स किम् ॥ ७८७ ॥

तदुक्तमेव संसारविस्तारं प्रत्यपादयम् ।
अमुना वाग्विलासेन, बुबोधयिषया तव ॥ ७८८ ॥

एकरूपोऽपि संसारिजीवोऽहं प्रविनाटितः ।
संसारे नाटकाकारे, नानाकारैः स्वकर्मणा ॥ ७८९ ॥

तदेनमपि चेच्छ्रुत्वा, महाव्यतिकरं मम ।
न निर्विण्णाऽसि संसारात्, तत् कुर्मः कां प्रतिक्रियाम् ॥ ७९० ॥

नगराण्यन्तरङ्गाणि, यानि ये तेषु भूभुजः ।
तद्देव्यो दश तत्कन्याः, प्रत्येकं तद्गुणाश्च ये ॥ ७९१ ॥

दिव्यः क्षान्त्यादिकन्यानां, विवाहो यश्च कीर्त्तितः ।
तत्राष्टौ मातरो याश्च, व्युत्पत्त्यर्थं निवेदिताः ॥ ७९२ ॥

तदेतदखिलं श्रुत्वा, यदि बाले ! न बुद्ध्यसे ।
तदा पाषाणभूतायास्तव किं कथ्यतेऽधिकम् ॥ ७९३ ॥

किं न स्मरसि तन्मुग्धे ! निर्मलाचार्यसन्निधौ ।
मत्प्रेमपारतन्त्र्याद् यत्, प्रतिपन्नाऽसि संयमम् ॥ ७९४ ॥

कृत्वा ततस्तपः स्वर्गे, प्राप्ताऽसि सुखसन्ततिम् ।
इहागता परिभ्रम्य, भूयोऽपि भवचक्रके ॥ ७९५ ॥

अपार्द्धपुद्गलावर्तं, सम्यग्दर्शनदूषणात् ।
जिनाद्याशातनातश्च, यद् भ्रान्तोऽहं भवोदधौ ॥ ७९६ ॥

चतुर्दशापि पूर्वाणि, विज्ञाय मदगौरवात् ।
यच्च भूयो निगोदादौ, गत्वाऽहं दुःखितोऽभवम् ॥ ७९७ ॥

तदप्याकर्ण्य चित्तं ते, नाभूत् किं रसपिच्छलम् ।
यत्संवेगाङ्कुरोद्भेद, इहाद्यापि न दृश्यते ॥ ७९८ ॥

सूक्ष्मबोधेन वाक्यार्थं, मामकीनमवेहि तत् ।
बालिके ! मा विलम्बस्व, श्रमं मे सफलीकुरु ॥ ७९९ ॥

तत्रानुसुन्दरनृपे, वदत्येवं स मूर्च्छितः ।
पौण्डरीकः पपातोर्व्यां, जाता पर्षत् ससंभ्रमा ॥ ८०० ॥

श्रीगर्भो व्याकुलीभूतः, शोकं कमलिनी ययौ ।
आश्वासितोऽनिलैः सोऽथ, प्रबुद्धः पितरं जगौ ॥ ८०१ ॥

अनुसुन्दरराजोऽयं, स्वस्य पूर्वं त्वदागमात् ।
वैक्रियं तास्करं रूपं, बिभ्रत् प्रोचे भवभ्रमम् ॥ ८०२ ॥

अनाख्येयस्ततोऽभून्मे, बुद्ध्यमानस्य सम्मदः ।
चैतन्यनिःसहस्याथ, जाता जातिस्मृतिः स्फुटा ॥ ८०३ ॥

प्राग्भवेऽभूवमस्याहं, मित्रं नाम्ना कुलन्धरः ।
तदा भवप्रपञ्चोऽस्य, श्रुतो निर्मलसूरितः ॥ ८०४ ॥

स एवायमनेनेत्थंमाख्यात इति भावनात् ।
विरक्तोऽहं भवावासादनुजानीत तेन माम् ॥ ८०५ ॥

येन गृह्णाम्यहं दीक्षामनेनैव सहाद्भुताम् ।
तदाकर्ण्य प्ररुदिता, कमलिन्युग्रदुःखतः ॥ ८०६ ॥

प्राह श्रीगर्भराजोऽथ, मा रोदीर्देव्ययं यतः ।
शुद्धधर्मकरो जातः, स्वप्नस्यैवानुसारतः ॥ ८०७ ॥

तन्नास्य धारणं युक्तमनुव्रजनमावयोः ।
घटते किन्तु निर्मिथ्यस्नेहसूचनचञ्चुरम् ॥ ८०८ ॥

बालश्चेत् कुरुते धर्ममेष भोगोर्मिसंमुखः ।
स्थातुं न युक्तं तद्भोगोत्तीर्णयोरावयोर्भवे ॥ ८०९ ॥

ततः कमलिनी प्राह, प्रतिभातमिदं मम ।
चारूदितं त्वया राजन् !, युक्तमेतत् किलावयोः ॥ ८१० ॥

ततोऽनुज्ञाय पुत्रं तं, तौ देवीक्षितिवासवौ ।
गृहीतुमुद्यतौ दीक्षामभूतां दृढनिश्चयौ ॥ ८११ ॥

अथ भूपसुता सा तैरनुसुन्दरभाषितैः ।
द्राविता प्रेक्ष्य चोद्भ्रान्ता, पुण्डरिकादिचेष्टितम् ॥ ८१२ ॥

प्रत्यब्रवीन्महाभद्रां, साऽनुतापा कृताञ्जलिः ।
किं कृतं प्राग् मया पापं, येन जाताऽहमीदृशी ॥ ८१३ ॥

धन्यो राजसुतोऽयं यो, बुद्धो भवकथामिमाम् ।
श्रुत्वा पापा न बुद्ध्येहं, बोद्धुकामाऽपि किं ततः ॥ ८१४ ॥

त्रयाणामपि धन्यानां, प्रत्ययो ज्ञानपूर्वकः ।
एषां स्फुटः प्रादुरभूदनुसुन्दरवाक्यतः ॥ ८१५ ॥

अहं पुनर्न जानेऽस्मिन्, मामुद्दिश्य वदत्यपि ।
शून्या ग्रामेयकाकारा, किं करोम्यन्धसन्निभा ॥ ८१६ ॥

महाभागे ! स्वयं ज्ञात्वा, पृष्ट्वा यद्वा सदागमम् ।
तदिदं कस्य पापस्य, चेष्टितं मेऽखिलं वद ॥ ८१७ ॥

ततस्तां तादृशीं दृष्ट्वा, बाष्पपिच्छललोचनाम् ।
कृपार्द्रः क्षितिभृत्पुत्रीमब्रवीदनुसुन्दरः ॥ ८१८ ॥

मुग्धे ! जिज्ञासितं भावमहमेव ब्रवीमि ते ।
भगवत्या श्रमितया, सृतमत्र प्रयोजने ॥ ८१९ ॥

गुणधारणराजेन, मया मदनमञ्जरी ।
सार्द्धं प्रव्रजिताऽभूस्त्वं, तदाऽभ्यस्तः क्रियाभरः ॥ ८२० ॥

तप्तं त्वया तपस्तीव्रं, धृतेयं किन्तु दुर्मतिः ।
इष्टं यदेकं तत् कार्यं, किं प्रपञ्चेन भूयसा ॥ ८२१ ॥

ततः स्वाध्यायपाठस्ते, हृदये न सुखायितः ।
रुचिता वाचना नोच्चैः, प्रच्छना नानुशीलिता ॥ ८२२ ॥

न परावर्तनाऽभीष्टा, नानुप्रेक्षाऽप्यनुष्ठिता ।
न धर्मदेशना दत्ता, प्रचला परिशीलिता ॥ ८२३ ॥

स्वाध्यायोद्वेगतो मौनव्रतमेवादृतं परम् ।
न तत्राभिनिवेशोऽभून्न कृता प्रत्यनीकता ॥ ८२४ ॥

नान्तरायः कृतो ज्ञाने, न तद्घातोऽपि निर्मितः ।
तत्प्रद्वेषो न विहितो, न तस्याकारि निह्नवः ॥ ८२५ ॥

केवलं ज्ञानशैथिल्यात्, प्रमादाद् दुर्द्धिया तया ।
कृता लघीयसी सेयं, श्रुतस्याशातना त्वया ॥ ८२६ ॥

यत्प्रभावादसंख्येयं, कालं भ्रान्ता भवोदधौ ।
जाता चैवंविधाऽसि त्वं, जडधीरविशेषवित् ॥ ८२७ ॥

भावाः किं चानुवर्तन्ते, प्राग्भवाभ्यासतोऽङ्गिनाम् ।
पुरुषद्वेषिणी जाता, यत् त्वं मदनमञ्जरी ॥ ८२८ ॥

तथेहापि तथाभावाद्, ब्रह्मचर्यैकनिष्ठिता ।
उच्चैराकारिताऽसि त्वं, ब्राह्मणीति सखीजनैः ॥ ८२९ ॥

तत्किं मिलति ते वृत्तं, प्रोचे सुललिता ततः ।
आर्य ! किं न मिलत्यत्र, भवद्वचनविस्तरे ॥ ८३० ॥

केवलं मन्दभाग्याऽहं, तिष्ठामि तमसा वृता ।
वितन्यमानेऽप्यालोके, त्वद्वचोरविरश्मिभिः ॥ ८३१ ॥

इत्युक्त्वा कर्मपङ्कस्य, क्षालनायैव बद्धधीः ।
प्रवृत्ता वर्षितुं बाला, विस्तारि नयनोदकम् ॥ ८३२ ॥

ततोऽनुसुन्दरः प्रोचे, मुञ्च खेदं नृपाङ्गजे ! ।
क्षीणप्रायान्तरायाऽसि, कुरु भक्तिं सदागमे ॥ ८३३ ॥

तत्त्वज्ञानमदो भक्तिमूलमेव हि देहिनाम् ।
धन्याऽसि त्वं समायाता, या सदागमसन्निधौ ॥ ८३४ ॥

ततः सुललिताऽमीभिर्वचोभिः पाविताशया ।
सदागमोऽयमित्युच्चैः, पतिताऽऽचार्यपादयोः ॥ ८३५ ॥

जगाद च जगन्नाथ !, त्वमेव शरणं मम ।
अज्ञानपङ्कमग्नायास्त्वमेवोद्धारकारकः ॥ ८३६ ॥

सदागमस्य माहात्म्यात्, ततः संवेगगौरवात् ।
चेतःप्रह्वतया चास्या, बहु कर्म क्षयं गतम् ॥ ८३७ ॥

जाता जातिस्मृतिर्दृष्टो, वृत्तान्तः प्राग्भवाश्रयः ।
पपातोत्थाय हृष्टाऽथ, साऽनुसुन्दरपादयोः ॥ ८३८ ॥

जगाद च प्रसादात् ते, भगवत्संनिधेस्तथा ।
जातिस्मृतिर्ममोत्पन्ना, निर्विण्णाऽस्मि भवोदधेः ॥ ८३९ ॥

मन्दभाग्यामपि भवान्, भगवांश्चोद्दधार माम् ।
ततोऽनुसुन्दरः प्रोचे, गुणो भगवतो ह्ययम् ॥ ८४० ॥

स्वभक्तमुद्धरत्येष, लोकमार्ये ! न संशयः ।
बद्धमप्यात्मचौर्येण, य एवं माममोचयत् ॥ ८४१ ॥

आनीतो वर्त्मनाऽनेन, नरकप्रस्थितोऽप्यहम् ।
पापिष्ठा अपि भक्त्याऽस्य, मुच्यन्ते नात्र संशयः ॥ ८४२ ॥

कार्या त्वया न कृच्छ्रेण, 'बुद्धाऽस्मीत्यवभावना ।
अकलङ्कादिभिः पूर्वं, यन्नाहमपि बोधितः ॥ ८४३ ॥

तथाभव्यतया स्वस्य, पापकर्मव्यये सति ।
त्वत्तोऽपि ह्यतिकृच्छ्रेण, प्रबुद्धोऽहं जिनागमे ॥ ८४४ ॥

कालादिहेतुभिः पापं, यदा जन्तोर्विलीयते ।
तदाऽसौ बुध्यते तत्त्वं, गुरवः सहकारिणः' ॥ ८४५ ॥

ततः सुललिता प्राह, विगता मेऽवभावना ।
किन्तु दीक्षां समादास्ये, पित्रोराज्ञां विना कथम् ॥ ८४६ ॥

दीक्षानामापि न ग्राह्यमननुज्ञातया मया ।
प्रतिज्ञातमिदं ह्यस्ति, पूर्वं तताम्बयोः पुरः ॥ ८४७ ॥

ततोऽनुसुन्दरः प्राह, माऽऽर्ये ! भैषीस्तवागतौ ।
पितरौ बहलः कोलाहलश्चात्रान्तरेऽजनि ॥ ८४८ ॥

सुमङ्गलान्वितश्चैत्ये, मनोनन्दनसंज्ञके ।
राजा मगधसेनोऽथ, प्रविष्टः सपरिच्छदः ॥ ८४९ ॥

नत्वाऽर्हन्तं तथाऽऽचार्यं, साधून् सुललितानतः ।
नत्वाऽनुसुन्दरनृपं, निषण्णोऽसौ तदन्तिके ॥ ८५० ॥

सुमङ्गलाऽपि विहितनिःशेषप्रतिपत्तिका ।
स्थिता सुललितामूर्ध्न्याघ्रायालिङ्ग्य तदन्तिके ॥ ८५१ ॥

आनन्दगद्‌गदगिरा, प्राह वत्से ! समुत्सुकौ ।
आवां त्वद्दर्शने त्यक्त्वा, राज्यं त्वत्पार्श्वमागतौ ॥ ८५२ ॥

न प्राप्नोति रतिं वत्से !, जनकस्ते त्वया विना ।
तव स्नेहानले चैष, जनो दंदह्यते सदा ॥ ८५३ ॥

वार्ताऽपि नावयोर्दत्ता, भवत्या तु कठोरया ।
अङ्गारोग्यादिसंसूचाकरी प्रेमाब्धिचन्द्रिका ॥ ८५४ ॥

ततः सुललिता प्राह, मातः ! किं बहुभाषितैः ।
निर्मिथ्यो युवयोः स्नेहः, शीघ्रं व्यक्तीभविष्यति ॥ ८५५ ॥

अहं दीक्षां ग्रहीष्यामि, नावं संसारवारिधेः ।
ततो यदि युवां मेऽद्य, वारणं न करिष्यथः ॥ ८५६ ॥

ग्रहीष्यथस्तथा दीक्षां, निर्विकल्पं मया सह ।
यौष्माकीणस्तदा स्नेहः, प्रतीतिमुपयास्यति ॥ ८५७ ॥

राजा मगधसेनस्तच्छ्रुत्वा प्राह सुमङ्गलाम् ।
आदावेव बबन्धेयं, देवि ! वत्साऽऽवयोर्मुखम् ॥ ८५८ ॥

निर्बबन्ध दृढं चित्तं, दीक्षायां च कुतोऽन्यथा ।
ईदृग्वचनविन्यासः, स्यादस्या मोहनाशकृत् ॥ ८५९ ॥

अनया साधु च प्रोक्तं, युक्तमेवाधुनाऽऽवयोः ।
सहानया प्रव्रजनं, निर्मिथ्यस्नेहसूचकम् ॥ ८६० ॥

देवाज्ञैव प्रमाणं मे, प्राहेत्यथ सुमङ्गला ।
ततो हृष्टा सुललिता, पतिता पादयोर्द्वयोः ॥ ८६१ ॥

तया संक्षिप्य वृत्तान्तः कथितश्चानुसुन्दरः ।
चारित्रपरिणामोऽभूद्, भावतोऽपि ततस्तयोः ॥ ८६२ ॥

तावन्वमोदत गुरुस्ताभ्यां दीक्षार्थमर्थितः ।
अथोल्लसन्महानन्दमहोत्सवमनोहरम् ॥ ८६३ ॥

स्फुरज्ज्योतिर्दिगुद्योतिदेवसम्पातमद्भुतैः ।
मुखरं तूर्यनिर्घोषैर्भूरिभव्यैः समाकुलम् ॥ ८६४ ॥

मुनिवृन्दैस्तदापूर्णं, स्मयमानमिवाबभौ ।
अनुसुन्दरराजादिप्रव्रज्याऽवसरे वनम् ॥ ८६५ ॥

ततो मगधसेनश्च, श्रीगर्भश्च महीपती ।
राज्यं पुरन्दरायैव, रक्षायै ददतुः स्वयम् ॥ ८६६ ॥

विधिना तानि सर्वाणि, सूरिणा दीक्षितान्यथ ।
दत्ता संवेगवृद्ध्यर्थं, देशना च सुधोपमा ॥ ८६७ ॥

ययुस्तदन्ते स्वस्थानं, देवा लोकाश्च भाविताः ।
साध्व्योऽपि च महाभद्राऽन्विता गुरुनिदेशतः ॥ ८६८ ॥

अथादित्यो ययावस्तं, कृता चावश्यकक्रिया ।
स्वाध्यायलीनैर्मुनिभिः, प्रदोषश्चातिलङ्घितः ॥ ८६९ ॥

लब्ध्वाऽभ्यन्तरसाम्राज्यं, मन्वानः कृतकृत्यताम् ।
विशुद्धध्यानमारूढो, राजर्षिरनुसुन्दरः ॥ ८७० ॥

ततो विशुद्ध्यमानाभिर्लेश्याभिः स महाशयः ।
आरुह्योपशमश्रेणीं, शान्तमोहः क्षणादभूत् ॥ ८७१ ॥

निर्याणकालं विज्ञाय, तस्मिन्नेव क्षणे स्थिताः ।
समाधिकारिणोऽभ्यर्णे, मुनयो गुरुशासनात् ॥ ८७२ ॥

अत्रान्तरे च तस्यायुः, समाप्तं स ततो वपुः ।
त्यक्त्वा सर्वार्थसिद्ध्याख्ये, विमानेऽभूत् सुरोत्तमः ॥ ८७३ ॥

अनुसुन्दरराज्ञस्तं, ज्ञात्वा व्यतिकरं प्रगे ।
मिलितः सकलः सङ्घो, विधिनाऽत्याजि तद्वपुः ॥ ८७४ ॥

कृता नरामरैः पूजा, तस्य तद्गुणरञ्जितैः ।
अनुसुन्दरवृत्तान्ते, तूर्णं जातेऽथ तादृशे ॥ ८७५ ॥

स्वधर्मदत्वरागेण, प्राग्भवस्नेहतस्तथा ।
चित्ते सुललिता साध्वी, मनाक् शोकेन पीडिता ॥ ८७६ ॥

तस्याः शोकापनोदायं, ततस्ते सूरिवासवाः ।
शृण्वत्सु सर्वसभ्येषु, वाचमेवं वितेनिरे ॥ ८७७ ॥

आर्ये ! न शोचनीयोऽसौ, नृशार्दूलो महाशयः ।
पूर्वकोट्यायुषा साध्यमह्नैकेनाप्यवाप यः ॥ ८७८ ॥

सर्वार्थसिद्धिं संप्राप्तो, नरकाभिमुखोऽपि यः ।
स कथं शोच्यतामेति, धीरो ध्वस्तद्विषद्बलः ॥ ८७९ ॥

जीवन्नपि सतां शोच्यो, नरः संयमदुर्बलः ।
न पुनः संयमे, धीरो, मृतोऽप्यानन्दभाजनम् ॥ ८८० ॥

सद्धर्मधनयुक्तस्य, मरणेऽपि महोत्सवः ।
बिभेति मृत्योः स पुनर्यो धर्मधनवर्जितः ॥ ८८१ ॥

ज्ञानदर्शनचारित्रतपोरूपाऽऽत्मजीवितम् ।
आराधनाचतुःस्कन्धा, यस्य स्यात् तस्य किं मृतम् ॥ ८८२ ॥

प्रक्षालिताघपङ्का ये, मृताः पण्डितमृत्युना ।
सतां ते हर्षदातारो, न तु शोच्याः कदाचन ॥ ८८३ ॥

सिद्धस्वकार्य इत्यार्ये !, न शोच्यस्तेऽनुसुन्दरः ।
अनुमोद्यः परं धर्मधीरः कल्याणभाजनम् ॥ ८८४ ॥

च्युत्वा स्थितिक्षयात् तस्मात्, पुष्करार्धस्य भारते ।
गान्धारराजपुत्रोऽसावयोध्यायां भविष्यति ॥ ८८५ ॥

नाम्ना चामृतसारोऽसौ, पद्मिनीहृदयप्रियः ।
लास्यत्युद्यौवनो दीक्षां, विपुलाशयसन्निधौ ॥ ८८६ ॥

कृत्वा तीव्रं तपो हत्वा, ततः कर्मकदम्बकम् ।
भवप्रपञ्चं संत्यज्य, शिवसद्मनि यास्यति ॥ ८८७ ॥

तत् सर्वथा प्रमोदस्य, कारणं भव्यदेहिनाम् ।
आर्येऽनुसुन्दरो नैव, शोकसन्तापकारणम् ॥ ८८८ ॥

पौण्डरीकमुनिः प्राह, प्रणम्यात्रान्तरे गुरून् ।
भावि वृत्तमिदं नाथैस्तस्य प्रोक्तं महात्मनः ॥ ८८९ ॥

चित्तवृत्तौ पुनर्भावि, किमिति प्रतिपाद्यताम् ।
गुरुराह भवे तत्रामृतसारमहात्मनः ॥ ८९० ॥

क्षान्तिर्दया च ये कान्ते, मृदुतासत्यते च ये ।
ऋजुताचौरते ये च, ये ब्रह्मरतिमुक्तते ॥ ८९१ ॥

विद्यानिरीहते ये च, यच्च लीनं पुरा स्थितम् ।
सैन्यं चारित्रधर्माद्यं, तत् सर्वं पार्श्वमेष्यति ॥ ८९२ ॥

प्रियाश्चान्या धृतिः श्रद्धा, मेधा विविदिषा सुखाः ।
मैत्रप्रमुदितोपेक्षाविज्ञप्तिकरुणादिकाः ॥ ८९३ ॥

सुखं तस्य प्रदास्यन्ति, भावराज्यं स लप्स्यते ।
करिष्यति गुणैः शुभ्रैश्चित्तवृत्तिं सुनिर्मलाम् ॥ ८९४ ॥

आरूढः क्षपकश्रेणिं, ततश्चैष महाबलः ।
निहत्य घातिलुण्टाकान्, केवलालोकमाप्स्यति ॥ ८९५ ॥

अनुगृह्य ततो विश्वं, समुद्घातं विधाय च ।
योगान्निरुध्य शैलेशीं, प्राप्य यास्यति निर्वृतौ ॥ ८९६ ॥

तस्यां च भोक्ष्यते पुर्यां, भावराज्यफलं महत् ।
अनन्तज्ञानसम्यक्त्ववीर्यानन्दविलासभाग् ॥ ८९७ ॥

इतश्च तेन दुर्भार्या, त्यक्ता सा भवितव्यता ।
परिक्षीणे महामोहबले शोकं करिष्यति ॥ ८९८ ॥

मोहादीनां कृतः पक्षो, जानत्याऽप्यस्थिरो यया ।
मया भग्नाशया प्राप्तं, तया यद्गीयतेऽर्भकैः ॥ ८९९ ॥

"ध्रुवाणि यः परित्यज्य, अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति, अध्रुवं नष्टमेव च" ॥ १०० ॥

मुह्यत्येव जनः सर्वो, यद्वा स्वीयप्रयोजने ।
तत् को दोषो ममेत्येषा, प्रहास्यत्यवभावनाम् ॥ १०१ ॥

आन्तरं तदिदं प्रोक्तमानुसुन्दरचेष्टितम् ।
श्रुत्वेदं मुदिताः सर्वे, पुण्डरीकादिसाधवः ॥ १०२ ॥

जहौ सुललिता शोकं, संविग्ना च व्यचिन्तयत् ।
पूर्वाबोधमपेक्ष्याहं, यथाऽस्मि गुरुकर्मिका ॥ १०३ ॥

तदिदं जीवरत्नं मे, विना तीव्रतपोऽग्निना ।
न शुद्ध्यतीति संचिन्त्य, सा गुरूणामनुज्ञया ॥ १०४ ॥

कर्तुं तपांसि कष्टानि, प्रवृत्ता विपुलोद्यमा ।
तद्गात्रं रत्नकनकावलीश्रीपात्रतां ययौ ॥ १०५ ॥

लघुभिश्च महद्भिश्च, सिंहनिष्क्रीडितैस्तया ।
त्रासिताः कर्मणां भेदाः, कलभा यूथपास्तथा ॥ १०६ ॥

तस्या भद्रामहाभद्रे, सर्वतोभद्रिका तथा ।
भद्रोत्तरा च प्रतिमा, भद्राद्वैतं वितेनिरे ॥ १०७ ॥

आचाम्लवर्धमानेन, भावसायुज्यमीयुषा ।
प्रवर्धमानस्तद्भावः, प्लावयामास पातकम् ॥ १०८ ॥

चान्द्रायणं चरन्त्या च, चन्द्रिकासमया तया ।
द्योतितं स्वकुलव्योम, ध्वस्तं च ध्वान्तमान्तरम् ॥ १०९ ॥

संसेव्य यवमध्यानि, वज्रमध्यानि चादरात् ।
निःस्पृहा मोक्षमार्गस्य, मध्यमध्यासितेव सा ॥ ११० ॥

एवमादितपोभिः सा, क्षालयन्ती स्वकल्मषम् ।
वाहिनीव स्थिता शुद्धध्यामपूरप्रवाहिनी ॥ १११ ॥

इतश्च पौण्डरीकोऽपि, कृतश्रुतदृढोद्यमः ।
जातः क्रमेण गीतार्थो, भावितात्मा जितेन्द्रियः ॥ ११२ ॥

पप्रच्छ सारं जिज्ञासुस्ततोऽसौ विनयाद् गुरुम् ।
भगवन् ! द्वादशाङ्गस्य, किं सारमिति कथ्यताम् ॥ ११३ ॥

समन्तभद्रगुरवस्ततः प्राहुर्महाशयाः ।
ध्यानयोगो विनिर्दिष्टः, सारोऽत्र जिनशासने ॥ ११४ ॥

साधूनां श्रावकाणां च, मूलोत्तरगुणैः क्रिया ।
घटिता निखिला बाह्या, ध्यानयोगार्थमीरिता ॥ ११५ ॥

मनःप्रसादो मुक्त्यर्थं, साध्यः खलु मनीषिणा ।
ऐकाग्र्यापरपर्यायो, ध्यानयोगः स एव च ॥ ११६ ॥

विषयान्तरसंचारनिरोधात् तच्च जायते ।
आलम्बनं तदर्थं च, मन्यते नैष्ठिकी क्रिया ॥ ११७ ॥

श्रुत्वा पैशाचिकाख्यानं, कुलवध्वाश्च रक्षणम् ।
नित्यं संयमयोगेषु, व्यापृतात्मा भवेन्मुनिः ॥ ११८ ॥

आत्मारामतया यस्तु, व्युत्थानं न प्रपद्यते ।
तस्य बाह्यक्रियासाध्यं, सिद्धमेव तदुच्यते ॥ ११९ ॥

आरुरुक्षुर्मुनिर्ध्यानं, श्रयेद् बाह्यक्रियामपि ।
ध्यानारूढः शमादेव, शुध्यत्यन्तर्गतक्रियः ॥ १२० ॥

ध्यानयोगः शुभः सारः, सर्वप्रवचनस्य तत् ।
शेषानुष्ठानमप्यूह्यं, सारं तस्याङ्गभावतः ॥ १२१ ॥

श्रुत्वा गुरोरिमां वाचं, पौण्डरीकमहामुनिः ।
कृताञ्जलिः पुनः प्रोचे, स्वशङ्काऽपनिनीषया ॥ १२२ ॥

भदन्त ! मोक्षमार्गेऽभूद्, बाल्येऽपि मम कौतुकम् ।
ततः पृष्टा मया सर्वे, तद्रहस्यं कुतीर्थिकाः ॥ १२३ ॥

ततस्तैः कथितं तत्त्वं, परस्परविलक्षणम् ।
तथा ह्येके जगुः सर्वं, हिंसादि क्रियतामिह ॥ १२४ ॥

केवलं बुद्धिलेपोऽत्र, रक्षणीयो मुमुक्षुणा ।
कर्मण्यकर्मविज्ञाने, कुतः कर्म यदुच्यते ॥ १२५ ॥

"कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु, स युक्तः कृत्स्नकर्मकृत् ॥ १२६ ॥

यस्य बुद्धिर्न लिप्येत, हत्वा सर्वमिदं जगत् ।
आकाशमिव पङ्केन, नासौ पापेन लिप्यते" ॥ १२७ ॥

अन्येऽभ्यधुर्विधायापि, पापं ये देहधारिणः ।
महेश्वरं स्मरन्त्यन्तस्ते मुच्यन्ते न संशयः ॥ १२८ ॥

छित्त्वा भित्त्वा च भूतानि, कृत्वा पापशतानि च ।
स्मरन् देवं विरूपाक्षं, सर्वपापैः प्रमुच्यते ॥ १२९ ॥

विष्णुध्यानमुदाजहुः परे पापविशुद्धये ।
पवित्रं परमानन्ददायकं यदिदं स्मृतम् ॥ १३० ॥

अपवित्रः पवित्रो वा, सर्वावस्थागतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं, स बाह्याभ्यन्तरः शुचिः ॥ १३१ ॥

ऋचमन्ये तु गायत्रीं, प्राहुः पापनिबर्हणीम् ।
मोक्षस्य साधनं प्राहुरन्ये वायुजयं बुधाः ॥ १३२ ॥

हृदि स्थितं यद्ध्यानेन, पुण्डरीकं विजृम्भते ।
विकस्वरदलं रम्यं, मनोऽलिसुखदायकम् ॥ १३३ ॥

पदे मनोऽलिः परमे, तद्द्वारेण निलीयते ।
लक्ष्यते तस्य यो नादस्तत् तत्त्वमपरे जगुः ॥ १३४ ॥

रेचकं पूरकं चैव, कुम्भकं च तथा परे ।
अस्यैव पुण्डरीकस्य, प्राहुर्वायुं विघाटकम् ॥ १३५ ॥

विशुद्धं बिन्दुमेवाहुरन्ये तु स्फटिकोपमम् ।
ज्ञानहेतुं प्रसर्पन्तं, तिर्यगूर्ध्वमधस्तथा ॥ १३६ ॥

नासाग्रे भ्रूलतामध्ये, बिन्दुमेव तथाऽपरे ।
तुषारहारविमलं, ध्येयमाहुश्चलस्थिरम् ॥ १३७ ॥

आग्नेये मण्डले स स्यान्मीलितो(ते) रक्तवर्णकः ।
माहेन्द्रे पीतकः कृष्णो, वायव्ये वारुणे सितः ॥ १३८ ॥

पीतः सुन्दरचित्तेन, रक्तस्तापेषु चिन्त्यते ।
कृष्णोऽभिचारके कार्ये, पुष्टिदो धवलो मतः ॥ १३९ ॥

प्राहुः परे तु संशोध्यो, नाडीमार्गो मुमुक्षुणा ।
इडापिङ्गलयोर्ज्ञेयं, नाड्योः संचारकर्म च ॥ १४० ॥

नाडीचक्रप्रचारश्च, विज्ञेयो दक्षिणेतरः ।
तद्द्वारैव च विज्ञेयं, बहिः कालबलादिकम् ॥ १४१ ॥

ओंकारोच्चारणादेव, घण्टानादायतात् परे ।
पद्मासने निविष्टस्य, शान्तिप्राप्तिं समभ्यधुः ॥ १४२ ॥

अन्ये तु प्राहुरानाभेः, प्राणतन्तुं शनैः शनैः ।
मूर्धान्तस्तालुरन्ध्रेण, निर्गच्छन्तं विचिन्तयेत् ॥ १४३ ॥

स्थितं हृदयराजीवे, मण्डले वा त्रयीतनोः ।
पुमांसमाद्यं निष्पापं, प्राहुर्ध्येयतया परे ॥ १४४ ॥

पुमांसं परमं ध्येयं, नित्यं हृद्व्योम्नि संस्थितम् ।
अपरे विलसत्कान्तिलताकीर्णं विदुर्बुधाः ॥ १४५ ॥

आकाशमात्रमपरे, विश्वमन्ये चराचरम् ।
आत्मस्थं चिन्त्यमित्याहुरपरे ब्रह्म शाश्वतम् ॥ १४६ ॥

इत्थं च भगवद्भिर्मे, ध्यानयोगो यथोदितः ।
सारस्तीर्थ्यैरपि तथा, स एव प्रतिपादितः ॥ १४७ ॥

भवेयुस्तीर्थिका मुक्तेस्तत् किं सर्वेऽपि साधकाः ।
साध्ये मोक्षे तथैकस्मिन्, केयं ध्येयविभिन्नता ॥ १४८ ॥

छित्त्वेदं वाक्कुठारेण, सन्देहं गहनं मम ।
मोक्षमार्गं वितिमिरं, विधातुं यूयमर्हथ ॥ १४९ ॥

समन्तभद्रगुरवस्ततः प्राहुर्महाधियः ।
आर्य ! त्वमल्पगीतार्थस्तत्तात्पर्यं न बुध्यसे ॥ १५० ॥

तीर्थ्याः सर्वेऽपि खल्वेते, कूटवैद्यसमा मताः ।
सद्वैद्यजिनशास्त्रार्थपल्लवग्रहगर्विताः ॥ १५१ ॥

प्रोच्यन्ते भ्रान्तिनाशार्थमत्र वैद्यकथा यथा ।
एकस्मिन् नगरे भूरिरोगग्रस्तजनाकुले ॥ १५२ ॥

एक एव महावैद्यो, दिव्यज्ञान्यस्ति कश्चन ।
संहितानां समस्तानां, स्रष्टा रोगौघनाशकः ॥ १५३ ॥

नाधन्यत्वेन तल्लोकाः, प्रपद्यन्ते तथापि तम् ।
ये केऽपि धन्यमूर्द्धन्याः, प्रपद्यन्ते त एव तम् ॥ १५४ ॥

स च दत्ते स्वशिष्येभ्यस्तद्व्याख्यानमनारतम् ।
अन्यधूर्तैरुपश्रुत्या(त्य), तत्प्रसङ्गागतैर्धृतम् ॥ १५५ ॥

ततस्तल्लवमात्रेण, तुष्टैस्तैर्वैद्यकं कृतम् ।
स्वपूजार्थमधन्यानां, प्रतिभातं च तन्नृणाम् ॥ १५६ ॥

ततस्तैः पण्डितंमन्यैः, रचिताः स्वस्वसंहिताः ।
वचांसि ग्रथयामासुः, केचित् तासु नवान्यपि ॥ १५७ ॥

धृतानि तान्युपश्रुत्या, सद्वैद्यवचनानि च ।
कानिचित् स्थापयामासुस्तथा भङ्ग्यन्तरेण च ॥ १५८ ॥

सद्वैद्यवचनेभ्योऽन्यैरतिपाण्डित्यमानिभिः ।
एकान्तवैपरीत्येन, संहिता रचिता ध्रुवम् ॥ १५९ ॥

लोकाः पृथक् पृथग् भिन्नरुचयस्ते च रोगिणः ।
केषाञ्चित् केचिदेवेष्टाः, कूटवैद्येषु तेष्वतः ॥ ९६० ॥

प्रसिद्धा वैद्यशालास्ताः, सर्वाः शिष्यप्रतीच्छकैः ।
महावैद्याश्च तेऽभूवन्, सर्वे पाठितसंहिताः ॥ ९६१ ॥

ततो मौलमहावैद्योऽनादृतो बहुभिर्जनैः ।
कुर्वते तत्क्रियां ये च, ते भवन्त्येव नीरुजः ॥ ९६२ ॥

यथा जीवति सद्वैद्ये, तस्मिन् रोगाः क्षयं ययुः ।
तस्यां सुवैद्यशालायां, क्रियाविधिकृतां नृणाम् ॥ ९६३ ॥

तथा मृतेऽपि तस्मिन् सा, जाता रोगविनाशिनी ।
शाला सकललोकानां, सविनेया ससंहिता ॥ ९६४ ॥

ये पुनः कूटवैद्यानां, रोगिणः शरणं गताः ।
अनाथा रोगजालेन, पीडिता एव ते मृताः ॥ ९६५ ॥

जीवत्सु तेषु तच्छाला, यथाऽनर्थकरी नृणाम् ।
मृतेष्वपि तथैवाभूत्, सशिष्या च ससंहिता ॥ ९६६ ॥

यश्च तास्वपि केषाञ्चिद्, वैद्यशालासु दृश्यते ।
रोगाणां तानवाद् दैवात् सर्वमोक्षेण वा गुणः ॥ ९६७ ॥

सोऽपि सद्वैद्यशास्त्राब्धिगृहीतवचसां गुणः ।
एकान्तविपरीतानां, संहितासु च सोऽपि न ॥ ९६८ ॥

किमन्यत् सा महावैद्यशालैका रोगनाशिनी ।
तत्संहितानुसारात् तु शेषा अपि तथाविधाः ॥ ९६९ ॥

महावैद्यो हि जानीते, दोषं तच्छमनं तथा ।
कूटवैद्या न जानन्ति, स्वयं तत्त्वविरोधतः ॥ ९७० ॥

गुणो घुणाक्षरन्यायाद्, यश्च तेभ्योऽपि जायते ।
सद्वैद्य एव तत्रापि, तत्त्वनीत्या चिकित्सकः ॥ ९७१ ॥

तदियं ते समासेन, मया वैद्यकथोदिता ।
पुण्डरीकोपनीयैनां, व्यक्तं भावं वदामि ते ॥ १७२ ॥

संसारो नगरं ज्ञेयो, भावरोगिजनाकुलः ।
तत्रैकश्च महावैद्यः, सर्वज्ञो जगदीश्वरः ॥ १७३ ॥

उत्पन्नकेवलालोकः, शुद्धसिद्धान्तसंहितः ।
रोगजातप्रविध्वंसी, सर्वलोकोपकारकृत् ॥ १७४ ॥

तथापि गुरुकर्माणस्तमधन्याः श्रयन्ति न ।
किन्तु धन्यतमाः क्षीणपापाः स्तोकाः श्रयन्ति तम् ॥ १७५ ॥

स यदोपदिशत्युच्चैर्धर्मं पर्षदि हर्षदम् ।
सदेवासुरमर्त्यायां, विनेयेभ्यो जगद्गुरुः ॥ १७६ ॥

देवासुरनरास्तत्र, प्रसङ्गेनागतास्तदा ।
शृण्वन्ति देशनां केचिन्मिथ्यात्वक्लिष्टमानसाः ॥ १७७ ॥

श्रुत्वा मन्दधियस्तां ते, गम्भीरां विविधैर्नयैः ।
कल्पयन्त्यन्यथैवार्थं, स्वीयभावानुसारतः ॥ १७८ ॥

ततो जिनमहावैद्यादुपश्रुत्य बहिर्गताः ।
कूटवैद्यसमानास्ते स्वशास्त्राणि प्रकुर्वते ॥ १७९ ॥

तीर्थ्याः केचन सांख्याद्यास्तत्र ये तावदास्तिकाः ।
ग्रन्थेषु जैनवाक्यानि, तैर्बद्धानि कियन्त्यपि ॥ १८० ॥

अर्हद्वाक्यान्यथात्वेन, स्वयं शेषं च कल्पितम् ।
कूटवैद्यैरिवाशेषं, निजपाण्डित्यदर्पतः ॥ १८१ ॥

तच्छास्त्राण्यपि राजन्ते, ततोऽर्हद्वचनश्रिया ।
कण्टकानां वनानीव, मध्यस्थैराम्रपादपैः ॥ १८२ ॥

बार्हस्पत्यादयो ये तु, नास्तिकाः पापबुद्धयः ।
विकल्पितं विपर्यस्तं, सर्वं तैर्जिनशासनात् ॥ १८३ ॥

कुतर्कवादमौखर्याज्जने तेऽपि तथाविधे ।
गताः प्रसिद्धिं चौराणां, प्रागल्भ्यं हि महत्तरम् ॥ १८४ ॥

तीर्णा(र्थ्या)यथाऽऽशयं ते च, नानारुचिभृतां नृणाम् ।
केषाञ्चित् केचिदेवेह, प्रतिभान्ति न चापरे ॥ १८५ ॥

कणभक्षाक्षपादाद्याः, शास्त्रकर्माणि यान्यथ ।
शिष्येभ्योऽदर्शयंस्तेभ्यो, वैद्यशालेयमुत्थिता ॥ १८६ ॥

इत्थं च जिनसद्वैद्यशालायां कर्मरोगिणः ।
धन्याश्चिकित्सां कुर्वाणा, भवन्त्येव हि नीरुजः ॥ १८७ ॥

आस्तिकेषु च तीर्थेषु, कर्मरोगस्य तानवम् ।
यद् दृश्यते यश्च सर्वमोक्षो वा श्रूयते क्वचित् ॥ १८८ ॥

सोऽपि स्वशास्त्रबद्धानां सर्वज्ञवचसां गुणः ।
अपुनर्बन्धकस्य स्यात्, तद्रुच्या कर्मतानवम् ॥ १८९ ॥

अनुष्ठानं हि तस्योक्तं, चित्रं दर्शनभेदतः ।
त्यक्तविप्रतिपन्नाशं, पर्यवस्यत् फलोदये ॥ १९० ॥

तस्य सर्वैकवाक्यत्वादहिंसाद्येव सम्मतम् ।
तत्त्वं निरञ्जनो देवो, गुरुर्ग्रन्थविवर्जितः ॥ १९१ ॥

इत्थं सदोघसंज्ञानात्, सत्यार्थपदरोचके ।
सूक्ष्मबोधं विनाऽपि स्यात्, कर्मरोगस्य तानवम् ॥ १९२ ॥

अतिशुद्धिवशाद् भावसम्यक्त्वादिक्रमेण तु ।
जायेत सर्वमोक्षोऽपि, जिनवाक्यानुसारिणाम् ॥ १९३ ॥

यद्वा जातिस्मरादीनां, वचो जैनं हृदि स्थितम् ।
तेषामास्तिकतीर्थ्यानां, कर्मरोगं क्षयं नयेत् ॥ १९४ ॥

दोषत्रयं शरीरस्थं, यथा वैद्यश्चिकित्सति ।
रागद्वेषमहामोहांस्तथा सर्वज्ञ एव हि ॥ १९५ ॥

चिकित्सा कर्मरोगाणां, जिनवैद्यं विना न तत् ।
आस्तिकेष्वपि तीर्थेषु, सा हि सर्वज्ञपूर्विका ॥ ९९६ ॥

एकान्तविपरीता ये, नास्तिका जिनशासनात् ।
एकान्तेनैव पापास्ते, भवभ्रमणहेतवः ॥ ९९७ ॥

अर्थकामैकगृद्धानां, तथाऽपि प्रतिभान्ति ते ।
क्लिष्टाशयानां जन्तूनां, नास्तिकाः साम्प्रतेक्षिणः ॥ ९९८ ॥

तदेवं निर्गतान्यार्यतीर्थानि जिनशासनात् ।
शेषाणि व्यापकं चैकं, विज्ञेयं जिनशासनम् ॥ ९९९ ॥

इत्थं च वर्तते रागद्वेषमोहविरोधि यत् ।
सत्यं भूतदया ब्रह्म, शौचमिन्द्रियनिग्रहः ॥ १००० ॥

औदार्यं सुन्दरं वीर्यमाकिञ्चन्यमलोभता ।
गुरुभक्तिस्तपो ज्ञानं, ध्यानमन्यच्च तादृशम् ॥ १००१ ॥

आस्तिकेष्वपि तीर्थेषु, तत् स्वरूपेण सुन्दरम् ।
किन्तु नो राजते तेषु, यथा याचितभूषणम् ॥ १००२ ॥

तद्धि स्वकल्पितैः शेषैः, सर्वज्ञवचनातिगैः ।
यागहोमादिभिः सार्द्धं, मीलितं न विराजते ॥ १००३ ॥

एकग्रन्थप्रबन्धस्य, कूटवाक्यार्थमुद्रया ।
सर्वांशशुद्धबोधस्याहेतुत्वात् तन्न सुन्दरम् ॥ १००४ ॥

हंसेनेव जलात् क्षीरमपुनर्बन्धकेन तत् ।
विवेकेन गृहीतं तु, स्यात् स्वरूपेण सुन्दरम् ॥ १००५ ॥

इत्थं स्वरूपशुद्धत्वं, तत्रान्यपदमिश्रणात् ।
निह्नयते न सिद्धान्ते, यथा मिथ्यात्त्विसंग्रहात् ॥ १००६ ॥

अत एवान्यशास्त्रस्य, सत्यार्थपददूषणे ।
तन्मूलपूर्वजलधेर्भवत्याशातना ध्रुवा ॥ १००७ ॥

तदेवं सर्वतीर्थेषु, भावात् सर्वगुणात्मकम् ।
जैनतीर्थं स्थितं ज्ञेयं, न लिङ्गं धर्मकारणम् ॥ १००८ ॥

अतो यदुक्तमार्येण, मोक्षं किं तीर्थिका अपि ।
साधयेयुर्ध्यानबलाच्चारु तत्रेदमुत्तरम् ॥ १००९ ॥

शुद्धानुष्ठानविकलं, ध्यानं हास्यं विवेकिनाम् ।
शुद्धं पुनरनुष्ठानं, न स्यात् सिद्धान्तमन्तरा ॥ १०१० ॥

सर्वोपाधिविशुद्धात्मा, तीर्थिकोऽपि कथञ्चन ।
यश्च स्यात् स तु भावेन, वर्तते जिनशासने ॥ १०११ ॥

जैनेन्द्रमेव तेनैकं, शासनं भवनाशनम् ।
भवच्छिदो भवन्त्येव, तत्रस्थास्तीर्थिका अपि ॥ १०१२ ॥

आरोग्यकारि दोषच्छिद्, यथा लोके सुभेषजम् ।
प्रयुक्तं कूटभिषजाऽप्याप्तवैद्यस्य सम्मतम् ॥ १०१३ ॥

तथा घुणाक्षरन्यायाद्, वचनं गुणकारि यत् ।
परशास्त्रस्थमपि तज्जिनवैद्यस्य सम्मतम् ॥ १०१४ ॥

कुसम्प्रदायापतिताद्, यत्नात् तत्र गुणावहम् ।
अतो घुणाक्षरन्यायात्, तादृग् योग्यतयेष्यते ॥ १०१५ ॥

साऽवच्छिनत्ति तस्येष्टहेतुतां चानुमोद्यताम् ।
गुणकृद् भावजैनानामतस्तत् सम्मतं सताम् ॥ १०१६ ॥

क्रियते यत् पुनः कर्म, चित्तमालिन्यकारकम् ।
यतिश्रावकरूपेण, तज्जिनाज्ञाबहिश्चरम् ॥ १०१७ ॥

व्यवहारोऽपि गुणकृद्, भावोपष्टम्भतो भवेत् ।
सर्वथा भावहीनस्तु, स ज्ञेयो भववृद्धिकृत् ॥ १०१८ ॥

भावतीर्थं समालम्ब्य, व्यापकं जैनमित्यदः ।
जनास्तरन्ति दुःखाब्धिं, पर्याप्तं वेषचिन्तया ॥ १०१९ ॥

यच्च ते ध्येयनानात्वमस्ति संसार(शय)कारणम् ।
तत्रापि परमार्थोऽयं, निश्चयायावधार्यताम् ॥ १०२० ॥

बध्नाति भावैः संक्लिष्टैः, पापं पुण्यं तथेतरैः ।
आत्मा समाहितोऽत्यन्तमौदासीन्येन मुच्यते ॥ १०२१ ॥

स्वभाव एव जीवस्य, यत् तथा परिणामभाग् ।
बध्यते पुण्यपापाभ्यां, माध्यस्थात्तु विमुच्यते ॥ १०२२ ॥

तत्र हिंसाद्यनुष्ठानाद्, भवन्ति भ्रमकारकात् ।
संक्लिष्टाश्चित्तकल्लोला, देहेऽपथ्याद् यथा गदाः ॥ १०२३ ॥

तथा दयाद्यनुष्ठानाज्जायन्ते स्थैर्यकारकात् ।
प्रशस्ताश्चित्तकल्लोला, यथा पथ्यात् सुखासिकाः ॥ १०२४ ॥

चित्तजालोपसंहारि, ध्यानं यत् पुनरुत्तमम् ।
निर्जरामात्रजनकं, तदौदासीन्यमिष्यते ॥ १०२५ ॥

भवेन्नानाविधोपायैश्चित्तजालोपसंहृतिः ।
भावतीर्थे स्थितस्यातो, ध्येयभेदो न दुष्यति ॥ १०२६ ॥

बहिःशुद्धक्रियाध्येयैर्यन्मोक्षाय मुमुक्षवः ।
नानाविधैः प्रगल्भन्ते, माध्यस्थं तत्र कारणम् ॥ १०२७ ॥

किन्तु जीवस्य जायन्ते, यथा चेतःप्रसत्तये ।
परमात्मादयो ध्येया, नैव बिन्द्वादयस्तथा ॥ १०२८ ॥

यौ त्वालम्बनभेदेन, स्वसंवेदनशालिना ।
चेतःशुद्ध्यन्यथाभावौ, प्रत्याख्येयौ न तौ पुनः ॥ १०२९ ॥

नानारुचित्वाज्जीवानां, ततो माध्यस्थशालिनाम् ।
बिन्द्वादयोऽपि केषाञ्चिद्, भवेयुश्चित्तशोधकाः ॥ १०३० ॥

विज्ञायापि च ये तत्त्वं, लुब्धाः सन्तोऽर्थकामयोः ।
असदालम्बना योगाभिमानात् सुखमासते ॥ १०३१ ॥

कोटरान्तःप्रविष्टानां, घूकानां भास्करोदये ।
यादृक् तादृक् ज्ञेयं, तेषां ज्ञानं महात्मभिः ॥ १०३२ ॥

अज्ञानध्वान्तनिहतास्ते हि दृक्प्रसरं विना ।
कौशिका इव तिष्ठन्ति, लीनाः संसारकोटरे ॥ १०३३ ॥

परिस्फुरति योगार्के, दीप्ते ज्ञानमहोभरैः ।
अर्थकामस्पृहाध्वान्तं, कुतस्तिष्ठति मानसे ॥ १०३४ ॥

ततो निरीहचित्तानां, बिन्द्वाद्यालम्बनादपि ।
माध्यस्थं योगिनामिष्टं, वैराग्यलवशालिनाम् ॥ १०३५ ॥

कुतीर्थिकैरतो येऽमी, ध्येयभेदाः प्रकीर्तिताः ।
ते जैनमतपाथोधौ, यान्ति निस्यन्दबिन्दुताम् ॥ १०३६ ॥

तत्कूटवैद्यशालावत्, परदर्शनसन्ततिः ।
ज्ञेया तथा स्वरूपेण, कर्मरोगविवर्द्धनी ॥ १०३७ ॥

तत्रस्थानां पुनर्यत् स्यात्, कर्मरोगस्य तानवम् ।
कर्मरोगक्षयो वा यः, स सर्वज्ञवचोगुणः ॥ १०३८ ॥

तस्मात् सद्वैद्यशालेयं, सिद्धा जैनमतस्थितिः ।
आकालं निश्चला पूता, द्वादशाङ्गी सुसंहिता ॥ १०३९ ॥

दोषच्छेदकरं लोके, यत्किञ्चिद् दृश्यते वचः ।
तद् गुणाश्रयभूतायामस्यामेव प्रतिष्ठितम् ॥ १०४० ॥

बुद्ध्यलेपेन हिंसादिसौद(न्द)र्यादिवचश्च यत् ।
हास्यं विवेकिनां तत्तु, तीर्थिकानामयुक्तिकम् ॥ १०४१ ॥

श्रुत्वेदं सद्गुरोर्वाक्यं, पुण्डरीकमुनिः पुनः ।
अब्रवीत् तत्त्वरत्नस्य, सर्वांशपरिशुद्धये ॥ १०४२ ॥

यथा ब्रूमो वयं स्वामिन् !, व्यपाकं जिनशासनम् ।
तीर्थ्या अपि तथा ब्रूयुः, स्वतीर्थं चेत् किमुत्तरम् ॥ १०४३ ॥

देवे धर्मे निजे तत्त्वे, मोक्षे चाभिनिवेशिनः ।
स्वप्नान्तेऽपि न जानन्ति, परे हि परदर्शनम् ॥ १०४४ ॥

तेभ्यः स्वमतदृसेभ्यः, को भेदस्तादृशां तु नः ।
मन्मनो मेरुवत् कर्तुमिदं निर्णेतुमर्हथ ॥ १०४५ ॥

लसद्दन्तद्युतिश्रेणिच्छुरिताधरपल्लवः ।
गुरुस्तदुत्तरं दातुमित्थमाह महाशयः ॥ १०४६ ॥

तदेतद् व्यापकं प्रोक्तं, मया ते जैनदर्शनम् ।
यद् वेद्यसंवेद्यपदस्थितैर्भावेन दृश्यते ॥ १०४७ ॥

उपलब्धे हि तत्तत्वे, जीवानां मलसंभवाः ।
स्वयमेव निवर्तन्ते, मोहिन्यो भेदबुद्धयः ॥ १०४८ ॥

नयेषु स्वार्थसत्येषु, मोघेषु परचालने ।
समशीलं मनो यस्य, स हि सम्यक्त्वभूषितः ॥ १०४९ ॥

एको हि भासते रागद्वेषमोहविवर्जितः ।
सर्वत्र तत्त्वतो देवः, सर्वज्ञः सर्वदर्शनः ॥ १०५० ॥

सकलोऽसौ जगद्भर्ता, सशरीरो निगद्यते ।
स एव योगिनां ध्येयो, मुक्तावस्थस्तु निष्कलः ॥ १०५१ ॥

इत्थमेकस्वरूपे हि, देवतत्त्वे विनिश्चिते ।
न स्युर्नानाविधाः शब्दा, बुधानां भेदबुद्धये ॥ १०५२ ॥

बुद्धो ब्रह्माऽथवा विष्णुर्महेशो वा स उच्यताम् ।
जिनेश्वरो वा सर्वत्र, भावतोऽर्थो न भिद्यते ॥ १०५३ ॥

भजेद् य एव तं ज्ञात्वा, भावात् तस्यैव स प्रभुः ।
ममास्ति तव नास्तीति, सर्वोऽयं मत्सरभ्रमः ॥ १०५४ ॥

सर्वेषां हि समानोऽसौ, निःशेषक्लेशवर्जितः ।
दत्ते मोक्षं सुविज्ञातः, पैतृकी कस्य जाह्नवी ॥ १०५५ ॥

विभिन्ना अपि पन्थानो, यान्ति नद्य इवाम्बुधौ ।
कर्मप्रपञ्चनिर्मुक्ते, तत्रैकत्रैव योगिनाम् ॥ १०५६ ॥

यैर्ज्ञातोऽसौ महाभागैः, श्रितश्चाशयशुद्धितः ।
तेषां निश्चयभाजां स्याद्, विवादः केन हेतुना ॥ १०५७ ॥

रक्तं द्विष्टं तथा मूढं, मूढास्तं कल्पयन्ति ये ।
भावनाज्ञानभाजस्तांस्तारयन्ति कृपापराः ॥ १०५८ ॥

श्रुतज्ञानाद् विवादः स्यान्मतावेशश्च चिन्तया ।
माध्यस्थं भावनाज्ञानात्, सर्वत्र च हितार्थिता ॥ १०५९ ॥

तदेकस्तात्त्विको देवः प्रोक्तस्ते ये भजन्त्यमी ।
सामान्यतो विशेषाद् वा, योगिनोऽसद्ग्रहोज्झिताः ॥ १०६० ॥

धर्मोऽपि तात्त्विको ह्येकः, शुद्धः शुद्धगुणात्मकः ।
हेतुः कल्याणमालानां, विज्ञेयो मोक्षकाङ्क्षिभिः ॥ १०६१ ॥

क्षमामार्दवसच्छौचतपःसंयममुक्तयः ।
सत्यब्रह्मार्जवत्यागा, अमी धर्मगुणा दश ॥ १०६२ ॥

विवदन्ते न सद्धर्मं, ज्ञात्वैतं दशलक्षणम् ।
वारयन्ति बुधाः किन्तु, तद्विपर्ययकल्पकम् ॥ १०६३ ॥

प्रोक्तस्तदेक एवायं, सद्धर्मः सार्वतान्त्रिकः ।
एक एव च विज्ञेयो, मोक्षमार्गोऽपि तात्त्विकः ॥ १०६४ ॥

सत्त्वं लेश्याविशुद्धिर्वा, शक्तिवीर्यं तथाऽऽत्मनः ।
इत्यादिशब्दभेदेऽपि, नार्थतः स विभिद्यते ॥ १०६५ ॥

अदृष्टं कर्म संस्कारः, पुण्यापुण्ये शुभाशुभे ।
धर्माधर्मौ तथा पाशः, पर्यायाः सुकृताश्रयाः ॥ १०६६ ॥

भवन्ति हीयमानेऽस्मिन्, सर्वा भवविपत्तयः ।
भूतयो वर्द्धमानेऽस्मिन्, सर्वाः प्रादुर्भवन्ति च ॥ १०६७ ॥

इदमेव परे प्राहुश्चतुष्कोटिविशुद्धिमत् ।
ऐश्वर्यज्ञानवैराग्यधर्मरूपास्तु कोटयः ॥ १०६८ ॥

रजस्तमोभ्यां संछन्नं, सत्त्वं यत्र प्रकाशते ।
ऐश्वर्यादिगुणास्तेन, जन्तोर्यान्ति विपर्ययम् ॥ १०६९ ॥

रजोवशादवैराग्यमनैश्वर्यं तमोवशात् ।
तमसश्चैव माहात्म्यादज्ञानाधर्मसंभवः ॥ १०७० ॥

तत् सत्त्वं मलिनीभूतं, हेतुः संसारदुःखयोः ।
तदेव निर्मलं वीर्यं, कारणं सुखमोक्षयोः ॥ १०७१ ॥

ध्यानव्रततपोमुख्यास्तल्लाभार्थमिमेऽखिलाः ।
गीयन्ते हेतवश्चित्रास्तत् तत्त्वं पारमेश्वरम् ॥ १०७२ ॥

ज्ञानं तद्गोचरं श्रेष्ठं, श्रद्धानं च तदाश्रयम् ।
क्रिया च वृद्धिकृत् तस्य, मोक्षमार्गः स कीर्तितः ॥ १०७३ ॥

एतच्च तत्त्वं यैर्ज्ञातं, ध्रुवं तेषां भ्रमः कुतः ।
केवलं वारयन्तीमे, तत्त्वभ्रष्टं कृपापराः ॥ १०७४ ॥

तदेको मोक्षमार्गस्ते, तात्त्विकः कीर्तितो मया ।
पूर्णानन्दमयो ज्ञेयो, मोक्षोऽप्येकोऽनया दिशा ॥ १०७५ ॥

संसिद्धिनिर्वृतिः शान्तिः, शिवमक्षरमव्ययम् ।
अमृतं ब्रह्म निर्वाणं, ध्वनयस्तस्य वाचकाः ॥ १०७६ ॥

सर्वकर्मक्षयादेष, सर्वतन्त्रे व्यवस्थितः ।
ज्ञानदर्शनसद्वीर्यसुखसाम्राज्यलक्षणः ॥ १०७७ ॥

गुणातीतदशारूपो, यैरेष परिकीर्तितः ।
तैरप्यत्र न पर्यस्ता, चिद्रूपात्मव्यवस्थितिः ॥ १०७८ ॥

यैरशेषगुणोच्छेदरूपोऽसौ परिगीयते ।
स्वभावसुखसंवित्तिः, शक्या क्षेप्तुं न तैरपि ॥ १०७९ ॥

दुःखाभावोऽपि नावेद्यः, पुरुषार्थतयेष्यते ।
न हि मूर्च्छाद्यवस्थार्थं, प्रवृत्तो दृश्यते सुधीः ॥ १०८० ॥

अशरीरं वा वसन्तं, स्पृशतो न प्रियाप्रिये ।
इत्यद्वन्द्वसुखात्मैको, मोक्षो मानप्रतिष्ठितः ॥ १०८१ ॥

सर्वथा निर्मलं रूपमात्मनो मोक्ष उच्यते ।
इत्थं ह्यभेदविज्ञाने, शब्दभेदेन को भ्रमः ॥ १०८२ ॥

उच्यतां वैष्णवं वा तद्, ब्राह्मणं वाऽभिधीयताम् ।
बौद्धं वा गीयतां यद्वा, माहेश्वरमुदीर्यताम् ॥ १०८३ ॥

कथ्यतां वाऽथ जैनेन्द्रं, ज्ञातार्थैर्मानवैर्मतम् ।
अविनष्टे हि भावार्थे, शब्दभेदो न दुष्यति ॥ १०८४ ॥

प्रसीदन्त्यर्थवैशद्यान्न बुधाः शब्दमात्रतः ।
विनाऽर्थं देव इत्युक्तो, मूर्ख एव हि तुष्यति ॥ १०८५ ॥

इत्थं च दर्शनैकत्वे, भाव्रतो ये स्वदर्शनम् ।
तीर्थिका व्यापकं ब्रूयुर्वादस्तैः सह कीदृशः ॥ १०८६ ॥

मोहेनाच्छादितानां हि, पुण्डरीक महामुने ! ।
बहूनि दर्शनानीति, मोहोऽयं संप्रवर्तते ॥ १०८७ ॥

भेदबुद्धिर्निवर्तेत, तन्नाशे दर्शनाश्रया ।
स मुञ्चेदाग्रहं तत्र, तथा चोक्तं मनीषिभिः ॥ १०८८ ॥

रिक्तस्य जन्तोर्जातस्य, गुणदोषानपश्यतः ।
विलब्धा बत केनामी, सिद्धान्तविषमग्रहाः ॥ १०८९ ॥

अहं चारुरचारुस्त्वं, मदीयं चारु दर्शनम् ।
न त्वदीयमिति स्पष्टं, मत्सरस्य विजृम्भितम् ॥ १०९० ॥

सद्दृष्टयो हि यावन्तस्तावन्तः शुद्धदर्शने ।
ममत्वरहिताः सन्ति, तेषामस्त्येकवाक्यता ॥ १०९१ ॥

ये त्वक्षीणमलत्वेन, स्वमताग्रहयालवः ।
तेषां जात्यन्धतुल्यानामपकर्णनमुत्तरम् ॥ १०९२ ॥

अथवा बोधनीयास्ते, तत्त्वं यत्नशतैरपि ।
मोहापोहात् परः कोऽपि, नोपकारोऽस्ति भूतले ॥ १०९३ ॥

स्वतीर्थं व्यापि चेत् तीर्थ्या, ब्रूयुस्तत्र किमुत्तरम् ।
इति प्रश्ने मयाऽऽख्यातं, तदिदं ते सदुत्तरम् ॥ १०९४ ॥

यदा च दृष्टिवादाङ्गे, समग्रनयसागरे ।
पतन्तीर्द्रक्ष्यसि व्यक्तं, कुदृष्टिसरितोऽखिलाः ॥ १०९५ ॥

तदा तव प्रयास्यन्ति, सन्देहाः सकलाः क्षयम् ।
ज्ञास्यते च यथा नास्ति, परं तत्त्वं जिनागमात् ॥ १०९६ ॥

प्रपद्य नष्टसन्देहस्ततस्तद्वचनं गुरोः ।
पुण्डरीकमुनिश्चक्रे, सविशेषश्रुतोद्यमम् ॥ १०९७ ॥

जातो गुरुप्रसादेन, द्वादशाङ्गाब्धिपारगः ।
अनन्तगमपर्यायज्ञानी सातिशयः क्रमात् ॥ १०९८ ॥

ततः सगच्छोऽनुज्ञातोऽनुयोगस्तस्य सूरिभिः ।
दत्तं सूरिपदं स्वीयं, स्वस्यात्मा चानृणीकृतः ॥ १०९९ ॥

कृताऽमरनरैर्देवसङ्घपूजा दिनाष्टकम् ।
तस्य सूरिपदस्योच्चैः, स्थापनाया महोत्सवे ॥ ११०० ॥

ततः समन्तभद्राख्याः, सूरयो देहपञ्जरम् ।
हित्वा शिवपुरं प्राप्ताः, कृतार्थाः क्षीणकल्मषाः ॥ ११०१ ॥

अथ लब्धावधिमनःपर्यायज्ञानवैभवः ।
पुण्डरीकाभिधः सूरिर्दीपयामास शासनम् ॥ ११०२ ॥

शिष्यान्निष्पाद्य देशेषु, विहृत्य जिनशासनम् ।
प्रभाव्य च चकारासौ, शुद्धसंलेखनां सुधीः ॥ ११०३ ॥

स्वपदे स्थापितः प्राज्ञस्तेन साधुर्धनेश्वरः ।
कृतानुज्ञं स तं सर्वसमक्षं चैवमन्वशात् ॥ ११०४ ॥

धन्यस्त्वं येन विज्ञातो, महाशयजिनागमः ।
यस्मै चेदं पदं दत्तं, महाधीरैर्निषेवितम् ॥ ११०५ ॥

धन्येभ्यो दीयते ह्येतद्, धन्या एवास्य पारगाः ।
गत्वाऽस्य पारं धन्याश्च, पारं यान्ति भवोदधेः ॥ ११०६ ॥

कुर्वन्ति भवभीतानां, धन्यास्त्राणं च देहिनः ।
शरणं च प्रपन्नास्त्वां सर्वेऽमी शरणोचितम् ॥ ११०७ ॥

एते हि भावरोगार्तास्त्वं च भावभिषग्वरः ।
यत्नेन मोचनीयास्तद्, भावरोगादमी त्वया ॥ ११०८ ॥

दत्त्वाऽनुशिष्टिमित्थं च, सूरेस्तस्य कृतानतेः ।
सूरयः पुण्डरीकाख्याः, प्राहुः शिष्यगणं प्रति ॥ ११०९ ॥

युष्माभिरपि नैवायं, विमोक्तव्यः कदाचन ।
संसारसागरोत्तारे, यानपात्रस्य सन्निभः ॥ १११० ॥

अस्य त्यागे भगवतामाज्ञालोपः कृतो भवेत् ।
ततो विडम्बनामात्रं, गृहत्यागादिचेष्टितम् ॥ ११११ ॥

ततः कुलवधून्यायात्, कार्यै निर्भर्त्सितैरपि ।
युष्माभिरस्य न त्याज्यं, पादमूलं कदाचन ॥ १११२ ॥

इदं गुरुवचः सर्वे, स्वीकुर्वन्ति स्म साधवः ।
प्रययौ पुण्डरीकोऽथ, विधिना गिरिकन्दराम् ॥ १११३ ॥

स दत्तालोचनस्तत्र, सिद्धान् संस्थाप्य चेतसि ।
भावनां विततानेत्थं, कारणं धर्मशुक्लयोः ॥ १११४ ॥

ज्ञानदर्शनचारित्रतपोवीर्यमयोऽस्म्यहम् ।
अन्तरात्मा मयोत्सृष्टं, क्रिययाऽप्यधुनाऽपरम् ॥ १११५ ॥

समाधिजलधौताङ्गो, गालिताखिलकल्मषः ।
वर्तेऽहं स्नातकः शुद्धो, निरुपाधिस्वभावभृत् ॥ १११६ ॥

क्षाम्यन्तु सर्वजीवा मे, क्षमयामि च तानहम् ।
निर्वैरः साम्प्रतं वर्ते, व्युत्सृष्टाखिलकल्मषः ॥ १११७ ॥

तीर्थेश्वरास्तथा सिद्धाः, साधवो धुतकल्मषाः ।
धर्मो जिनोदितश्चैते, भवन्तु मम मङ्गलम् ॥ १११८ ॥

स्थितं सामायिके शुद्धे, मनोजालनिरोधकम् ।
पश्यन्तु त्यक्तचेष्टं मां, सिद्धास्त्रैलोक्यदर्शिनः ॥ १११९ ॥

इह दुश्चरितं किञ्चिद्, यद् यच्चान्यत्र मे भवे ।
अभून्निन्दामि तदहं, सर्वं संवेगभावितः ॥ ११२० ॥

इत्येवं भावनामग्नः स महात्मा शिलातले ।
पादपोपगमं कृत्वा, स्थितो जितपरीषहः ॥ ११२१ ॥

अतिलङ्घ्य ततो धर्मध्यानं विध्वस्तकल्मषः ।
स शुक्लं पूरयामास, सर्वकर्मवनानलम् ॥ ११२२ ॥

आरुह्य क्षपकश्रेणिं, हत्वा घातिचतुष्टयम् ।
प्राप्तोऽथ केवलज्ञानं, निर्व्याघातमनुत्तरम् ॥ ११२३ ॥

देवाः समाययुस्तत्र, तत्पूजार्थं चतुर्विधाः ।
दध्वान मधुरं व्योम्नि, दुन्दुभिर्देवताडितः ॥ ११२४ ॥

ननृतुर्मुदिता देव्यः, किन्नर्यो मधुरं जगुः ।
व्यकिरन् पुष्पवृष्टिं च, सुपर्वाणो मनोहराम् ॥ ११२५ ॥

भ्रमद्भ्रमरविस्तारिझङ्कारमुखरः क्षणात् ।
प्रदेशो विविधैः सोऽभूत्, दिव्यगन्धैर्विसृत्वरैः ॥ ११२६ ॥

गोशीर्षचन्दनालिप्तं, दिव्यधूपेन वासितम् ।
मुनीन्द्रस्य वपुश्चक्रुर्भक्तिभाजो दिवौकसः ॥ ११२७ ॥

अथ योगत्रयं रुद्ध्वा, शैलेशीमधिरुह्य च ।
देहत्रयेण निर्मुक्तः, स प्राप परमं पदम् ॥ ११२८ ॥

विशेषपूजां ते कृत्वा, ततस्तस्य महात्मनः ।
निजस्थानं गता देवा, भक्त्या विध्वस्तकल्मषाः ॥ ११२९ ॥

महाभद्राऽथ तेनैव, क्रमेणाखिलकर्मणाम् ।
क्षयं कृत्वा गता मोक्षं, किन्तु भक्तपरिज्ञया ॥ ११३० ॥

तथा सुललिता साध्वी, तपःक्षपितपातका ।
अनयैव दिशा मोक्षं, गता भक्तपरिज्ञया ॥ ११३१ ॥

ते च श्रीगर्भराजाद्या, मुनयः सुदृढव्रताः ।
सुमङ्गलाद्याः साध्व्यश्च, प्राप्ताः स्वर्लोकसम्पदम् ॥ ११३२ ॥

एतद् यैरनुसुन्दरस्य चरितं लीलावशेनापि हि,
श्रोत्रातिथ्यमनायि भावुकजनैस्तस्मिन् मनोनन्दने ।
कैश्चित् तैर्जगृहे समग्रविरतिः कैश्चित् पुनः श्राद्धता,
सम्यक्त्वं शुचि कैश्चिदीयुरपरे मार्गानुसारिस्थितिम् ॥ ११३३ ॥

प्रशस्तिः

साहिश्रीमदकब्बरक्षितिपति(ते)श्चित्ते निजैर्यो गुणै-
रादायाम्बु दयामयं जिनमताद् धर्मद्रुमं सिक्तवान् ।
नम्रानेकनरेन्द्रमौलिविलसन्माणिक्यकान्तिच्छटा-
नीरौघस्नपितक्रमोऽयमजनि श्रीहीरसूरीश्वरः ॥ १ ॥

सूरीश्रीविजयादिसेनसुगुरुस्तत्पट्टरत्नं बभौ,
शाहेः पर्षदि यो जिगाय सुनयैः प्रोन्मादिनो वादिनः ।
सूरिः श्रीविजयादिदेवसुगुरुस्तत्पट्टभास्वानभूद्,
भूयांस्तत्सुकृतानुमोदनकृते ग्रन्थोऽयमुज्जृम्भताम् ॥ २ ॥

कल्याणं नाम येषां वपुरपि विलसच्चारुकल्याणवर्णम्,
धैर्यं कल्याणशैलाधिकमपि करुणादृष्टिकल्याणवृष्टिः ।
कल्याणीभक्तयस्ते सुगुरुषु नितरां हीरसूरीश्वरेषु,
श्रीमत्कल्याणराजद्विजयगुरुवरा वाचकेन्द्रा बभूवुः ॥ ३ ॥

जिह्वाग्रजाग्रदुद्योतिज्योतिर्व्याकरणागमाः ।
श्रीलाभविजयाह्वानास्तच्छिष्या सुधियोऽभवन् ॥ ४ ॥

सौभाग्यभाग्यनिधयः सुधियो बभूवुः,
सज्जीतजीतविजयाश्च तदीयशिष्याः ।
श्रीमन्नयादिविजया इह तत्सतीर्थ्या-
स्तीर्थोदयावहपवित्रचरित्रभाजः ॥ ५ ॥

तदीयपदसेवकः स्ववशभावमान्विक्षिकी-
नयं खलु निनाय यो दृढतरैस्तदीयैर्गुणैः ।
स पद्मविजयाह्वयः प्रियसहोदरः प्रीतिमान्,
यशोविजयवाचकः किमपि तत्त्वमेतज्जगौ ॥ ६ ॥

प्राभृतं विजयदेवगुरूणां ग्रन्थ एष सुविचारविशेषैः ।
एतदुत्थसुकृतं निभृतं तैर्यत्समीहितमनागतमेव ॥ ७ ॥

शास्त्रसन्देशमालाविंशतिभागमध्ये ग्रथितानां ग्रन्थानामकारादिक्रमः

(अङ्कैर्भागा विज्ञेयाः)

अ

अट्ठारससहस्सशीलंगाइरहा (५)
अध्यात्मकल्पद्रुमः (९)
अध्यात्मबिन्दुः (१८)
अध्यात्मसारः (४)
अध्यात्मोपनिषत् (४)
अनुमानमातृका (१६)
अनेकान्तव्यवस्थाप्रकरणस्य मङ्गलप्रशस्ती (५)
अन्नायउंछकुलयं (७)
अन्ययोगव्यवच्छेदद्वात्रिंशिका (१६)
अन्योक्तिशतकम् (६)
अन्तिमाऽऽराधना (१४)
अप्पविसोहिकुलयं (७)
अभव्यकुलकम् (७)
अष्टकानि (३)

आ

आउरपच्चक्खाणं-१ (१५)
आउरपच्चक्खाणं-२ (१५)
आख्यानकमणिकोशः (८)
आचारोपदेशः (११)
आत्मतत्त्वचिन्ताभावनाचूलिका (९)
आत्मनिन्दाष्टकम् (१४)
आत्मप्रबोधः (१७)
आत्मबोधकुलकम् (७)
आत्महितकुलकम् (७)
आत्मानुशासनकुलकम् (७)
आत्मानुशासनम् (१४)
आत्मानुशास्तिसंज्ञिका पञ्चविंशतिका (१४)
आत्मावबोधकुलकम् (७)
आध्यात्मिकमतपरीक्षा (५)
आभाणशतकम् (६)
आराधकविराधकचतुर्भङ्गी (४)
आराधना (१४)
आराहणा (१४)
आराहणाकुलयं (७)
आराहणापडागा-१ (१४)
आराहणापडागा-२ (१४)
आराहणापणगं (१४)
आराहणापयरणं (१४)
आलोयणाकुलयं (७)
आर्षभीयचरितमहाकाव्यम् (५)

ई

इन्द्रियपराजयशतकम् (६)
ईर्यापथिकीषट्त्रिंशिका (१६)
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् (७)

उ

उत्पादादिसिद्धिः (१६)
उत्सूत्रपदोद्घाटनकुलकम् (७)
उपदेशकल्पवल्लिः (११)

उपदेशकुलकम्-१ (७)
उपदेशकुलकम्-२ (७)
उपदेशचिन्तामणिः (१०)
उपदेशपदग्रन्थः (१)
उपदेशप्रदीपः (१२)
उपदेशरत्नकोशः (८)
उपदेशरत्नाकरः (८)
उपदेश(धर्म)रसायनरासः (८)
उपदेशरहस्यम् (४)
उपदेशशतकम् (६)
उपदेशसप्ततिका (८)
उपदेशसप्ततिः (११)
उपदेशसारः (११)
उपदेशामृताकुलकम् (७)
उपधानविधिः-१ (१०)
उपधानविधिः-२ (१०)
उवएसचउक्ककुलयं-१ (७)
उवएसचउक्ककुलयं-२ (७)
उवएसमाला (८)

ऋ

ऋषभशतकम् (६)
ऋषिमण्डलस्तवः (१२)

ए

एकविंशतिर्द्वात्रिंशिकाः (१६)
ऐन्द्रस्तुतयः (५)

औ

औष्ट्रिकमतोत्सूत्रोद्घाटनकुलकम् (७)

अं

अंगुलसत्तरी (१३)

क

कथाकोषः (१२)
कथानककोशः (१२)
कर्पूरप्रकरः (१२)
कर्मप्रकृतिः (१३)
कर्मविपाककुलकम् (७)
कर्मविपाकाख्यः प्रथमः प्राचीनकर्मग्रन्थः (१३)
कर्मस्तवाख्यः द्वितीयः प्राचीनकर्मग्रन्थः (१३)
कम्मबत्तीसी (१३)
कविकल्पद्रुमः (१८)
कस्तूरीप्रकरः (१२)
कायस्थितिस्तोत्रम् (१३)
कालसप्ततिका (१३)
कालस्वरूपकुलकम् (७)
कुमारविहारशतकम् (६)
कूपदृष्टान्तविशदीकरणम् (५)
कृष्णराजीविमानविचारः (१३)
केवलिभुक्तिप्रकरणम् (१६)

क्ष

क्षमाकुलकम् (७)
क्षान्तिकुलकम् (७)
क्षुल्लकभवावलिः (१३)

ख

खामणाकुलयं (१) (७)
खामणाकुलयं (२) (७)

ग

गणधरसार्धशतकम् (६)
गाङ्गेयभङ्गप्रकरणम्-१ (१५)
गाङ्गेयभङ्गप्रकरणम्-२ (१५)
गुणस्थानक्रमारोहः (१३)
गुणानुरागकुलकम् (७)
गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् (७)
गुरुतत्त्वप्रदीपः (१६)
गुरुतत्त्वविनिश्चयः (५)
गुरुदर्शनहर्षकुलकम् (७)
गुरुविरहविलापः (१४)
गोडीपार्श्वस्तवनम् (५)
गौतमकुलकम् (७)

घ

घनगणितसंग्रहगाथाः (१८)

च

चउसरणपइन्नयं (१५)
चतुर्गतिजीवक्षपणकानि (१४)
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे (१३)
चरणकरणमूलोत्तरगुण (१८)
चारित्रमनोरथमाला (८)
चित्तशुद्धिफलम् (१८)
चेइयवंदणमहाभासं (१०)
चंदावेज्झयं पइण्णयं (१५)

ज

जघन्योत्कृष्टपद एककालं गुणस्थानकेषु (१३)
जल्पकल्पलता (१६)
जिनप्रतिमास्तोत्रम् (१)
जिनबिम्बप्रतिष्ठाविधिः (१०)
जिनशतकम्-१ (६)
जिनशतकम्-२ (६)
जीवजोणिभावणाकुलयं (७)
जीवदयाप्रकरणं (८)
जीवसमासः (१३)
जीवादिगणितसंग्रहगाथाः (१८)
जीवानुशासनम् (१४)
जीवानुशास्तिकुलकम् (७)
जीवाभिगमसंग्रहणी (१५)
जैनतत्त्वसारः (१६)
जैनस्याद्वादमुक्तावली (१६)
जोइसकरंडगं पइण्णयं (१५)

ज्ञ

ज्ञाताधर्मकथोपनयगाथाः (१५)
ज्ञानप्रकाशकुलकम् (७)
ज्ञानसारः (४)
ज्ञानार्णवः (५)

त

तत्त्वतरङ्गिणी (१६)
तत्त्वबोधतरङ्गिणी (१२)
तत्त्वामृतम् (९)
तपःकुलकम् (७)
तित्थोगालिपइन्नयं (१५)
त्रिशतत्रिषष्टिपाखण्डस्वरूपस्तोत्रम् (१५)
त्रिषष्टीयदेशनासंग्रहः (११)

द

दशश्रावककुलकम् (७)

दर्शननियमाकुलकम् (७)
दानकुलकम् (७)
दानविधिः (१०)
दानषट्त्रिंशिका (९)
दानादिप्रकरणम् (१२)
दानोपदेशमाला (८)
दीवसागरपन्नत्ति (१५)
दृष्टान्तशतकम्-१ (६)
दृष्टान्तशतकम्-२ (६)
देवेन्द्रनरकेन्द्रप्रकरणम् (१३)
देशनाशतकम् (६)
देहकुलकम् (७)
देहस्थितिस्तवः (१३)
दंसणसुद्धिपयरणं (१०)
द्वात्रिंशद्द्वात्रिंशिकाः (४)
द्वादश-कुलकम् (७)
द्वादशव्रतस्वरूपम् (१०)
द्वादशाङ्गीपदप्रमाणकुलकम् (७)

ध

धनुःपृष्ठबाहासंग्रहगाथाः (१८)
धर्मपरीक्षा (५)
धर्मबिन्दुः (३)
धर्मरत्नप्रकरणम् (१०)
धर्मरत्नकरण्डकः (११)
धर्मविधिः (८)
धर्मशिक्षा (९)
धर्मसंग्रहणिः (१)
धर्मसंग्रहः (११)
धर्माचार्यबहुमानकुलकम् (७)
धर्मोद्यमकुलकम् (७)
धर्मोपदेशः (९)
धर्मोपदेशमाला (८)
धम्मारिहगुणोवएसकुलयं (७)
धर्म्मोपदेशकुलकम् (७)
धम्मोवएसकुलयं (७)
धूर्ताख्यानम् (३)
धूमावली (३)
ध्यानदीपिका (१८)
ध्यानशतकम् (६)

न

नन्दीश्वरस्तवः (१३)
नमस्कारस्तवः (१८)
नयकर्णिका (१६)
नयोपदेशः (५)
नरभवदिट्ठंतोवणयमाला (१२)
नवकारफलकुलकम् (७)
नवतत्त्वभाष्यम् (१३)
नवतत्त्वम् (१३)
नवतत्त्वसंवेदनम् (१३)
नवपदप्रकरणम् (१०)
नानाचित्तप्रकरणम् (३)
नारीशीलरक्षाकुलकम् (७)
निगोदषट्त्रिंशिका (१५)
नूतनाचार्याय हितशिक्षा (९)
नंदणरायरिसिस्स अन्तिमाऽऽराधना (१४)
न्यायखण्डखाद्याऽपरनामा महावीरस्तवः (५)
न्यायावतारः (१६)
न्यायावतारसूत्रवार्तिकम् (१६)

प

पज्जंताराहणा (१४)
पंचवत्थुगं (२)
पञ्चनिर्ग्रन्थी (१५)
पञ्चलिङ्गीप्रकरणम् (१५)
पञ्चसङ्ग्रहः (१३)
पञ्चसंयतप्रकरणम् (१५)
पञ्चाशकानि (१)
पट्टावलीविसुद्धी (१६)
पडिलेहणाविचारकुलकम् (७)
पदार्थस्थापनासंग्रह (१७)
पद्मानन्दशतकम् (६)
परमज्योतिःपञ्चविंशतिका (५)
परमाणुखण्डषट्त्रिंशिका (१५)
परमात्मपञ्चविंशतिका (५)
परमानन्दपञ्चविंशतिः (९)
पर्यन्ताराधनाकुलकम् (७)
पर्युषणादशशतकम् (१६)
पव्वज्जाविहाणकुलयं (७)
पिण्डविशुद्धिः (१०)
पुण्डरीकतीर्थपतीस्तोत्रम् (५)
पुण्यकुलकम् (७)
पुद्गलपरावर्तस्तवनम् (१३)
पुद्गलषट्त्रिंशिका (१५)
पुष्पमाला (८)
पूजाविधिः (११)
पोसहविही (१०)
पौषधषट्त्रिंशिका (१६)
प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी (१५)
प्रतरप्रमाणसंग्रहगाथाः (१८)
प्रतिमाशतकम् (४)
प्रतिसमयजागृतिकुलकम् (७)
प्रत्याख्यानस्वरूपम् (१०)
प्रबोधचिन्तामणिः (९)
प्रभाते जीवानुशासनम् (१४)
प्रमाणनयतत्त्वालोकालङ्कारः (१६)
प्रमाणप्रकाशः (१६)
प्रमाणमीमांसा (१६)
प्रमादपरिहारकुलकम् (७)
प्रवचनपरीक्षा (१६)
प्रवचनसारोद्धारः (१७)
प्रव्रज्याविधानकुलकम् (७)
प्रशमरतिः (९)
प्रश्नद्वात्रिंशिका (१६)
प्रश्नशतकम् (६)
प्रश्नोत्तररत्नमाला (१२)
प्राकृतसंवेगामृतपद्धतिः (१४)
प्रातःकालिकजिनस्तुतिः (९)

ब

बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः (१३)
बन्धषट्त्रिंशिका (१५)
बन्धहेतुप्रकरणम् (१३)
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वे प्रकरणे (५)
बन्धोदयसत्ता (१३)
बृहद्वन्दनकभाष्यम् (१०)

भ

भवभावना (८)
भावकुलकम् (७)
भावनाशतकम् (६)
भावप्रकरणम् (१३)
भाषारहस्यम् (५)
भोजनपूर्वचिन्तागाथाः (८)

म

मंगलकुलयं (७)
मण्डलप्रकरणम् (१८)
मदादिविपाककुलकम् (७)
मनुष्यभवदुर्लभता (९)
मनोनिग्रहभावनाकुलकम् (७)
महासतीकुलकम् (७)
मार्गपरिशुद्धिः (५)
मार्ग्गणासु बंधहेतूदयत्रिभंङ्गी (१३)
मिच्छादुक्कडवोसिरणविहिकुलयं (७)
मिथ्यात्वकुलकम् (७)
मिथ्यात्वमथनकुलकम् (७)
मिथ्यात्वविचारकुलकम् (७)
मिथ्यात्वस्थानविवरणकुलकम् (७)
मुखवस्त्रिकास्थापनकुलकम् (७)
मूलशुद्धिः (१०)
मृत्युमहोत्सवः (१४)
मोक्षोपदेशपञ्चाशकम् (९)

य

यतिदिनकृत्यम् (११)
यतिदिनचर्या (१०)
यतिलक्षणसमुच्चयः (४)
यतिशिक्षापञ्चाशिका (८)
यात्रास्तवः (११)
युक्त्यनुशासनम् (१६)
युक्तिप्रकाशः (१६)
युक्तिप्रबोधः (१६)
युगपद्बन्धहेतुप्रकरणम् (१३)
योगदृष्टिसमुच्चयः (३)
योगप्रदीपः (१२)
योगबिन्दुः (३)
योगशतकम् (३)
योगशास्त्रम् (१८)
योगानुष्ठानकुलकम् (७)
योनिस्तवः (१३)

र

रत्नत्रयकुलकम् (७)
रत्नसञ्चयः (१७)

ल

लघुप्रवचनसारोद्धारः (१७)
लध्वल्पबहुत्वप्रकरणम् (१३)
लोकतत्त्वनिर्णयः (३)
लोकनालिकाद्वात्रिंशिका (१३)

व

वाक्यप्रकाशः (१८)
वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् (५)
विचारपञ्चाशिका (१३)
विचारसप्ततिका (१७)
विचारसारः (१७)
विजयप्रभसूरिक्षामणकविज्ञप्तिः (५)

विजयप्रभसूरिस्वाध्यायः (५)
विजयोल्लासमहाकाव्यम् (५)
विद्वद्गोष्ठी (१२)
विभक्तिविचारः (१५)
विरतिफलकुलकम् (७)
विविधतपोदिनाङ्ककुलकम् (७)
विवेककुलकम् (७)
विवेकमञ्जरी (८)
विशेष-णवतिः (१५)
विंशतिर्विंशिकाः (३)
विषयविरक्तिकुलकम् (७)
वीरस्तवः (१५)
वैराग्यकल्पलता (१९+२०)
वैराग्यरसायनम् (८)
वैराग्यशतकम् (६)
व्यवहारकुलकम् (७)
व्याख्यानविधिशतकम् (६)

श

शङ्खेश्वरपार्श्वजिनस्तोत्रम्-१ (५)
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-२ (५)
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-३ (५)
शमीनपार्श्वस्तोत्रम् (५)
शास्त्रवार्तासमुच्चयः (३)
शीलकुलकम् (७)
शीलोपदेशमाला (८)
शोकनिवारणकुलकम् (७)

श्र

श्राद्धदिनकृत्यम् (१०)
श्राद्धविधिः (१०)
श्रावकधर्मकृत्यम् (११)
श्रावकधर्मविधिः (३)
श्रावकप्रज्ञप्तिः (१०)
श्रावकव्रतभङ्गप्रकरणम् (१८)
श्रीकातन्त्रविभ्रमसूत्रम् (१८)
श्रीमद्गीता-तत्त्वगीता (१८)
श्रुतास्वादः (८)
श्रृङ्गारवैराग्यतरङ्गिणी (१२)

ष

षट्स्थानकम् (१३)
षडशीतिनामा चतुर्थः प्राचीनकर्मग्रन्थः (१३)
षड्दर्शनपरिक्रमः (१६)
षड्दर्शनसमुच्चयः-१ (२)
षड्दर्शनसमुच्चयः-२ (१६)
षड्द्रव्यसङ्ग्रहः (१३)
षड्विधाऽन्तिमाऽऽराधना (१४)
षष्ठिशतकम् (६)
षोडशकप्रकरणम् (३)

स

संग्रहशतकम् (६)
संज्ञाकुलकम् (७)
संज्ञाधिकारः (१८)
संबोधप्रकरणम् (२)
संविग्नसाधुयोग्यनियमकुलकम् (७)
संवेगकुलयं (७)

संवेगद्रुमकन्दली (९)
संवेगमंजरीकुलयं (७)
संवेगरंगमाला (१४)
संवेगामृतम् (१८)
सङ्घस्वरूपकुलकम् (७)
सज्जनचित्तवल्लभः (९)
सन्देहदोलावली (१६)
सभापञ्चकप्रकरणम् (१८)
सप्ततिकाभाष्यम् (१३)
समताशतक (६)
समवसरणप्रकरणम् (१३)
समवसरणस्तोत्रम् (१३)
समाधिशतक (६)
समाधिशतकम् (६)
समाधिसाम्यद्वार्त्रिंशिका (४)
सम्मतिसूत्रम् (१६)
सम्मत्तकुलयं-१ (७)
सम्मत्तुप्पायविही कुलकम् (७)
सम्यक्त्वकुलकम्-२ (७)
सम्यक्त्वकुलकम्-३ (७)
सम्यक्त्वपरीक्षा (१६)
सम्यक्त्वसप्ततिः (१०)
सम्यक्त्वस्वरूपकुलकम् (७)
सर्वज्ञशतकम् (६)
सर्वज्ञसिद्धिः (२)
सर्वतीर्थमहर्षिकुलकम् (७)
सर्वश्रीजिनसाधारणस्तवनम् (२)
सार्धमिकवात्सल्यकुलकम् (७)
सामाचारी (४)
सामान्यगुणोपदेशकुलकम् (७)
साम्यशतकम् (६)
सारावलीपइण्णयं (१५)
सिद्धदण्डिकास्तवः (१३)
सिद्धपञ्चाशिका (१३)
सिद्धप्राभृतम् (१३)
सिद्धसहस्त्रनामकोशः (५)
सिद्धान्तसारोद्धारः (१८)
सुक्ष्मार्थविचारसारोद्धारः (१५)
सुभाषिताष्टकानि (१२)
सुमिणसित्तरी (८)
सूक्तरत्नावली-१ (१२)
सूक्तरत्नावली-२ (१२)
सूक्तिमुक्तावली (१२)
सूक्ष्मार्थसप्तति प्रकरणम् (१८)
सूत्रकृताङ्गाद्यचतुरध्ययनाऽनुक्रमगाथाः (१५)
स्तवपरिज्ञा (१०)
स्त्रीनिर्वाणप्रकरणम् (१६)
स्त्रीवास्तविकताप्रकरणम् (८)
स्याद्वादकलिका (१६)
स्याद्वादभाषा (१६)
स्याद्वादमुक्तावली (१६)

ह

हिंसाफलाष्टकम् (३)
हिओवएसमाला (८)
हिङ्गुलप्रकरणम् (१२)
हृदयप्रदीपषट्त्रिंशिका (९)

॥ शास्त्रसंदेशमाला ॥

१ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - १
२ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - २
३ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - ३
४ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - १
५ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - २
६ शतकसंदोहः
७ कुलयसंग्गहो
८ भावणासत्थणिअरो
९ भावनाशास्त्रनिकरः
१० आयारसत्थणिअरो
११ आचारशास्त्रनिकरः
१२ काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ
१३ प्रारम्भिकाणि कार्मग्रन्थिकाणि लोकप्रकाशीयानि च प्रकरणानि
१४ अन्तिमाराधनाग्रन्थाः
१५ आगमिकानि प्रकरणानि तथा प्रकीर्णकानि
१६ दार्शनिक-चर्चा ग्रन्थनिकरौः
१७ विविधविषयसंकलनाग्रन्थाः
१८ ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः
१९ वैराग्य कल्पलता - १
२० वैराग्य कल्पलता - २